# श्रीपञ्चस्तवाख्यः

# (ŚRI PAÑCASTAVĀKHYAḤ)

**विरचितव्याख्याग्रन्थसचिवः**

श्रीमच्छेषाचलवासरसिक श्रीनिवासाचार्य

**परिष्कृतः**

**'शिरोमणिः', 'विद्वान्'**

श्री ति.अ. कृष्णमाचार्यैः

**'वाचस्पतिः', 'शिरोमणिः', 'विद्वान्'**

डॉ.यन्.सि.वि. नरसिंहाचार्यैश्च

प्रकाशितः

तिरुमलतिरुपतिदेवस्थानम्

**2005**

# ŚRI PAÑCASTAVĀKHYAḤ

# श्रीपञ्चस्तवाख्यः

Commentary by :

**Srinivasachar**

Edited by

**Sri T.A. Krishnamacharya**

**Dr.N.C.V. Narasimhacharya**

T.T.D. Religious Publication Series No : 643

All Rights Reserved

First Edition : 2005

Copies

Published by

**Sri Ajeya Kallam,** I A.S.

EXECUTIVE OFFICER

**TIRUMALA TIRUPATI DEVASTHANAMS**

TIRUPATI-517 507

D.T.P. by

Annapurna Graphics

R.S. Gardens

TIRUPATI - 517 507, Ph . 2235006

Printed at

T.T. Devasthanams Press

TIRUPATI - 517 507

# प्राक्कथनम्

तिरुमलक्षेत्रं सुप्रसिद्धेषु वैष्णवक्षेत्रेषु अग्रगण्यं भवति। अनुदिनं सहस्रशः भक्तान् इदं क्षेत्रम् आकर्षतीति सुविदितमेतत् । भक्तैः श्रीवेंकटेश्वरस्वामिने समर्पितं द्रव्यं बहुमुखेषु सेवाकार्यक्रमेषु विनियुज्यते ।

देवस्थानस्य कार्यक्रमेषु धार्मिकग्रन्थप्रकटनं मुख्यातिमुख्यं भवति । वेदाः, रामायणभारतभागवतानि, भक्तिप्रतिपादकाः इतरे च ग्रन्थाः विविधभाषासु सुप्रसिद्धैः पण्डितैः परिष्कृताः प्रकटीक्रियन्ते ।

*'भक्ति नीपैदोकटे परमसुखमु'* (त्वयि भक्तिरेकैव परमं सुखम्) इति पदकवितापितामहेन अन्नमाचार्येण उक्तया रीत्या भगवति भक्तिरेव अस्मान् तारयिष्यति। भक्तिप्रचाराय स्तोत्रसाहित्यं प्राणभूतम्। वेदा अपि देवतास्तुत्यैव प्रारभ्यन्ते।

वैष्णवभक्तिसाहित्ये गणनातीताः स्तोत्रग्रन्थाः सन्ति । तेषु भगवद्रामानुजानां अन्तरङ्गशिष्याः इति प्रसिद्धैः श्रीवत्साङ्कमिश्रैः विरचितः पञ्चस्तवाख्यो ग्रन्थः जगत्प्रसिद्धः । तत्र वैकुण्ठस्तवः, अतिमानुषस्तवः, सुन्दरबाहुस्तवः, वरदराजस्तवः, श्रीस्तवः इति पञ्चस्तोत्राणि सन्ति । तत्र एकैकस्मिन्नपि श्लोके वेदार्थाः निक्षिप्ताः। तत एव श्रीवैष्णवाः अमून् स्तवान् परमपवित्रान् सम्भाव्य पठन्ति।

उत्कृष्टानि इमानि स्तोत्राणि व्याख्यानेन साकं मुद्राप्य भक्तेभ्यः समर्पयितुं सदवकाशः लब्ध इति सन्तुष्यामः । पूर्वमुद्रितग्रन्थेषु स्थितान् अक्षरदोषान् अपनीय उपोद्घातरूपेण विज्ञापनेनसाकम् अमुं ग्रन्थं सुष्ठु परिष्कृत्य प्रदत्तवद्भ्यः सुप्रसिद्धपण्डितेभ्यः श्रीमद्भ्यः N.C.V. नरसिंहाचार्येभ्यः, T.A. कृष्णमाचार्येभ्यश्च कृतज्ञतां निवेदयामः ।

जिज्ञासवः पाठकाः अमुं ग्रन्थम् आदृत्य देवस्थानस्य कृषिं सफलां करिष्यन्तीति आशास्महे ।

**कार्यनिर्वहणाधिकारी**

ति.ति.देवस्थानम्, तिरुपतिः

# विज्ञापना

सव्याख्यानस्य पञ्चस्तवाख्यस्य श्री श्रीरङ्ग कु. तिरुवेङ्कटाचार्यैः परिशोधितस्य, अस्य प्रबन्धस्य प्रथमं मुद्रणं आन्ध्रलिप्यां, चेन्नपुर्यां श्रीनिकेत मुद्राक्षरशालायां क्री.श. 1875 तमे वत्सरे कृतमिति, पुनः श्री अद्दङ्कि तिरुमल कल्याण श्रीनिवासताताचार्यैः परिशोधितस्याऽस्य कोशस्य द्वितीयं मुद्रणं ग्रन्थाक्षरेषु पूर्वनिर्दिष्ट मुद्रायन्त्रालय एव क्री.श. 1900 तमे वत्सरे कृतमिति च ज्ञायते।

एतौ द्वौ प्रकाशौ सव्याख्यानस्य अस्मत्परिष्कृतप्रकाशस्य आधारग्रन्थौ। उपर्युक्तग्रन्थद्वयं प्राचीनतया स्पर्शासहं कथञ्चिदस्माभिः समपादि। देवनागरीलिप्यामपि अयं ग्रन्थो मुद्रित इति शुश्रुम केवलम्। स तु दुर्लभ एवाऽस्माकमभूत्। मूलश्लोकानान्तु परिष्कारे त्रिचतुराणामन्येषां ग्रन्थानामपि साहाय्य मविन्दामहि। परिष्काराय अपेक्षिते श्लोकभावावगमे श्रीमतां महाविदुषां श्री काञ्चीप्रतिवादि भयङ्कर अण्णङ्गराचार्याणां विपुलद्राविडभाषा विवरणात्मकात् प्रकाशात् महानुपकारोऽलभ्यत।

पञ्चस्तवाख्यस्य व्याख्यासनाथस्य अस्य स्तोत्रकदम्बस्य परिष्कृत्य प्रकाशने आवश्यकता अनिरूपितसुज्ञाना भवति, यतोऽयं ग्रन्थो विषयगौरवेण सजातीयान् ग्रन्थानतिशयानोऽपि शतशो विद्यमानैः मुद्रणदोषैः पठितॄणां भक्तानामुद्वेजको भवति।

प्रपन्नजनप्रथमगण्याः वेदान्तिकुलभूषणाः कविवृषभाः भगवद्रामानुजमुने रन्तरङ्गशिष्याः 'यदुक्तय स्त्रयीकण्ठे यान्ति मङ्गल सूत्रताम्' इत्युपश्लोकिताः श्रीवत्साङ्कमिश्राः अस्य ग्रन्थस्य निर्मातारः। अत्र पञ्चस्तवाः वैकुण्ठस्तव - अतिमानुषस्तव - सुन्दरबाहुस्तव - वरदराजस्तव - श्रीस्तवाभिधाना स्सन्ति। तेषु विद्यमानः एकैकोऽपि श्लोकः वेदार्थपरिपुष्टः उपनिषत्खण्डकल्पो वर्तते। श्रीवैष्णवानां कुलेऽस्य पञ्चस्तवस्य आदृतिरसाधारणी। अस्य व्याख्यासापेक्षतां विदित्वा तिरुमलैवासरसिकाः श्रीनिवासाचार्याः नातिविस्तृतामपि अपेक्षितयावत्प्रमाणवचन परिबृंहितां सुबोधां व्याख्यां व्यररचन्। बहोः कालात्प्राक् मुद्रितोऽयं श्रीकोशः अद्यत्वे दुर्लभः। एतं लोपं परिहर्तुकामै रस्माभिः अयं ग्रन्थः यावच्छक्ति परिष्कृत्य प्रकाशयितु मुपादीयत।

अस्मत्परिशीलितयो रुभयो रपि पूर्वोक्तयोः सव्याख्यान ग्रन्थयोः शतशो मुद्रणदोषालब्धपदा इति बहुत्र जिज्ञासूनां क्लेशावहांस्तान् संशोध्य भागवतानां सहृदयानां करकमलयो रुपायनी क्रियते कोशोऽयम्।

प्रथमतः पुण्यश्लोकानां ग्रन्थकर्तॄणां श्रीवत्साङ्कानां दिव्यचरिते कांश्चिदंशान् सङ्गृह्य निवेद्य पश्चात् परिष्करणेऽस्माभि रादृतान् नियमान् सतां सौकर्याय प्रस्तोष्यामः।

## श्रीवत्साङ्कमहिमादर्शः

*आर्वाञ्चो य त्पदसरसिजद्वन्द्व माश्रित्य, पूर्वे*
*मूर्ध्ना यस्यान्वय मुपगता देशिका मुक्ति मापुः।*
*सोऽयं रामानुजमुनिरपि स्वीय मुक्तिं करस्थां*
*यत्सम्बन्धा दमनुत, कथं वर्ण्यते कूरनाथः॥*

इत्येव मुपश्लोक्यमान निस्समाभ्यधिक महावैभवविभासुराणां अपारकरुणाकूपाररूपाणां सकलकल्याणगुणमणिगणपरिकर्मितानां

श्रीमन्नारायण पारम्यप्रतिपादकदर्शनरक्षणविश्राणित स्वचाक्षुष दर्शनानां पावनपावनानां प्रपन्नपरमेष्ठिनां पञ्चस्तवप्रबन्धॄणां श्रीवत्साङ्कमिश्राणां उदारमहिमान मुदीरयितुं गिरां पतिरपिं न पारयति। "श्रियः पत्युर्वैभव मपि वर्णयितुं प्रभूयते, न तु लक्ष्मणमुनीन्द्राणाम्" इति श्री भगवद्रामानुजाचार्याणां महिम्नोऽतिशयं दाशरथि- (मुदलियाण्डान्)- गोविन्द (एम्बार्) प्रभृतयो बभणुः। "रामानुजाचार्याणामपि महिमान मभिवर्णयितुं कश्चित्प्रभवेदपि; कूरनाथानां माहात्म्य मुद्भावयितुं न कश्चि दीशीत" इति अस्मदाचार्या स्सर्वे अभिप्रयन्ति।

मनुजस्यापेक्षितेषु गुणेषु मुख्यतमाः जीवकारुण्यम्, आचार्यनिष्ठा, भगवद्भक्तिः, वैराग्यम्, वैदुष्यम्, सत्कर्मणा मनुष्ठानम् - इत्यादयो गुणाः। तेषा मेषां समेषामपि आकरायमाणानां कूरनाथानां दिव्यचरितानुसन्धानं श्रीवैष्णवाना मखिलाना मवश्य कर्तव्येषु प्रधान मिति पूर्वाचार्या स्सञ्जगरिरे। गुणसागराणा मेषां बिन्दूनिव कांश्चन गुणान् प्रस्तुत्य भक्ति प्रवणेन चेतसाऽनुभवितुं प्रयतामहे।

## अवतारः

श्री काञ्चीनगर्याः वायव्यविदिग्भागे 'कूरम्' नाम्ना प्रथिता पुरी काचिदस्ति। इमे आचार्याः तत्र सौम्यनाम्नि नवाधिकशतोत्तर चतुस्सहस्रमिते कलिवत्सरे (क्री.श. 1008) पुष्ये मासि हस्तनक्षत्रयुते दिवसे पृथिव्या मवातरन्। एतान् श्रीवत्साङ्कनाम्ना आजुहुवुः। ईदृशनामकरणस्य कारण मेवं ब्रुवते तज्ज्ञाः। परवासुदेवः दुष्टनिग्रह शिष्टपरिपालनाद्यर्थं लीलाविभूत्यां स्वयं त्रेतायां श्रीरामरूपेणावतीर्य, सर्वदेशदशाकालेषु अन्तरङ्ग किङ्करं अनन्तं फणिराजं लक्ष्मणरूपेणाऽवतार्य, पृथिव्यां चिकीर्षितं परिसमाप्य तेन सह स्वीयां नित्यविभूतिं प्रत्यावृतत्। पुनः श्रीहरिः द्वापरे धर्मसंस्थापनार्थाय मह्या मवतितीर्षुः "यथा पूर्वं क्षोण्या मवतीर्य मम सहायो भव" इति शेषमर्थयते

स्म । तदा स कुण्डलीन्द्रः - "भगवति रामरूपेणाऽवतीर्णे भवतोऽनुजोऽवतीर्य अहमतिबहुलान् क्लेशानल मन्वभवम्" । इति लीलायै केवलं प्रत्युवाच। ततः श्रियः पतिः - "अस्मिन्नवतारे तदन्यथैव भवतु । त्वमग्रजो भव, तवाऽनुजोऽहं भविष्यामि" इति प्रतिश्रुत्य तथैव स्वयं श्रीकृष्णो जज्ञे, अनन्तश्च बलरामः । अस्मिन्नवतारे भगवतो मानसे काचिदतृप्ति रुदभूत्। 'अहो ! अद्य यावत् शेषित्व मेवोररीकृत्य व्यवहरता मया दास्यरुचि र्न ह्यनुभवगोचरीकृता । शेषित्वापेक्षया शेषवृत्त्या मेव भोग्यताऽधिकतरा । अतो मया शेषत्वमाधुर्यानुभवाय अवतारान्तराणि स्वीकरणीयानि' इति मनसि विचिन्त्य फलतो द्विःशेषं शेषिण माविर्भाव्य स्वयञ्च शेष स्समपद्यत। प्रथमतोऽनन्तं श्रीरामानुजात्मनाऽवतार्य भगवां स्तु स्वयं श्रीवत्साङ्करूपेणावतीर्य, पुनरपि शेषं वरवरमुनि (मणवाळ महामुनि) रूपेणाऽऽविर्भाव्य श्रीपतिश्च स्वयं प्रतिवादि भयङ्कराण्णार्यरूपेण प्रादुर्भूय च स्वमनोरथ मपूरय दिति साम्प्रदायिका अवताररहस्य मामनन्ति। लक्ष्मीनायक स्येव कूरेशानां वक्षसि प्रकाशमानं लाञ्छनं परमपुरुषतां सूचयतीति एते भगवा निव श्रीवत्सलाञ्छननाम्ना प्रसिद्धि मापुः। एतेषां 'आंळ्वान्' इति बिरुदनामाऽस्ति। आळ्वा निति द्रमिडपदस्य भक्तिरसे गुणानुभवरसे च निमग्न इत्यर्थः।

आळ्वान् पद प्राप्ति सम्बन्धिनी काचन कथा - भगवद् रामानुजाचार्याः कदाचित् 'भगवद्विषये' अत्यर्थं द्रुतचित्तानां कूरेशानां मुखादेव श्रीमुखसूक्ति (तिरुवाय् मोळि) भावविशेषान् श्रोतु मैच्छन्। परमां शेषत्वकाष्ठामास्थिताः श्रीवत्साङ्काः जगदाचार्येभ्यो भगवद्भाष्यकृद्भ्य उपदेष्टुं न सम्मेनिरे। अन्ततः उभयाङ्गीकारार्हः कश्चन नियमः पर्यकल्प्यत, येन एते कूरनाथाः दाशरथिप्रभृतिभ्यः श्रीमुखसूक्त्यर्थान् उपदिशेयुः, तत स्ते रामानुजेभ्य स्तत्तद्विशेषान् व्याचक्षीरन्। श्रीवैष्णवानां महती गोष्ठी प्राचलत्। यदा त्वेते आचार्याः

"उयर्वर वुयर् नल मुडैयवन्" इति श्रीमुखसूक्ति मनुसन्धातु मारेभिरे तस्मिन्नेवक्षणे व्यग्रचित्तास्सम्मुह्य मह्या मपतन्। मतान्तरस्थाः गुणनिधि मपि ब्रह्म निर्गुण मभाषिषत। वकुलाभरणा स्तु प्रथमपादे एव 'अतुलितमहानन्दधाम' इति परमात्मानं तुष्टुवुः खलु इति स्मारं स्मारं मुमूर्छुः। तदा गोष्ठी समाविष्टाः श्रीवैष्णवा अभिद्रुत्य, लक्ष्मणमुनीनुपेत्य श्रीवत्सचिह्नान् कटाक्षयितु माह्वयन्ति स्म। तेऽपि द्रुत मुपेत्य - "तदा उलूखलेन सम्बद्धस्य रोदनं सौलभ्यकाष्ठा" इति अनुसन्धाय षण्मासान् मोहदशापन्नान् वकुलाभरणमुनीन् साक्षात्कर्तुमप्रभवन्तोऽपि वय मेतर्हि, तादृशा नेतान् भक्तावतंसान् नेत्रसात्कर्तुं शक्नुमः" इति सगद्गदं वदन्तः पश्यन्तश्च चिरं तस्थुः। श्रीवत्साङ्का स्तु न प्रत्यबुध्यन्त। "आळ्वान्! आळ्वान्!" इत्युच्चै राह्वयन्तो यतिराजाः पृष्ठे आस्फाल्य प्राबोधयन्। प्रबुध्यमाना एते 'अतुलितमहानन्दधाम' इत्युच्चरन्तो झटिति उत्तस्थुः। चित्तद्रवीभावे नम्माळ्वार सदृशाः श्रीवत्सलाञ्छना इति रामानुजाचार्या एतान् आळ्वान् इति व्यपदिशन्।

## विषयवैतृष्ण्यम्

श्रीवत्सचिह्नमिश्राणा मेषां अवतारस्थलं 'कूरम्' नामकं महानगरम्। तद्विषयपालका एते कूरनाथा अभवन्। कस्याञ्चन निशीथिन्यां नगर्यां सञ्चरन्त एते कस्माच्चन सदनात् सम्भाषणध्वनि माकर्ण्य निभृतं तत्र गत्वा सश्रद्धं त मशृण्वन्। ततश्चाऽयं वृत्तान्तो विदितः - "कस्यचन गृहमेधिनः काचनदुहिता। सा तु यं जनं परिणेष्यति स द्रुतं मरिष्यति इति ज्योतिषसिद्धम्। इदं ज्ञात्वा न कश्चित्तामुपयेमे। अतिक्रान्तोद्वाहार्हवयस्काया एतस्या गृहे रक्षणेन लोकापवादः प्रसजेत्। अतोऽस्या हनन मेवोपाय इति तद्बन्धुभि र्निरणायि" इति।

कूरेशः परेद्यवि तद्गृहस्थितान् राजसभा मानाय्य रात्रौ युष्मद्गृहे प्रस्तुतान्सर्वानपि वृत्तान्तान् निवेदयतेति आदिदिशुः। ते यथावस्थित मुदन्तं

निवेदयामासुः । तदा श्रीवत्सचिह्नमिश्राः - "सङ्कटेभ्यः प्रजानां रक्षण मेव प्रभोः परमो धर्मः । अतो भवदीयां दुहितरं अहं परिणेष्यामि" इति प्रतिशुश्रुवुः । "हन्त ! किमेवं कर्तुमुचितम् ? एता मुदुह्य भवन्तो विपद्येरं श्चेत् का वा गती राज्यस्य ? को वा शरणमस्माकम्" इति वदतो कन्यका बन्धू नाक्षिप्य- "विपत्ति स्सुपरिहरा। विवाहस्य प्रयोजने द्वे - धर्मानुष्ठानं, पुत्रलाभश्च । प्रजोत्पत्तये शरीरसुख मपेक्षणीयम् । त दुपेक्ष्यगृहमेधिधर्मानुष्ठानाय केवल मेतां परिणेष्या मीति न काचि द्विपत्तिः शङ्कनीया" इति तां परिणिन्युः । साऽपि साध्वीमतल्लिका पतिमति मनुरुन्धाना वैषयिकेभ्यो जुगुप्समाना सद्भक्तिवैराग्ये वर्धयन्ती आण्डाळ् इति स्वीया मभिख्यां अन्वर्थयन्ती सुख मुवास । 'करणेषु मन्त्री' इत्युक्तरीत्या भर्तुरपि शास्त्रार्थसंशयां स्तदा तदाऽपनुदन्ती वैभवोदारा दारा इति प्रथते स्म ।

## निष्ठातिशयः

सम्पत्समृद्धा एते कूरनाथाः यति राजपादकमलसमाश्रयणा त्पूर्वं स्वनगरे निवसन्तः महोत्सवसमयेष्वपि देवाधिराजं सेवितुं काञ्चीपुरी मगच्छन्तः अतिथिसमाराधन मेव श्रद्धयाऽऽचरन्तः वेश्मन्येवाऽवर्तन्त । वरदराजवैशाखोत्सवसिसेविषया विप्रकृष्टा दुत्तरदेशा दागतौ द्वौ श्रीवैष्णवौ कूरेशगृहे आराधितौ सुष्ठु भुक्त्वा वरदराजालयं ययतुः । गरुडवाहनोत्सव-दिनेऽपि सेवार्थमनागतान् श्रीवत्सचिह्नान् विज्ञाय तौ देशान्तरीयभागवतौ - "बहु योजनान्तरितदेशात् भक्ताः बहुं व्ययं प्रयासञ्च अगणयित्वा आगत्य गरुडारूढं देवराजं सेवन्ते । कूरेशा स्तु स्वके गेहे एव सुखमासते किल" इति तत्र किञ्चिदिवानादरबुद्धिं वहन्तौ तौ यदा भगवत्सन्निधि मुपजग्मतुः तदा ताभ्यां देवराज स्साक्षात्कारं न ददाति स्म । अहो दौर्भाग्य मित्याक्रन्दन्तौ तौ मुमुहतुः । ततः कृपालु र्वरदः - "युवाभ्यां श्रीवत्साङ्के मनसाऽपराद्धम् । अत स्तत्सन्निधिं प्राप्य क्षमां याचतम्; तं प्रसादयतञ्च ।

अन्यथा युवयोः प्रत्यक्षदृश्यो न भविष्यामि" इति अर्चकमुखेन ता वादिदेश । तथैव तौ गत्वा श्रीवत्सचिह्नानां पादपद्मयोः छिन्नमूलाविवतरू निपेततुः । स भक्ति स्तुत्वा वृत्तमुदन्तं न्यवेदयताम् । ते च मन्दं स्मित्वा- "गच्छतं, स्वामी करुणामसृणैः कटाक्षपातैरनुग्रहीष्यति" इति सान्त्वयामासुः । तौ च निराबाधं हस्तिगिरिनाथं सेवित्वा तुतुषतुः ।

## सम्पत्परित्यागः - आचार्यपादाश्रयणञ्च

कूराख्यमहानगर्यां श्रीवत्साङ्कमिश्राणां प्रासादो महेन्द्रभवनं, कुबेरहर्म्यञ्च सम्पदा अतिशेते । एतद्दिव्यभवनकवाटतटघटित-किङ्किणिकानिक्वाणः एकयोजनान्तरितदेशस्थितैरपि श्रूयमाण आसीत् । तथा समृद्धिभाज एते प्रत्यहं भक्तान् साधून् निस्स्वान् अन्यांश्च बहुधा अन्नपानादिभिः पुष्णन्तः धार्मिकाग्रेसरा आसन् ।

प्रतिदिवसं भगवदालये श्रीहस्तिशैलशिखरोज्ज्वलपारिजातस्य वरदराजस्वामिनः रात्रिपूजाया मवसितायां पिहितयोश्च प्रधानद्वारमहा कवाटयोः, पश्चादेव एतदीयगृहकवाटपिधानं बहो रनेहसोऽनुवर्तमान मासीत् । कदाचिन्महोत्सवकारणेन रात्रिपूजायाः कालविलम्बोऽजायत । प्राप्तेऽपि नियतकाले कवाटे न पिनह्येते स्म । श्रीवत्साङ्कगृहपाला स्तु सन्निधिवृत्तान्त मजानन्तः प्रतिदिवसाभ्यासानुसारेण द्वारकवाटे पिनह्यन्ति स्म । तादात्विकः कवाटघण्टाध्वनिः योजनान्तरित प्रदेशस्थितवरदराज-स्वामिश्रवणयो रपतत् । तदा स देवः व्यजनवीजनकैङ्कर्यनिरतान् अन्तरङ्गदासान् काञ्चीपूर्णान् "रात्रिपूजामपरिसमाप्यैव कवाटे संवृते कुतः?" इति पर्यपृच्छत् । "ध्वनिरय मत्रत्यो न भवति श्रीवत्सचिह्नमिश्र हर्म्यवैभवातिशयोऽयम्" इति ते प्रत्यब्रुवन् । स्वामी मन्दं सिष्मिये । "श्रीवत्सचिह्नसम्पदाभोगोऽस्मानेवं भ्रामयामास ननु" इत्यवादीत् ।

आकर्ण्य चेदं देवराजकाञ्चीपूर्णसम्भाषणं स्वया दाम्भिकचेष्टया

लज्जिताः परमां विरक्तिं भजन्तः सकलविधां सम्पदं सत्पात्रे विनियुज्य देहयात्रार्थ मपेक्षितामल्पां सम्पदं रक्षन्तः सदाचार्यानुपाश्रित्य उज्जीवनाय प्रयतितव्य मिति निश्चिक्युः । विशिष्टाद्वैतमतस्थापकाचार्याः भगवद्रामानुजमुनयः हस्तिगिरिनाथपादकमलसन्निधाने सन्न्यस्य तिष्ठन्तीत्युपश्रुत्य, काञ्चीमेत्य, तच्चरणनलिने आश्रित्य, सम्प्रार्थ्य, तेभ्यः पञ्चसंस्कारा नधिगत्य, तदीयश्रीपादच्छायायां वसन्तः सामान्यशास्त्राणि, अध्यात्मशास्त्रं, सम्प्रदायार्थांश्च स्वय मधीयानाः अध्यापयन्तश्च सुपथि कालं क्षिपन्तः आसते स्म।

## श्रीरङ्गनगरयात्रा

एवं स्थिते कदाचित् श्रीरङ्गनाथस्य नियमनेन 'तिरुवरङ्गप्पेरुमाळ् अरैयर्' नामानः दिव्यप्रबन्धगायकाः श्रीकाञ्चीमागत्य दिव्यगानेन देवाधिराजं प्रीणयन्ति स्म। ततो वरदः "वरं वृणीष्व, दास्यामि" इति कृपया प्रतिशुश्राव। गायकाः "श्रीरङ्गनाथसन्निधिसमृद्धये भगवद्रामानुजा अनुग्राह्याः" इति ययाचिरे । "हन्त ! वञ्चितोऽस्मि गायकेन । अपह्रियमाणदिव्यरत्नो भवामि" इति मानसे खिद्यमानोऽपि देवराजः लक्ष्मणमुनीन् श्रीरङ्गं प्रेषयामास। श्रीवत्साङ्काः तै र्वियुज्य स्थातुं प्राणान् धर्तुमप्यप्रभवन्तः आचार्यैस्साकं श्रीरङ्गनगर मापुः।

## चरमश्लोकार्थलाभः

भगवद्रामानुजाचार्याः गोष्ठीपूर्णानां श्रीपादसन्निधौ स्थित्वा प्रयस्य चरमश्लोकरहस्यार्थानधिगम्य पुनर्मठं प्रत्याजग्मुः । तदा श्रीवत्साङ्काः स्वामिसन्निधौ प्रणम्य तूष्णीं तस्थुः । तदानीं भगवद्रामानुजाचार्याः - "पश्य, वत्स, गोष्ठीपूर्णाः मह्यं रहस्यार्थानुपदिश्य - "कस्मैचि-दप्यनुपदिशन् रहस्यार्थान् रक्ष" इति मा मादिदिशुः । तदाऽहं "परम भागवतशिखामणये एकस्मै श्रीवत्साङ्काय अनुपदिश्य स्थातुं न शक्नोत्येष दासः" इति व्यजिज्ञपम्। तदा "श्रोतु मधिकारिणेऽपि तदीयाध्यवसायं

बहुधा परीक्ष्य, एकं वत्सरं तदीयशुश्रूषाञ्च प्राप्य तस्मा उपदिश'' इत्यस्मदाचार्याः सम्मतिं प्रादुः'' इत्यकथयन् । आर्ता एते कूरेशाः "चपलाया अपि चञ्चलमिदं शरीरम् । एकं वत्सर मिदं स्थास्यतीति को विश्वासः? तावदज्ञात्वा विशेषार्थान् आत्मानं धर्तुं न शक्नोमि'' इति विचिन्त्य, 'आचार्यभवनाङ्गणे एकमासव्यापी उपवासः एकवत्सरमितायाः शुश्रूषायाः समः' इति शास्त्रमर्यादा मनुरुध्य, उपोष्य तानर्थानविन्दन् ।

## सौवर्णं भाजनमपास्तम्

भगवद्रामानुज पादपद्मयुगली निरन्तरानुचिन्तन प्रवणधिषणाः परमैकान्तिनः आचार्यदेवताः श्रीवत्सलाञ्छनाः शरीरधारणमात्रा-पेक्षितामल्पां सम्पदं स्वदेशे तदवधि रक्षन्तोऽपि, अद्यत्वे तावन्मात्रसम्पद्योग मपि स्वरूपविरुद्धं मन्यमानाः, स्वाचार्याभिमत्या अवशिष्टं सर्वस्वं भागवतव्रजत्रा कृत्वा, सर्वात्मना स्वस्य सदृश्या धर्मपत्न्या आण्डाळ् नाम्न्या सार्धं काञ्चीदेवाधिराज मङ्गलाशासनं विधाय श्रीरङ्गनगर्यै प्रतस्थिरे । मध्येमार्गं मधुरान्तक पुरपरिसरेषु तयो र्गच्छतो स्सतोः सा देवी 'बिभे' मीत्याचक्रन्द । तच्छ्रुत्वा श्रीवत्साङ्काः "अङ्के स्थापितः खलु(धन) भारो भीत्यै भवेत् । किं यत्किञ्चिद्रक्षसि?'' इति ता मपृच्छन् । "आम् । त्यक्त्वा सर्वमपि, भवतां पत्ररूपं भोजनपात्र ममृष्यन्ती, भवदीय मेकं सौवर्णं भोजनपात्रं रक्षामि'' इति पतिदेवता सा कर्णे शनैर्न्यवेदयत् । तदा ते तस्या स्तदाच्छिद्य लतागुल्मे अपास्य स्वस्थस्वान्ता अजनिषत । ततः स्वाचार्येभ्योऽभयप्रदातारं मधुरान्तकपुरवरवर्तिष्णुं विष्णुं तटाकरक्षादीक्षितं समाराध्य 'सुफलित द्वयोऽय मद्वयः प्रदेशः' इति तत्रस्थं देवं सेवित्वा मार्गवशात् प्राप्तानि दिव्यक्षेत्राणि निखिलानि सेवमानाः श्रीमच्छ्रीरङ्ग मधिगम्य तत्र यथापुरं आचार्य चरणनलिन सेवनजीवनाः सानन्द मासाञ्चक्रिरे ।

## श्रीरङ्गामृतकवयः संस्कृताः

तदात्वे श्रीरङ्गदेवायतनपरिजनानां निर्वहणाधिकृतः तिरुवरङ्गत्तमुदनार् नामा कश्चिद्भागवतः श्रीरामानुजाचार्याणां सन्निधि मेत्य 'पापानामाकरोऽस्मि। भगवतस्सर्वात्मना शेषोऽहं यथा स्याम्, तथा मां संस्कर्तुं कञ्चन सात्त्विकं भक्तं तत्र भवन्तो नियुञ्जन्तु" इति ता न्प्रार्थयामास। तदा लक्ष्मणमुनयः कूरनाथ माहूय - "एते अस्मत्समस्तसुखैकहेतोः श्रीरङ्गेशितुः श्रीकार्यप्रणयिनः। एतेषु दोषा नगणयित्वा, एता ननुवर्त्य, अनुकूलान्विधाय ममान्तिकं प्रापय" इत्यादिश्नन्। श्रीवत्साङ्काश्च आचार्यदेशानुसारं तं सम्यगाहितसंस्कारं गुरुभ्यो निवेदयन्ति स्म। ते च अमृताचार्यान् कूरेशपदाश्रिता नेव विदधिरे। एते च स्वाचार्यान् श्रीवत्सलाञ्छनान् "वाचा मगोचर यशोविशालानां उल्लङ्घित विप्रलम्भक त्रिमदावटानां अस्मत्कुलस्वामिनां कूरनाथानां श्रीपादा वाश्रित्य पश्चात् ..." इति कूरेशान् श्रीरामानुजशतान्तादिप्रबन्धेऽश्लाघन्त।

कूरनाथचरणान्तरङ्गभक्तेषु अमृतार्येषु कूरेशसन्निधौ दर्शनग्रन्था नधीयानेषु, तेषां जननी बत ! आचार्यचरणा वाशिश्रिये। दशाहकैङ्कर्येऽतिक्रान्ते "एकाहे निमन्त्रणाय कश्चित् श्रीवैष्णवः नियोज्यः" इत्यमृता चार्याः भगवद्रामानुजाचार्यान् ययाचिरे। यति राजैश्च "तदर्थं त्वं गच्छ" इति निमन्त्रिताः कूरेशाः प्रफुल्लमुखा एव निमन्त्रण मङ्गीचक्रुः। अमृताचार्याः आचार्याणां महौदार्यं, आत्मनो भाग्यञ्च प्रशंसन्तः प्रणामपुरस्सरं श्रीवत्साङ्कान् एकाहश्राद्धे योजयित्वा स्वीयं सर्वस्वं तदीयं निश्चिन्वानाः अपरिमितं धनं ददति स्म। कूरेशाश्च वात्सल्येन तद्धनं स्वीकृत्य गच्छन्तः पथि सर्वं धनं विनिकीर्य, स्नात्वा कावेर्यां धृतोर्ध्वपुण्ड्राः यतिराजपदकमलयोः प्रणेमुः। "क्वतल्लब्धं धनम्?" इत्याचार्यैः पृष्टाः "अनर्थहेतु रर्थो नष्टः" इति भूतं वृत्तान्तं निवेदयामासुः! "अहो ! व्यक्ति विरक्तिवैलक्षण्यम्" इति भृशं मुनीन्द्रा मुमुदिरे।

नियमनान्तरार्थं स्त्वयम् - श्रीरङ्गनाथालय प्रधानकवाटकुञ्चिका अमृताचार्याणां वशेऽवर्तत । तां स्वहस्तगतां कर्तुमेव मादिशन् स्वशिष्यवर्यान् - "यावद्भोजयिता कुञ्चिकां न दद्यात् तावत् 'सकलं सम्पूर्ण'मिति मा प्रतिब्रूहि" इति। श्राद्धकर्तारः भुक्त्यनन्तरं "(किं) सकलं सम्पूर्णम् ? इति निमन्त्रितान् पृच्छेयुः । एते च 'सकलं सम्पूर्ण'मिति प्रत्युत्तरयेयुः इति परिपाटी । प्राप्ते एव प्रतिवचने श्राद्धपूर्तिः स्यात् । श्रीवत्साङ्काश्च गुरूणा मभिप्रायं विदित्वा तदनुगुणं व्यवहृत्य अमृताचार्येभ्यः कुञ्चिका मासाद्य स्वाचार्येभ्य स्समार्पयन् । संयमिसार्वभौमाश्च तां कुञ्चिकां शेवधिलम्भं लब्ध्वा श्रीरङ्गनाथसन्निधिकैङ्कर्याणि तथा परिचस्कारिरे, यथा अद्याऽपि आसेतुशीताचलं "रामानुजार्यदिव्याज्ञा वर्धता मभिवर्धता"मिति अनुदिन माम्नायते।

## मेधाविभवः

भगवद्रामानुजाचार्याः ब्रह्मसूत्राणां भाष्यं विरचय्य यामुनाचार्याणां हृदयस्थिता मतृप्तिं परिहर्तुकामाः भगवद्बोधायन प्रणीतां वृत्तिं लिप्सन्तः काश्मीरदेशे शारदापीठे स ग्रन्थो रक्ष्यमाणोऽस्तीति विदितवन्तः साकं श्रीवत्साङ्कैः यात्राक्रमेण काश्मीरा नगमन् । विज्ञातस्वीयवैभवात् सरस्वती भाण्डागाराधि कृतात् तं ग्रन्थ मुपलभ्य प्रथमाध्यायं कटाक्षयन्ति स्म । कूरनाथा स्तु द्वितीयाध्याया दान्तं पठित्वा विषयं कृत्स्नं स्वमेधायां दधुः । असूयुभि र्मतान्तरीयैः प्रेरितः ग्रन्थालयाधिकृतः तं कोशं निजुगूहः दुर्लभयति स्म च । आचार्याः प्रथमाध्यायानन्तरो ग्रन्थभागः न दृष्ट इति भृशं चिक्लिशिरे। छात्रास्तु "यदि मां गुरवो नियमयन्ति दासो वृत्तिग्रन्थं पङ्क्तिशो निवेदयिष्य"तीति वदन्तः तान् असाधारण स्वमेधामहिम्ना विस्मयाम्बुधौ निमज्जयामासुः ।

## श्रीभाष्यरचनोपक्रमः

"अरण्यवासे सदृशं सकल मुपचारं काले काले समाचरन्तं मनुजं दृष्ट्वा चक्रवर्ति श्रीकुमारः 'भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण। त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम' इति वदन्, कैङ्कर्यधुरन्धरे लक्ष्मणे जाग्रति आत्मानं पितृमन्त मेव मेने। तथाऽहमपि मेधा धृतवृत्तिग्रन्थे त्वयि सति ग्रन्थो नष्ट इति न खिद्ये, हस्तगत इत्येव ह्लादे" इति श्रीभाष्यकाराः स्वच्छात्रा नभ्यनन्दन्। अथ सशिष्या आचार्याः श्रीरङ्गं प्रत्यावबृतिरे। ततः श्रीभाष्यनिर्माणाय कृतसङ्कल्पाः भगवद्रामानुजाचार्याः श्रीवत्सचिह्नान्वीक्ष्य "समग्रा बोधायन वृत्तिः न मया प्रत्यक्षिता। अतो मद्भाष्ये जातुचिद्वृत्तिविरोधः प्रसजे दपि। तदा स विरोधो मह्यं सूचनीय" इत्यवादिषुः। श्रीवत्साङ्का स्तु "सर्वज्ञै स्तत्र भवद्भि रेवं न वक्तव्य" मिति ब्रुवन्तः तथाकर्तुं न सम्मेनिरे। तदाऽऽचार्याः "वृत्तिविरोध स्त्वया यदि लक्ष्यते तदा अलिखन् जोष मा स्व" इति कञ्चन नियम मकल्पयन्। तथैवाऽन्वतिष्ठन्नन्तेवासिनश्च। एवं शिष्यसहाया यतिराजाः श्रीभाष्यं परिसमापयामासुः। भावज्ञेनेति पूर्वोक्तश्लोक मनुस्मरन्तः, अनुवर्तमानेषु श्रीवत्सचिह्नमिश्रेषु यामुनाचार्यानितः परमपद मितान् नाऽमंसत। रक्षार्थ मन्तिके वसत एव तान् मेनिरे। अभिननन्दुश्च छात्रवत्सलाः स्वान्तेवसतां मेधावैदुष्ये।

## श्रीगोष्ठीपूर्णशुश्रूषा

भगवद्रामानुजाधिष्ठिताया मुभयवेदान्तग्रन्थ कालक्षेपगोष्ठ्यां प्रवर्तमानायां - "ज्ञान मानन्द श्शेषत्वञ्च आत्मनो निरूपकधर्मा इति आम्नायते। तेषु अन्तरङ्गनिरूपको धर्मः को वा ?" इति जिज्ञासायां प्रस्तुतायां सर्वज्ञा अपि यतीन्द्राः 'विषयोऽय माचार्यमुखेन प्रकाशनीयः' इति मत्वा "अयि, श्रीवत्साङ्क श्रीगोष्ठीपुरं गत्वा विदितवेदितव्यः प्रत्यागच्छ" इति श्रीवत्साङ्कान् न्ययुञ्जन्। अमी च गोष्ठीपूर्णसन्निधौ,

प्रणम्य रामानुजसन्देशं संश्राव्य षण्मासान् समाधानाय प्रतीक्षाञ्चक्रिरे। गोष्ठीपूर्णास्तु नाऽन्वगृह्णन्। श्रीवत्साङ्काश्च "आचार्यान्नत्वा पुनरागमिष्यामि" इति निवेद्य प्रस्थातुकामा अभवन्। तदा गोष्ठीपूर्णाः श्रीवत्साङ्का नाहूय अज्ञान मपोहितुं क्षमे ज्ञानेऽनुगृहीते प्राप्तवन्तः आळ्वार् महाभागाः "अडिये नुळ्ळान्" (दासान्त र्विद्यमानः) इति यदूचु स्तां रीतिं किं त्वं जानीषे ?" इत्यप्राक्षुः। कूरेशाः "धन्योऽस्मि" इति वदन्तः स्वनगराय प्रतिप्रतस्थिरे।

अत्राऽभिसन्धिरयम् - श्रीमुखसूक्त्यां अष्टमशतके अष्टमदशके 'कण्गळ्शिवन्दु' इति प्रथमा गाथा, 'अडियेनुळ्ळान्' इति द्वितीया गाथा च श्रियःपत्युस्स्वरूपं निरूपयतः। तत्र 'अडियेनुळ्ळान्' इति द्वितीय-गाथास्थप्रथमविशेषणेन परमात्मनः जीवात्मनि अनुप्रवेशं प्रतिपिपादयिषन्तः वकुलाभरणमुनयः 'आत्मनि तिष्ठ'तीति वा, 'मयितिष्ठ'तीति वा अनुक्त्वा भगवन्तं दासान्त स्तिष्ठन्त मूचिरे। अत एतज्ज्ञातं भवति यत् दासशब्देनैव आत्मनो बोधनात् आत्मनः दासत्व (शेषत्व) मेव मुख्यतमो निरूपकधर्म इति।

## पौराणिककैङ्कर्यलब्धिः

कस्मिंश्चन दिवसे चण्डातपवेलायां एकाकिनो भगवद्रामानुजाचार्याः अमृताचार्यसदन मासेदिवांसः "उग्रातपवेलायां किमर्थोऽयं भवदागमः?" इति सप्रणामं तै रनुयुक्ताः, "पौरोहित्याय भवद्भ्यः परिकल्पितं केदार मस्मभ्यं भवन्तः प्रददतु" इत्यूचिवांसः "महानयं प्रसाद" इति मन्यमानै स्सानन्दममृताचार्यैः सहिरण्य सलिलपूर्वकं क्षेत्रं श्रीवत्सचिह्नमिश्रोद्देशेन प्रदत्तं प्रतिजगृहुः। (अत्र पौरोहित्यं नाम श्रीरङ्गेशसन्निधौ पुराणपठनाख्यं कैङ्कर्यं, वेदविज्ञापनम्, पञ्चाङ्गश्रवणम्, श्रीमज्जनगद्यपारायणादिकञ्च।) ततो यतीन्द्राः पुरोहितकैङ्कर्ये नियुक्तैः कूरनाथैः तं दिवस मारभ्य श्रीरङ्गनाथस्वामिसन्निधौ पुराणविज्ञापनादिकृत्यं निर्वर्तयामासुः। इदञ्च

कैङ्कर्यं तत स्तत्पुत्त्रैः श्रीपराशरभट्टार्यैः, तदनन्तरं तत्पुत्त्रपौत्त्रादि परम्परया च अद्य याव न्निरुह्यत एव।

## मूकस्य सौभाग्यम्

भगवद्रामानुजाचार्याः कदाचित् कञ्चन मूकमाहूय, मठालये स्थापयित्वा द्वारकवाट मावृत्य, तस्मै स्वचरणौ चेष्टया दर्शयामासुः। स च विवेकी मूकः एतावेव श्रीचरणौ मम रक्षका विति विश्वस्य तौ शिरसा दधे। श्रीवत्सलाञ्छनाः कवाटरन्ध्रेण वृत्तान्तममुमभिवीक्ष्य "श्रीवत्साङ्को जनित्वा शास्त्राण्यभ्यस्य चाऽभ्रशम्। मूकोनाऽजनिषि" इति सशिरस्ताड मरोदिषुः किल।

## जीवानुकम्पा

अत्यन्तकोमलहृदयाः श्रीवत्सचिह्नमिश्राः शरीरबद्धा दयेत्यमन्यन्त। स्वल्पमप्यन्यदीयं क्लेशं न सेहिरे। परकीयां बाधा मुदीक्ष्य बहुवारं मुमुहुः। कदाचित्केन चिन्मार्गेण गच्छन्तः, केनचित्सर्पेण गृहीतं विरुवन्तं कञ्चनमण्डूक मशृण्वन्। "न जाने, कस्मै वा वेदयितुं अयं विरौति। बत! को वा श्रोष्यति" इति वदन्तो मुमूर्छुः। पुनरेकदा कस्मैचन प्रयोजनाय काञ्चन वृक्षवाटिका मगुः। तत्र अचिरा देव छिन्नपत्रात्कदलीवृक्षात् स्रवन्ती मश्रुधारा मिव जलधारां प्रेक्ष्य प्रमुह्य मह्या मपतन्। पुन रन्यदा कस्याञ्चनाऽबलायां कावेरीं गत्वा तत्र सम्भृतोदकं कलश मुद्धृत्य अवलग्ने धर्तु मप्रभवन्तीं साहाय्य मपेक्षमाणां आक्रोशन्तीं दृष्ट्वा कलश मुद्धृत्योपचक्रुः। एषा मनुकम्पासम्भृता एतादृश्यः कथा बह्व्य स्सन्ति।

## आत्मगुणपूर्णता

तेषु दिवसेषु तं देश मनुशासत् चोलप्रभुः वैष्णवद्रोही। ततस्स विष्णुप्रतिमा स्सर्वा उत्पाट्य दूरतो विक्षेप्तु मैच्छत्। तदा तच्छ्रेयोऽभिलाषिणः "समन्त्रं प्रतिष्ठापितानां देवता विग्रहाणां ध्वंसनेन

महा ननर्थोभवे'' दिति त मूचुः । तर्हि दैवीं शक्ति मुद्वास्य विग्रहा न्विनाशयामीति सङ्कल्प्य स चोलेन्द्रः कस्मैचन ब्राह्मणाय प्रभूतं धनं वितीर्य ''अदृश्याञ्जनं धृत्वा देवता उद्वासय'' इति त माज्ञापयामास। स च लुब्धः पापिष्ठः अदृश्याञ्जनप्रभावा त्परै रदृष्टः देवता उद्वास्य सागरे विक्षिपन्नाऽऽस्ते स्म । वृत्तान्त मिम माकर्ण्य ''बहोः कालात् श्रीरङ्गश्रीमदालयं रक्षन्तो वर्तामहे। आसुर वर्गो विजृम्भते। अवाच्य स्सोऽनर्थोऽस्यापि देवायतनस्य सम्भवेच्चेत्, किंवाऽस्माभिः कर्तव्य''मिति साकं स्वाचार्यै र्महापूर्णैः चिन्तयन्तो रामानुजार्या व्याकुलचित्ता आसन् । तदा महापूर्णाः - ''श्रीरङ्गनाथदेवालयपरिसरेषु एकवारप्रदक्षिणयात्रां कुर्वन्तं मा मनुसर्तुं शिष्ये ष्वन्यतमं नियुङ्क्ष्व। परन्तु मा मनुगच्छतोऽपि यस्य 'अह मन्य मनुव्रजा' मीति मनसि यथा न भासेत तथा छायेव मा मनुयातुं यस्य वा कौशल मस्ति, तादृश मेव विचिन्त्य नियुञ्जीथाः'' इति यतिराजा नवोचन्। ईदृशात्मगुणपरिपूर्णः श्रीवत्साङ्क एक एवेति सुष्ठु जानन्तोऽपि यतीशानाः महापूर्णमुखादेव शिष्यस्य योग्यता प्रकाशनीयेति सञ्चिन्त्य ''अत्र तादृशो गुणी छात्रो वर्तत इति नाऽह मूहे'' इति प्रतिवचन मदुः। तदा महापूर्णेषु ''श्रीवत्सलाञ्छनः कुतो न प्रेष्यते'' इति श्रीवत्साङ्कनियमन मभिलषत्सु, तदाऽऽकर्ण्य कूरेशाः ''महापूर्णाः विदिततत्त्वाः इयतां छात्राणां पुरतः इत्थं मा मनुजगृहुः खलु'' इति महानन्द मविन्दन्; तथैव ता नन्वगच्छंश्च।

## कुमारोदयः

अर्थिसात्कृतसकलार्थसम्पदः श्रीवत्साङ्काः भगवद्रामानुजपाद सेवाप्रसिताः उञ्छवृत्त्यैव जीविका मतिवाहयन्तः अश्वस्तनवृत्तयः सुखेनाऽवर्तन्त। कदाचित् महति वृष्टिपाते बहि र्निर्गत्य भिक्षा मटितु मपारयन्तः जलपानमात्रतृप्ताः ''अभुञ्जानस्य न मे बुभुक्षा भवति। येषु दिवसेषु श्रीमदष्टाक्षरीं न जपामि, निगमपुष्पैः भगवच्चरणौ नाऽऽराधयामि, ते एव मे उपवास दिवसाः। भुज्यमान मन्नं, पीयमान मुदकं, चर्व्यमाणं

ताम्बूलम् इत्येतत्सर्वं मम अस्मत्स्वामी श्रीकृष्ण एव'' इत्यध्यवस्यन्तोऽनश्नन्तोऽवर्तन्त। तस्यां त्रियामायां भगवन्निवेदनावसरे 'श्रीचिह्नध्वनिम्' (श्रीचिह्नं = काहलिकाविशेषः) आकर्ण्य तेषां पत्नी ''भवद्भक्ते उपवसति सति भवान् सानन्दं बहुविधान्यन्नानि भुङ्क्ते ननु'' इति श्रीरङ्गनाथ मुद्दिश्य मन स्यकरोत्। तस्या मानसीं वेदनां विदन् रङ्गपति स्सपदि अर्चकमुखेन देवालयकार्यनिर्वाहकं उत्तमपूर्णं (उत्तमनम्बि) आदिश्य तद्द्वारा विघसं पायसान्नं परिजनपरिबर्हैं स्साकं श्रीवत्साङ्क मिश्रेभ्यः प्राहिणोत्। कूरेशाः तस्मात्पायसात् स्वयं कञ्चनांशं स्वीकृत्य अपरं भागं स्वपत्न्यै प्रादुः। पुरा दशरथस्य स्वानुष्ठितपुत्रकामेष्ट्युपलब्ध दिव्यपायस प्रभावादेव चत्वारः पुत्रा जज्ञिरे। तथैवाऽद्य पायसमहिम्ना श्रीपराशरभट्टार्य इति वेदव्यासभट्टार्य इति च पश्चात्कृतनामधेयौ द्वौ कुमारा वजनिषाताम्।

## कूरेशराजसभाप्रवेशः

श्रीवत्सलाञ्छना भगवद्रामानुजाचार्याणां सहाया स्सन्तः दर्शननिर्वाहं कुर्वन्त आसते स्म। तदात्वे कुलोत्तुङ्गचोलाख्यः प्रभुः राजेन्द्र चोलपुरीं राजधानीं विधाय देशं शास दासीत्। अय मतिक्रूर श्शैवः। विप्रलम्भकानि मिथ्याभूतानि बाह्यशास्त्राणि परमप्रमाणभूतानि मन्यमानः विषयस्थान् सर्वा न्विदुषः सभां प्रापय्य ''शिवात्परतरं नाऽस्ति'' इति लेखनीय मिति ता न्निर्बध्नन्नवर्तत। राजदण्डभयात्केचनधनलोभात्केचिच्च तथैव चक्रुः। एवं स्थिते, नालूरान् नामा कश्चिद्राजवल्लभो वैष्णवः - ''प्रभो, अस्मद्रामानुजाचार्यै रङ्गीकृतस्यैवाऽङ्गीकृतत्वम्। अन्यदनङ्गीकृत मेव'' इति शासितुः कर्णे जजाप। अथ तत्क्षणे एव स रामानुजाचार्या नानेतुं भृत्या न्नियुङ्क्तेस्म। उदन्त ममुं ज्ञात्वा श्रीवत्साङ्काः राजसभाप्रवेशेन स्वाचार्याणा मापदमाशङ्कमानाः, स्वयमेव तद्वेषं धृत्वा नृपसभं प्रवेष्टुं निरणैषुः। भगवद्रामानुजाचार्येषु स्नानाय यातेषु धृततदीय काषायत्रिदण्डाः

महापूर्णप्रभृतिभि रनुगम्यमानाः कूरेशाः राजसदन मासेदुः। लक्ष्मणमुनीन्द्रास्तु त्रिदण्डादिक मन्विष्यन्तः गोविन्दभट्टनिवेदितभूतार्थाः धृतश्रीवत्साङ्क धवलपरिधानाः श्रीवत्सचिह्नमहापूर्णयो र्महतीं व्यापद माशङ्कमानाः, स्वरक्षापेक्षया स्वीयैः प्रार्थ्यमानाः अनिच्छन्तोऽपि तिरुनारायणपुरीं व्रजन्ति स्म।

अथ, सभां प्रविश्य प्रमुखे स्थितान् श्रीवत्सचिह्नमिश्रान् महापूर्णां श्च दृष्ट्वा स चोलेन्द्रः 'शिवात्परतरं नास्ति' इति लिख्यता मित्यादिदेश। कूरनाथा स्तदा असङ्ख्येयैः श्रुतिस्मृतीतिहासपुराणादिसमुद्धृतप्रमाणवचनैः श्रीमतो नारायणस्यैव परात्परत्वं प्रत्यपीपदन्। आग्रहयालु श्शैवप्रभुः "अवैमि, विदग्धा भवन्तः प्रतिभाप्रभावात् सर्वं साधयितुं प्रगल्भेरन्। परन्तु, मन्निदेशानुसार मेवाऽत्र लिखन्तु" इति निर्बध्नन् तालपत्रमदात्। श्रीवत्सलाञ्छनाः स्वीयाध्यवसायभङ्गं परिहरन्तः 'द्रोण मस्ति ततः परम्'' इति व्यलेखिषुः। 'शिवा त्परतरं नाऽस्ति' इति वदतः प्रभोः आशयस्तु रुद्र एव परं ब्रह्म, ततोऽन्यत्परमं नाऽस्ति इति। कूरेशास्तु वक्रोक्ति मास्थाय, श्लेषेण चमत्कार मावाह्य एवं समादधिरे। शिवः अल्पपरिमाणकं व्रीह्यादि मानपात्रम्। द्रोणन्तु बृहत्परिमाणक मन्यत्। अतः बृहत्परिमाणके द्रोणे जाग्रति शिवा दल्प परिमाणका दन्यत् अधिकपरिमाणकं मानपात्रं नाऽस्तीति वचन मनुभवविरुद्धम्। अतोऽसङ्गतमिदमित्यभिप्रयन्तः द्रोण मस्ति ततः परम्' इति निरदिशन्।

असह्यसपरिहासलेखन दर्शन सङ्क्रुद्धः चोलाधीशः महापूर्णाभिमुखो भूत्वा 'भवन्तो लिखन्तु' इति जगर्ज। तेऽप्याचार्याः श्रीमतो नारायणस्यैव सकलदेवता सार्वभौमत्वं सुष्ठु प्रत्यवाऽस्थापयन्। तदा क्रोधाविष्टो नरपालः आचार्य द्वितयनयनोत्पाटनं सद्योनिर्वर्तनीय मादिदेश। "धिक् ! पापिष्ठं त्वां दृष्टवती मच्चक्षुषी व्यर्थे; किं मम ताभ्यामिति निन्दन्तः स्वनखाग्रैरेव नयने विदार्य, उत्पाटये दूरे विचिक्षिपुः। ततो राजभृत्याः महापूर्णान् बला

दुत्खातचक्षुषो राजभवनद्वारान्निष्कासयामासुः। "दिष्ट्या ! मद्दर्शनाय दत्त दर्शनोऽस्मि" इति श्रीवत्साङ्काः ननन्दुः। वर्षीयांसो महापूर्णा स्तु बाधां तां सोढु मक्षमाः कुत्रचि त्केदारतीरे श्रीवत्साङ्काना मुत्सङ्गे स्व मुत्तमाङ्गं, तनयायाः अत्तुळाय् अम्बाया अङ्के चरणौ च निधाय यामुनाचार्यपादारविन्द युगलीं ध्यायन्तः वैष्णवं धाम ययुः।

ततः परान्तकपुराग्रहारात् आगताः श्रीवैष्णवाः महापूर्णानां चरमसंस्कारं निर्वर्त्य, अन्धान् श्रीवत्साङ्कान् दोला मारोप्य स्वीय मग्रहार मानीय कश्चित्कालं नेत्रबाधा परिहाराय चिकित्सां विधाय श्रीरङ्गं प्रापयामासुः।

अथ कदाचित् श्रीवत्साङ्काः श्रीरङ्गनाथालये महाबलिपीठं प्रणम्य महती मार्तिं प्रकटयन्तः 'महापूर्णा इव किमहं न स्वीकरणार्हः' इति विज्ञापयन्तः, आलये प्रवेष्टुं प्रयतमानाः 'रामानुजसम्बन्धिभिर्नान्तः प्रवेष्टव्य' मिति राजानुचरैः प्रतिहारभूमौ निरुद्धाः बहि रेवाऽवतस्थिरे। विदितकूरेशमहिमानः केचित्तत्रस्थाः "एते आचार्याः असाधारणात्म गुणपरिपूर्णाः, अतः प्रवेशयितव्याः" इत्यूचिरे। तथाऽपि "अहो ! बत ! महत्कष्टम् ! आचार्यसम्बन्धोऽर्हतां प्रतिषेधति, आत्मगुणस्तु साधयति। धिक् तं गुणम्। आचार्य श्रीपादसम्बन्ध एव मे पर्याप्तः" इति चिन्तयन्तः श्रीवत्साङ्काः देवालय मप्रविश्य तस्मिन्नेव दिने श्रीरङ्गवासं त्यक्त्वा श्रीवनाचलमहाक्षेत्रं (तिरुमालिरुञ्जोलै) गन्तुं प्रतस्थिरे।

भागवताग्रगण्याः वैष्णवदर्शनपारीणाः महाकवय श्चामी गच्छन्त एव पथि मनोव्यथाविनोदाय श्रियःपत्युः स्वरूपगुणविभूतीः अनुसन्दधानाः श्रीवैकुण्ठस्तवातिमानुषस्तवाख्ये अद्भुतार्थे द्वे स्तोत्रे रचयन्त एव श्रीवनगिरिमन्दिर मगच्छन्। श्रीवत्साङ्कै रनुगृहीतेषु पञ्चसुस्तवेषु श्रीवैकुण्ठस्तवः प्रथमः। अत्र परवासुदेवस्य स्वरूपगुण-विभूतयः सम्यगन्वभाविषत। अतिमानुषस्तवः तै रनुगृहीतः द्वितीयः। अयं

विभवावतारान् अनुसन्धाय अनुभवितु मुद्दिष्टः । अत्र रामकृष्णावतारौ विपुलतया नरसिंहावतारः संक्षेपेण च अनुसंहितः । शब्दार्थ सौन्दर्ये, भावगाम्भीर्ये सङ्घटनासान्द्रतायाञ्च स्तवोऽय मनुपम इति संस्कृतवाङ्मयाम्बुधे रुदितेषु स्तवरत्नेषु उत्कृष्ट मिदं रत्न मिति च विद्वद्रसिकै रभिष्टूयते।

इत्थं स्तवद्विक मनुगृह्य श्रीवनगिरि निलयस्य सुन्दरबाहो र्भगवतः दिव्यमङ्गलविग्रह सौन्दर्यामृतपूरे मज्जंमज्ज मनुभूय अनुभवपरीवाहरूपं दीर्घतरं सुन्दर बाहुस्तवं प्रबबन्धुः । स्तोत्रावसाने 'हे वनगिरीश्वर मम विज्ञापना मङ्गीकुरुष्व। अहं यथापुरं रामानुजाचार्यविधेयः परिवर्तिषीय। हे करुणासागर, योग्यता रहिता नुत्सार्य साधुकृतानपराधान् क्षाम्यन् श्रीरङ्गधामश्रियं सदा भक्तभोग्यां कृषीष्ट। श्रीरङ्गनगरे आसुरी शक्ति र्नश्यतु' इति 'श्रीभगवद्रामानुजपादच्छायायां सुखेन आसिषीय' इति च प्रार्थयामासुः । अत्रान्तरे पापिष्ठश्चोलराजः कृमिजुष्टकण्ठव्रणेन अत्यर्थपीडितोऽम्रियतेति आकर्ण्य श्रीवत्साङ्काः सुन्दरबाहु मनुज्ञाप्य पुनः श्रीरङ्ग मेव प्रत्यपद्यन्त।

## यतिराजानां श्रीरङ्गं प्रत्यागमनम्

कुलोत्तुङ्गचोलोपप्लवेन प्रोषिताः तिरुनारायणपुर्यां स्थिताः यतीन्द्राः आगन्तुकवैष्णवमुखेन कूरेशानां महापूर्णाचार्याणा ञ्च व्यापदमाकर्ण्य भृश मुद्विग्नाः, 'अन्ततः श्रीवत्साङ्को वा प्राणिति' इति किञ्चिदाश्वसन्तः किङ्करं कञ्चन वृत्तान्तं वेदितुं श्रीरङ्गं प्रेषयामासुः । स च द्रुतं गत्वा 'चोलेन्द्रः क्रिमिजुष्टकण्ठव्रणेन मृत' इति विदित्वाऽऽगत्य यतिराजेभ्यो वार्ता मेतां निवेदयामास। आकर्ण्य चैतत् प्रमुदिता स्संयमीन्द्राः सत्वरं श्रीरङ्ग मेत्य श्रीवैष्णवैस्सार्धं श्रीवत्साङ्कानां गेहं जग्मुः । ते चाऽऽचार्याणा मागमनमुपश्रुत्य, अभ्युत्थाय, समूल मुद्धूतो द्रुम इव स्वगुरुचरणयो र्निपत्य तौ सादर मगृह्णन्। रामानुजाचार्याश्च श्रीवत्साङ्कान् समाश्लिष्य शोकावेगेन

स्तम्भितकण्ठाः द्रुतस्वान्ताः सगद्गदमाक्रन्दन्तः "एहि, श्रीवत्साङ्क, अस्मद्दर्शननयनायमानस्य तव नयने नष्टे। इदं सर्वं मदीयपापफल मेव" इत्येवं बहु विलप्य शिष्यञ्च समाश्वास्य मठालय मनैषुः।

## वरदराजस्तवाविर्भावः

परेद्यु र्वनगिरिक्षेत्रे, कूरेशै रचितं स्तवत्रयं तन्मुखत एव समाकर्ण्य सन्तुष्टा आचार्याः श्रीवत्साङ्कान् प्रति "भवत्सूक्तिप्रभावादेव ननु श्रीरङ्गश्रियः उपप्लवः परिहृतः, वयञ्च सुखिनो वसामः। अभिमताधिक-दानरसिकः भगवान्वरदराजः श्रीकाञ्च्यां भक्तजनेभ्य स्तिष्ठते। 'दासस्य मे नयने प्रसादय' इति प्रार्थयमानः तस्मै स्तोत्रमेकं विज्ञापय" इति निरदिशन्। परन्तु निरीहाणा मग्रेसराः श्रीवत्साङ्काः "मम चक्षुषी अनपेक्षिते" इति प्रत्यब्रुवन्। वत्सला मुनीन्द्राः "वरदराजाय किञ्चित् स्तोत्र मवश्यं निवेदनीयम्" इति निरबध्नन्। आचार्याणां निदेशं प्रतिगृह्य श्रीवरदराजस्तवमारभ्य "नीलमेघनिभ मञ्जनपुञ्जश्यामकुन्तल मनन्तशयं त्वाम्। अब्जपाणिपद मम्बुजनेत्रं नेत्रसात्कुरु करीश सदा मे" इति श्लोकपर्यन्तं सन्दृभ्य 'भवन्तं सदा सेवितुं आनन्दितुञ्च उचिते अप्राकृतनेत्रे मह्य मनुगृहाण" इति व्यजिज्ञपन्। तस्यां निशि स्वप्ने पुरतः प्रादुर्भूय देवराजः "यथाऽभिलषितमदाम्" इति जगाद। श्रीवत्साङ्काः सन्तुष्य, प्रातरुत्थाय, आह्निक मनुष्ठाय, आरब्धं स्तवं परिसमाप्य, आगत्य यतिराजेभ्यः स्वाप्निकोदन्तं निवेद्य 'नीलमेघनिभ' मिति श्लोक मगायन्। शृण्वन्तो रामानुजाचार्याः "स्तवमेन माकर्ण्य देवाधिराजः नेत्रे अप्रदाय न तिष्ठेत्। तव चक्षुषी प्रदर्शय" इत्यवोचन्। "अप्राकृतनेत्रदानमेव स्वप्ने भगवन्त मयाचिषम्" इति शिष्योदीरितं श्रुत्वा लक्ष्मणमुनीन्द्राः "मैवं तावत्। देवराजसन्निधिमेत्य संसेव्य सम्प्रार्थ्य प्रत्यागमिष्यावः, एहि" इति सशिष्याः काञ्ची मयासिषुः।

# उद्वेलदयालुता

यथासङ्कल्पं काञ्च्यां वरदराजसन्निधौ श्रीवत्सचिह्नेषु स्तवं विज्ञापयत्सु, भगवद्रामानुजाचार्येषु च प्रदक्षिणप्रवणेषु किञ्चि द्व्यापारान्तरव्यापृतेषु, आकर्णिताद्भुतस्तवो वरदराजः प्रादुर्भूय 'वाञ्छितं वरय' इत्याबभाषे। श्रीवत्साङ्का स्तु श्रीरामानुजाज्ञानुसारेण दृष्टिं न ययाचिरे। "मया लभ्यमानं पुरुषार्थं नालूरान् नामाऽपि लभताम्" इति प्रार्थयन्त। भगवद्रामानुजाश्रयणेन स्वस्य सद्गतिं निश्चित्य द्रोग्धु रपि तस्य सा भूयात् इत्याशासानानामेषां अहो ! उदारतायाः पराकाष्ठा ! चोलदेशप्रभो र्निकटवर्ती नालूरान् नामाऽय मेव महापूर्णानां निधनै, कूरनाथानां नेत्रवैकल्ये भगवद्रामानुजार्याणां देशान्तरप्रवासे च निदानम्। असह्यापचारकर्तु रतिनृशंसस्याऽस्य नरकप्राप्ति स्सिद्धा। तथाऽपि वैष्णवकुलोद्भवस्याऽस्य विनिपातो मा भूदिति तस्योद्दिधीर्षया कारुणिकाः कूरेशाः तथा वर मवृण्वन्। जिघांसो रप्युज्जीवन मभिलषतां श्रीवत्साङ्कानां दयालुता अहो ! अवधी नवधीरयति।

देवाधिराजोऽपि कूरेशप्रार्थनां स्वीकृत्य 'तथैवाऽस्तु' इत्यनुजग्राह। श्रुत्वैत दुःखिता रामानुजाचार्याः देवराजं दृष्ट्वा "भगवन् मदीयोऽभिलाषो न पूर्णतां गमितः" इति, शिष्यं प्रति "स्वतन्त्रो भूत्वा मत्सङ्कल्पं नाऽन्ववर्तिष्ठाः" इतिचोदीर्यखिन्नमानसाः, भग्नमनोरथा श्चाऽवर्तिषत। ज्ञात्वेमं वृत्तान्तं वरदराजः "मदीय रामानुज, मा क्लिश्यस्व। त्वां माञ्च श्रीवत्साङ्कोऽयं चर्मचक्षुषा द्रक्ष्यति" इति वरं ददे। तदा कूरेशाः भगवन्तं वरदराजं मांसचक्षुषा पश्यन्तः दिव्याभरणानि, दिव्यवसनानि, दिव्यमङ्गलविग्रहञ्च सप्रत्यभिज्ञं निर्दिशन्तः, स्वाचार्यांश्च तथैव अवयवशो निध्यायन्तोऽनुबभूवुः। रामानुजाचार्यास्तु सन्तुष्य सशिष्याः श्रीरङ्गं प्रति प्रातिष्ठन्त।

कदाचित् केचन श्रीवैष्णवाः सम्भूय कूरनाथसन्निधि मुपगम्य 'न केवलं तत्र भवतां, अपि तु अस्मद्दर्शनस्यैव घोर मपकारं कृतवतः

असह्यापचारकर्तुः निर्दयदण्डनार्हस्य नालूरान्नामकस्याऽपिकृते देवराजान्मोक्षं भवन्तः प्रार्थयामासुः किल। कि मेतदुचितम् ?'' इत्यतृप्ताः पर्यपृच्छन्। ''पापिष्ठाः खलु दयार्हाः'' इति श्रीवत्साङ्काः समादधिरे। ''जिघांसू नपि रिपून् संरक्षितुमेव कृतसङ्कल्पा एते श्रीवत्साङ्कमिश्राः स्वाचार्येभ्योऽपि गुणवत्तराः'' इति तान् श्रीवैष्णवाः श्लाघन्ते स्म।

## शिष्यानुकम्पा

श्रीवत्साङ्काना मन्तेवासिष्वन्यतमः पिळ्ळैपिंळ्ळैयाळ्वान् सम्पदाभिजात्यादिप्रयुक्तेनाऽहङ्कारेण भागवतेषु विनयलोपा दपचरन्नाऽऽसीत्। भ्रंश हेतु मेतं मद मपोहितुं समकल्पन्त श्रीकूरेशाः। एकस्मिन्पुण्ये दिवसे बहुषु जनेषु अन्नस्वर्णवसनादिदानानि कुर्वत्सु, कूरनाथाः स्नातं शुचिं पिळ्ळैप्पिळ्ळैयाळ्वान्नामकं शिष्य मुपेत्य स्वयं किञ्चिद्दानं ययाचिरे। ''तत्र भवतां चरमावधिदासोऽहम्। मदीयं सर्वं भवदीय मेव'' इति ब्रुवन्तं शिष्यं ''विलक्षणं वरदानं याचेऽहम्। 'करणत्रयेणाऽपि भागवतापचारं न करिष्या' मीति प्रतिजानीहि'' इत्यादिशन्। स तथेति प्रति शुश्राव। अथ स कदाचि त्पूर्ववासनावशेन भागवतापचारं कृत्वा पश्चात्तप्तः आचार्येभ्यो मुखं दर्शयितु मप्रभवन् गृहे केवलं विलिल्ये। शिष्यवत्सलाः संस्कारपरायणाः छात्रस्य सदनं स्वय मीयुः; अप्राक्षुश्च वृत्तान्तम्। पिळ्ळैपिळ्ळैयाळ्वान् आचार्यचरणा वाश्लिष्य रुदन् ''मनसा वाचा कर्मणा च भागवतापचारः परिहर्तव्य इति दृढं सङ्कल्प्याऽपि तथा कर्तुं नाऽशकम्। किमनेन दग्धशरीरेण किल्बिषकलुषेण? निष्कृतिमतीतः किमहं करवाणि'' इति विषीदति स्म। आचार्यास्तु 'पश्चात्ताप एवोत्तमं प्रायश्चित्तम्' इति निश्चिन्वानाः ''मानसिका नपचारान् यतीन्द्राः क्षमिष्यन्ते। राजदण्डभीत्या शारीरिकापराधः परिहर्तुं शक्यते। अतः वाचिकापराधविषये परं जागरूकेण भूयते चे दलम्'' इति हित मुपदिशन्ति स्म।

# पिता आचार्योऽप्यजायत

भगवतः श्रीरङ्गेशस्यानुग्रहेण कूरनाथानां द्वौ पुत्रौ अजनिषातामिति ननु ज्ञातपूर्वम् । तयोरवतारेण भृशं प्रमुदिता भाष्यकारा स्स्वान्तेवासिनः कूरेशनिकेतनं प्राप्य प्रधानच्छात्रं गोविन्दभट्टं (एम्बार्) प्रति 'तनयावानय' इत्यभाणिषुः । स च कुमारावानयन् तयो र्दृष्टिदोषादिपीडां परिहर्तुकामः द्वयाख्यं मन्त्ररत्नमनुसन्दधानः मङ्गलानि आशंसमानश्च भगवद्रामानुजाचार्येभ्यः तौ प्रादर्शयत् । मुनीन्द्राश्च शिशू पश्यन्तः तयो र्दिव्यतेजसा विस्मयमानाः करुणामृतकूलमुद्वहाभ्यां नयनाभ्यां ता वभिषिञ्चन्तः "गोविन्द, कथमेतयो स्सकाशात् 'द्वय' सौरभं परिव्याप्नोति । किं वा कृतं त्वया?" इत्यनुयुञ्जते स्म । गोविन्दभट्टे च "द्वयमन्त्रेणैतयोः रक्षा पर्यकल्प्यत" इति प्रतिवदति, यतिराजा स्सन्तुष्टाः "एतयो रुज्जीवनाय उपाय मन्विष्ट वां स्त्वमेव एतयो राचार्यो भवितु मर्हसि" इति न्ययुञ्जत । एवं गोविन्दभट्ट एव तयोः कुमारयो राचार्यः समपद्यत । अत एव भगवद्रामानुजाचार्याः, गोविन्दभट्टाः, पराशरभट्टार्याः, नञ्जीयर् महाभागा इति आचार्यपरिपाटी सम्प्रदायसिद्धा बभूव । एवंस्थिते कूरेशानामपि गुरुपरम्पराया मनुप्रवेशोऽजनिष्ट । कूरनाथाः श्रीमुखसूक्तिं अध्यापयन्त आसन् । तदा 'एण् पेरुक्कु अन्नलत्तु ओण् पोरुळ्' इति गाथायाः श्रीमदष्टाक्षरीमहामन्त्रार्थविवरणरूपत्वात् "मन्त्रार्थो भवदाचार्य सन्निधौ अधिगन्तव्यः" इति पुत्रावादिशन्तिस्म । कूरेशाज्ञया, स्वजिज्ञासया च गोविन्दभट्टसन्निधिं प्राप्तुं प्रयतमानयोः कुमारयोः, शरीरस्यानित्यता माकलय्य शङ्कमानाः श्रीवत्साङ्काः पुन स्ता वाहूय, तन्मन्त्रमुच्चार्य गाथाया भावं विवृत्य, गाथेय मष्टाक्षरीमन्त्रस्य व्याख्यारूपेति बोधयामासुः । अतः कूरेशाना मपि आचार्यकोट्या मनुप्रवेश स्समुचितः । अत एव पराशरभट्टार्याः सहस्रनामभाष्ये, आचार्याभिवन्दनात्मके प्रथमश्लोके "वन्दे गोविन्द तातौ" इति गायन्तः गोविन्दभट्टैस्साकं स्वपितृपादा नपि ववन्दिरे ।

## रङ्गेशः कुटुम्बभारवहः

तनयौ पराशर-वेदव्यास भट्टार्यौ वेदवेदान्तयोः सकलविद्यास्थानेषु च निष्णातावभूताम्। तौ च परिणयसुलभं वयोऽधिजग्मतुः। ज्ञात्वैत त्तयो र्जननी आण्डाळ्देवी तयो रुद्वाहाय भर्तारं चोदयामास। अहङ्कारममकारास्पृष्टाः सर्वथाऽऽचार्यपरतन्त्राः श्रीवत्साङ्काः भगवद्रामानुजमुनिसन्निधौ 'पुत्त्रयो र्विवाहो निर्वर्तनीय' इति विज्ञापयामासुः। आचार्याश्च स्वाचार्याणां महापूर्णानां कुटुम्बात् कन्यकयोः स्वीकरणं युक्तरूप मिति निर्दिदिशुः। आचार्याज्ञा मनुवर्तमानाः श्रीवत्साङ्काः महापूर्णस्य बान्धवा नभ्येत्य कन्यकादान मयाचन्त। प्रथमतोऽभ्युपेत्याऽपि पश्चान्नूतनोऽयं सम्बन्ध इति न सममन्यन्त।

अतीते च कस्मिंश्चन काले पुनः कूरेशपत्नी अण्डाळ् देवी पुत्त्रयो र्विवाहं प्रास्तोष्ट। परमैकान्तिनः कूरेशाः "भगवत्कुटुम्बस्य योगक्षेमं स्वयं भगवानेव वहेत्। कुतोऽस्माकमत्रचिन्ता? भगवत्सन्निधिं कुमारौ प्रहिणु"। इति ब्रुवते स्म। परेद्यवि पिता पुत्त्रौ च श्रीरङ्गनाथस्य प्रमुखे सेवायै सन्निदधिरे। रङ्गेशे "श्रीवत्साङ्क, किमपि विवक्षुरिव दृश्यसे, ब्रूहि" इत्यादिशति सति "पुत्त्रयोः परिणयं कारय इति मां प्रेरयन्ति" इति कूरनाथेषु प्रतिवदत्सु, स्वामी च "कुतोऽत्र ते विचारः? युक्तमहं निर्वोढास्मि" इति सान्त्वयामास। तदनुगुण मेव भगवान् स्वप्ने सन्निधाय महापूर्णबन्धून् "कूरनाथतनयाभ्यां कन्यके प्रदेहि" इति आज्ञापयामास। विस्मिता स्ते परेद्यवि कूरेशान्तिक मेत्य कन्यकादानं प्रतिज्ञाय, निर्बध्य महता समारोहेण परिणय मन्वस्थापयन्। अत इदं व्यक्तं यत् रङ्गेश एव श्रीवत्साङ्ककुटुम्बकृत्यनिर्वाहक इति।

## श्रीवत्सचिह्नमिश्ररचिता ग्रन्थाः

वनाचलदिव्यक्षेत्रयात्रायां निर्मिताः वैकुण्ठातिमानुषसुन्दर-

बाहुस्तवाः त्रयः, ततः भगवद्रामानुजाचार्याज्ञानुसारेण रचितो वरदराजस्तवः, पश्चात् श्रीस्तवश्चेति पञ्चस्तवाः तद्रचिताः अतिमात्रं प्रख्याताः। पराशरभट्टार्याः श्री सहस्रनामभाष्ये 'अविज्ञाता' इति नाम व्याख्यान्तः - "सर्वज्ञता मेव मुपालभामहे, त्वं ह्यज्ञ एवाऽऽश्रितदोषजोषणः" इति श्लोकांश मुदाहरन्तः "अयं श्लोकः तात पादै रनुगृहीत" इति लिलिखुः। अयञ्च श्लोकः पञ्चस्तवे नोपलभ्यते इति स्तोत्रान्तराण्यपि तै र्निर्मितानि स्यु रिति ऊहितु मस्त्यवकाशः।

अपि च। निगमान्तदेशिकै रनुगृहीते रहस्यत्रयसारे चरमश्लोकाधिकारे "पराशरभट्टार्याः, श्रीवत्सचिह्नमिश्राश्च स्वस्वरचितेषु नित्येषु" इति लिखित मस्तीति नित्यग्रन्थः कश्चित् कूरेशै र्निरमायीति प्रतीयते, यस्तु अद्य यावन्नाऽलम्भि। किञ्च तत्रैव "श्रीवत्साङ्कानां चरम श्लोकव्याख्याया मपि इय देव विवक्षित मिति न कोऽपि विरोधः" इति काचन पङ्क्तिः दृश्यत इति हेतोः कूरेशैः 'चरमश्लोकव्याख्यारूपः कश्चिद्ग्रन्थः सन्दृब्ध इति ऊह्यते। अयमपि नाऽलाभि। यमकरत्नाकरनामा कृष्णावतार पवित्रचरित्रचित्रणपरः यमकालङ्कारमयः षोडशभि राश्वासै र्विशिष्टः प्रौढः कश्चित्प्रबन्धः एतैर्विरचितोऽस्ति। अप्रमेयप्रतिभासमुल्लासितं स्वोपज्ञव्याख्याप्रसाधित मिदं काव्यं स्तोतुं वयं नेश्महे। इदङ्काव्यकर्तृत्वविषये महान्वादकोलाहलः उदस्थाप्यत। तथाऽपि इदं काव्यं कूरेशैरेव निर्मितमिति बहवो विज्ञाः प्रतियन्ति। कूरेशविजयनामाऽन्योऽपि ग्रन्थः एभिराचार्यै रचित इति कथयन्ति। वस्तुतस्तु चोलराजास्थाने श्रीवत्साङ्कै रुपन्यस्तान् पूर्वपक्षसिद्धान्त कोटिक्रमानेव अत्र सङ्गृह्य अर्वाचीनैस्तस्य कूरेशविजय इति नाम कृत मिति अत्र ग्रन्थकर्तृत्वं कूरनाथानां न सङ्गच्छते।

# प्रास्थानिकम्

श्रीवत्साङ्काः इत्थं लोकोज्जीवनाय श्रीसूक्ती र्बोधयन्तः ज्ञानानुष्ठानाभ्यां निस्समाभ्यधिकतया विराजमाना आसन् । भगवद्रामानुजसन्निधौ श्रीमुखसूक्तिकालक्षेपप्रवचन मनुवर्तमान मासीत् । कदाचित् "मुडियुडै वानवर् मुरै मुरै एदिर् कोळ्ळ" इति गाथा विस्तरेण प्रतिपादिता । गोष्ठ्यां सन्निहिताः श्रीवत्साङ्काः "परमपदं प्राक् प्राप्ताः मुक्ताः अनन्तर मागच्छतः प्रत्युद्गमनादिभि रुपचारैः परिचरन्ति" इत्यमु मत्र प्रस्तुतं विषयं मनसि कुर्वाणा इत्थं चिन्तयामासुः । "परमपदप्राप्तौ यद्यहं पश्चात्तनो भवेयम्, तर्हि मत्तः प्रागताः भगवद्रामानुजाचार्याः मां प्रत्युद्गम्य उपचरिष्यन्ति । सति चैवं द्वेधा मे महती हानिः - आचार्यान् प्रत्युद्गमनादिना उपचरितु मवकाशाभावकृतं दौर्भाग्यम्, अचार्यै रुपचर्यमाणताकृतो महापचारश्च मे भविष्यतः । द्वितय मेत त्परिहर्तुं पूर्वमेव मया परमपदं प्राप्तव्यम्" इति चिन्तयित्वा निश्चित्य, सङ्कल्पमिमं लक्ष्मणमुनिभ्योऽनिवेद्यैव रङ्गेशस्य पुरतः तस्थुः । "श्रीवत्साङ्क, किमपि विज्ञापयितुकाम इवाऽसि?" इति भगवता पृष्टाः कूरेशाः कञ्चनश्लोकं गीत्वा चित्तद्रुतिकर मुपन्यासं चक्रिरे । भगवानपि सम्प्रीतः - "अभिलषितं वृणीष्व । देवीभ्य श्शपे ! लक्ष्मणमुनये च शपे ! दास्यामि" इति प्रत्यजानात् । श्रीकूरेशा अपि "मलीमसा दस्माच्छरीरात् मां मोचयित्वा, नित्यविभूत्यां दिव्यं नित्यानुभवं मह्य मनुगृहाण" इति याचन्ति स्म । तदा "हन्त ! श्रीवत्साङ्कविश्लेषो मे दुर्भरो भविष्यति" इत्यतिमात्रं विषीदन् श्रीरङ्गेशः "अन्यं वरं वृणीष्व" इत्यब्रवीत् । श्रीवत्साङ्कास्तु "अन्य द्वरणीयं न मेऽस्ति । प्रतिश्रुतपालनं सतां स्वभावः खलु । यथाप्रतिज्ञं यथाभिलषितञ्च प्रदेहि" इति प्रार्थयन्ते स्म । भगवान् मार्गान्तर मपश्यन् "भवते, भवन्नामजपद्भ्यः भवत्सम्बन्ध भाग्यशालिभ्यश्च परमपद मदाम्" इति प्रसन्नवदनोऽभिधाय प्रसादेन तुलसीमालाधारणादिना च तान्सम्मान्य गृहगमनायाऽनुमेने ।

व्याकरणशास्त्रविरुद्धा इति मन्यमानाः केचन शब्दाः सामीचीन्यं गमिताः । वैकुण्ठस्तवे एकाशीतितमश्लोके "व्युञ्छन्तु (रात्रय इमाः) इति मुद्रितं तिङन्तपदं तदनुकूलधात्वभावात्, 'व्युच्छन्तु' इति अन्यथा कृतम् । उच्छी विवासे इति धातुः । वीत्युपसर्गः (रात्रयः) व्युच्छन्तु अपयान्तु इत्यर्थस्सङ्गच्छते । वरदराजस्तवत्रिंशश्लोकव्याख्यायां सौदामिनीत्यपपाठोऽमुद्र्यत । सौदामनी इत्येव भाव्यम् । सुदामन् शब्दात् "तेनैकदिक्" इत्यणि, 'अन्' इति सूत्रेण प्रकृतिभावात् टिलोपाभावे, आदिवृद्धौ ईत्वे च सौदामनी इत्येव सिध्यति । तथैव शोधितम् । वैकुण्ठस्तवे चतुस्त्रिंशश्लोके 'सञ्जगदिरे' इति तिङन्तशब्दः शास्त्रविरुद्ध इति 'सञ्जगरिरे' इति संस्कृतः । गद व्यक्तायां वाचि इति भ्वादिषु पठितो धातुः परस्मैपदी । अतः सञ्जगदिरे इत्यात्मनेपदरूपं न सिध्यति । गॄ निगरणे इति धातोः परस्मैपदित्वेऽपि 'समः प्रतिज्ञाने' इति सूत्रेण आत्मनेपदे विहिते ततः सञ्जगरिरे इति रूपं निष्पद्यते ।

एवमेव वेकुण्ठस्तवे षोडशे श्लोके स्थितः 'अनाप्नुषि' इत्ययं शब्दः अनापुषि इति, सुन्दरबाहुस्तवे द्वात्रिंशदुत्तरशततमेश्लोके 'विज्ञाप्स्या' मीति मुद्रितं विज्ञीप्सामि इति, वरदराजस्तवे एक चत्वारिंशश्लोकव्याख्यायां स्थितं 'कुर्वन्त्याः' इति पदं, कुर्वत्या इति, अत्रैव स्तवे त्रयोदशे श्लोके 'विस्प्रक्ष्य (क्ष)न्ती' इत्यपष्ठुशब्दं 'पिस्पृक्षन्ती' इति च, पुन रत्रैव चतुर्दशश्लोकस्थितं 'उपासिषयितुं' इति आन्ध्रलिपि ग्रन्थस्थितं विरुद्धपदं उपसिसिषितुं इति च - एव मेतानि शास्त्रानुरोधात् शोधितानि ।

क्वचिदर्थपुष्टये अपेक्षितानीति वा, मुद्रणवेलायां भ्रष्टानीति वा मन्यमानानि कानिचन पदानि कुण्डलीकृत्य योजितानि । यथा - अतिमानुषस्तवे द्वात्रिंशश्लोकव्याख्यायां 'बभूविथ अभूः लिट्' इतीयदेव वर्तते । 'अभूः लिट्' इति पदयो र्मध्ये अर्थसौकर्याय (भूसत्तायामिति

धातोः) इति समयोजि। अत्रैव स्तवे षट्त्रिंशश्लोकव्याख्याने 'शुश्रुम श्रुतवन्तः स्मः लिट्' इत्येवाऽस्ति। अत्र लिट् इत्यतः पूर्वं (श्रु श्रवणे इति धातोः) इति योजितम्। वैकुण्ठस्तवे अष्टाविंशेश्लोके 'त्रय मपि विविच्य' इत्येतावन्मात्रं विद्यमानं न सुबोधकमिति (तत्त्व) त्रय मपीति लिखितम्। सुन्दरबाहुस्तवे एकनवतितमेश्लोके 'विवर्धितः' इत्यस्य विवरणं 'प्रापितः' इति कृत मपूर्ण मिति (वृद्धिं) प्रापितः इति पूरणं कृतम्। श्री स्तवे नवमे श्लोके 'ज्ञानप्रसाद परिपाक भारती परिचरित चरणनलिनयुगलाम्' इति समासपदमध्ये झटित्यर्थस्फूर्तये '.....परिपाक (हेतु) भारती ....' इति परिपाक भारती शब्दयो र्मध्ये हेतुशब्दस्सङ्घटितः। वैकुण्ठस्तवे दशमश्लोकव्याख्यायां 'सविषया' इत्यस्य पदस्य आन्ध्रलिपिग्रन्थे एव विद्यमाना विवृतिः 'लाभवती' इति कृता, तृप्तिं न ददातीति (विषय) लाभवती इति विषयशब्द स्संसञ्जितः। ग्रन्थलिपिमुद्रितग्रन्थे तु 'सविषया' इत्यस्य विवृति रेव नाऽस्ति। इत्थ मर्थसौकर्याय आयोजितानां पदानां विषये किञ्चि दलेखिष्म।

सम्प्रति तु, अर्थभङ्गहेतुभूतानां पदानां विषये कृतं परिमार्जनं किञ्चित्प्रस्तूयते । वरदराजस्तवे एकविंशश्लोकावतारिकायां 'त्रयस्त्रिंशच्छ्लोकैः आमूर्धपादं दिव्यमङ्गलविग्रहं वर्णयितुं प्रारभते' इति मुद्रितम्। अयं प्रमादः। द्विचत्वारिंशच्छ्लोकैः इत्येव भवितव्यम्ः, यत स्तावद्भिरेव श्लोकैः भगवतः शिरः प्रभृति पादपर्यन्तवर्णना कृता लक्ष्यते। एव मेव पुन रत्रैव स्तवे द्विसप्ततितमश्लोकावतारिकायां प्रपत्तुः स्वस्य दोषभूयस्त्व माविष्करोति अष्टादशभिः श्लोकैः इत्यत्र अष्टादशभि रिति वचन मसङ्गतम् । दोषभूयस्त्वाविष्करणे परिशील्यमाने, त दष्टाभिरेवाऽकारीति अष्टाभिरित्येव समुचित मिति तथैव विपर्ययः कृतः। सुन्दरबाहुस्तवे चतुर्विंशत्युत्तर शततमश्लोकव्याख्याने "नो ददसे न ददासि, दा दाने" इति मुद्रितं लक्ष्यते। दा धातो रात्मनेपदात् दत्से इति रूपं भवेत्।

अतोऽन्यो धातुः (डु दाञ् दाने इति न) निर्देष्टव्यो निर्दिष्टः, स च 'दद दाने' इति भ्वादिष्वात्मनेपदी। ततः ददसे इति रूपं सिध्येत्। वरदराजस्तवे एकपञ्चाशश्लोकव्याख्यायां 'तत्किणम्' इत्यस्ति। किणशब्दस्य पुंलिङ्गत्वात् 'स किणः' इत्यशोधि। वरदराजस्तवे पञ्चचत्वारिंश-श्लोकव्याख्याने 'विवक्रितवा' निति पदं मग्नं कृतवा निति व्याख्यातम्। मग्नताया अत्र न सम्भवः। भुग्नं कृतवा निति सम्मृष्टम्। 'भुजो कौटिल्ये' इति धातोः क्तप्रत्यये निष्पन्नं भुग्नपदं ईप्सित मर्थं दद्यात्। वैकुण्ठस्तवीयचत्वारिंशश्लोकव्याख्यानावतारिकायां "अथ पूर्वोक्त मर्थ मनूद्य 'विशिष्यन्' इत्यत्र 'विशिष्य' न्निति शब्दोऽसाधु रिति विशिंषन् इति शोधनं कृतम्। अत्रैव स्तवे चतुरशीतितम श्लोकव्याख्याने "हा हन्त हन्तेति अवयवसमुदायत्वेन" इति दृश्यमाना पङ्क्ति रत्यन्तासम्बद्धा। किं 'हा हन्त हन्ते'त्यवयव समुदायः। अव्ययसमुदायः खलु सः। अतः 'हा हन्त हन्ते'त्यव्यय समुदायेनेति भाव्यमिति तथैव व्यधायि। अतिमानुषस्तवीय षष्ठश्लोके रहसि इत्यस्य स्थाने हरसीति केवल मक्षरव्यत्यासेन सन्दर्भानुरोधेन लिखितम्। सुन्दरबाहुस्तवे विंशत्युत्तरशततमश्लोके, 'कलिकल्कदूषितम्' इति मूले स्थिते 'कलिकल्मषेण कलिकालप्रयुक्तकलुषेण' इति आन्ध्रलिपिग्रन्थस्थं विवरण मसम्बद्ध मिति 'कलिकल्केन कलिकालप्रयुक्त कलुषेण इति परिवर्तनमावश्यकं कृतम्। वरदराजस्तवे एकादशश्लोकव्याख्यानावसरे 'निरनैष्म हि . . . . आत्मनेपद लुङ्' इति निरदेशि। इद मसम्बद्धमिति 'निरणैष्म हि . . . . परस्मैपद लुङ्' इत्यैचित्येन शोधन मपेक्षित मासीत्, तच्च कृतम्। वरदराजस्तवे एकोनपञ्चाशश्लोके "माहात्म्यावहा न भवतीति" इति मुद्रितं श्लोकभावानुरोधेन "माहात्म्यावहा भवति क्षुद्राणान्तु न भवतीति" इति विशोध्य विलिख्य वाक्यपूर्तिरक्रियत। अत्रैव स्तवे षट्षष्टितमश्लोकव्याख्याने (अन्ध्रलिपिग्रन्थे) जगता मित्यस्य स्थाने

भजता मिति, अत्रैव षट्सप्ततितमश्लोक विवरणे (आन्ध्रलिपिग्रन्थे) 'चैन्नत्य' मनुचित मिति 'चित्तौन्नत्य' मिति, अत्रैव द्विसप्तति-तमश्लोकावतारिकायां आन्ध्रलिपिग्रन्थे स्थितस्य 'प्रपिपत्सु' रित्यस्य शब्दस्य स्थाने 'प्रपित्सु' रित्युचित मिति च अर्थवन्तः परिणामाः अकारिषत। अत्रैव अशीतितमश्लोके 'चस्खलं' (प्राक्) इत्येतत् 'चस्खल' (प्राक्) इति च शोधितम्। पुन स्तच्छ्लोकव्याख्याने 'चस्खलं' किल, 'लङुत्तमैकवचनम्' इत्यमुद्र्यत। इद मसङ्गत मिति 'चस्खल' किल, लिङुत्तमैकवचन मितिशोधितम्। इत्थमस्मभिः कृतेषु बहुषु कानि चनैव पाठशोधनानि तद्रीतयश्च प्रादर्शिषत।

अत्रैवं परिष्काराय पयस्यद्भिः अस्माभिः मानुषता सुलभेन व्युत्पत्तिलघिम्ना, दोष मदोषतया, अदोषं दोषतया च ग्राहयता केचनाऽत्र दोषा अवशात्प्रविष्टाः अवश्य मस्मत्परिष्करणे गोचरीभवेयुरेव। ते सहृदयैः क्षन्तव्या इति प्रार्थयामहे। पौरो भाग्यभाजो भवितुं नाऽस्माकमेतावान् प्रयासः अपि तु यावच्छक्ति प्रयत्य शुद्धपाठै र्हृदयालव आराधनीया इत्येवाऽस्माकं विनीतोऽभिसन्धिः। अस्मत्प्रदर्शिता दोषाः ग्रन्थकर्तृ ज्ञानदौःस्थ्यकृता न भवन्ति, अपि तु लिपिकाराणां, मुद्रापकाणां, तत्सहायनां वा भवेयुरिति प्रतीमः। यद्यस्मत्परिश्रमेण भागवताः किञ्चिदपि वा आराद्धाः भवेयुः, तदाऽत्यर्थं वयं धन्यजन्मानो भूयास्म।

*मर्त्यै रसर्वविदुरै र्विहिते क्व नाम।*
*ग्रन्थेऽस्ति दोषविगमः क्व चिरन्तनेऽपि॥*

# श्री वैकुण्ठस्तवः

*श्रीवत्सचिह्नमिश्रेभ्यो नमउक्ति मधीमहे।*
*यदुक्तय स्त्रयीकण्ठे यान्ति मङ्गल सूत्रताम् ॥*

अथ भगवद्रामानुजसकाशनिरन्तरसंवासाधिगत निखिल-श्रुत्यन्ततत्त्वार्थाः श्रीवत्सचिह्नमिश्राः आनृशंस्यैकमनसः मकल सुमनस्सञ्जीवनाय पञ्चस्तवव्याजेन अर्थपञ्चकं प्रकाशयितुकामाः प्रथमतो भगवतो वैकुण्ठनाथस्याकुण्ठमहिम्नः स्वरूपरूपगुणान् प्रतिपादयितुं श्री वैकुण्ठस्तव मारभमाणाः प्रथमतस्सदाचार्य प्रपदनात्मकं मङ्गलं निबध्नन्ति-

*यो नित्य मच्युत पदाम्बुज युग्म रुक्म-*
*व्यामोहत स्तदितराणि तृणाय मेने।*
*अस्मद्गुरो भगवतोऽस्य दयैकसिन्धो*
*रामानुजस्य चरणौ शरणं प्रपद्ये ॥ १ ॥*

य इति। यो भगवान् रामानुजः नित्यं अच्युतपदाम्बुजयुग्मरुक्म व्यामोहतः - रुक्मं स्वर्णं भोग्य मिति यावत् तत्र व्यामोहतः अभिनिवेशा दित्यर्थः। तदितराणे वस्तूनीति शेषः, प्रयोजनान्तराणीति यावत् तृणाय मेने तृणव दमंस्त। "मन्यकर्मण्यनादरे" इत्यादिना चतुर्थी। दयैकसिन्धोः

एकशब्देन कल्याणगुणान्तरेभ्यो दयायाः प्राचुर्यं सूच्यते । अत एव अस्मद्गुरोः कृपामात्रप्रसन्नाचार्यस्येति भावः भगवतः कल्याणगुणाकरस्य रामानुजस्य चरणौ शरणं अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिसाधनं प्रपद्ये अध्यवस्यामि, गत्यर्था बुद्ध्यर्था इति न्यायात् ॥ १ ॥

अनन्तरं भगवद्भाष्यकारप्राचार्ययामुनमुनिभिः 'माता पिते' त्यादिश्लोकेन सङ्गृहीतनिरङ्कुशवैभवं पराङ्कुशमुनिं समाश्रयणीयतया समाधिकरहिततया चाऽऽह श्लोकद्वयेन -

*त्रैविद्यवृद्धजनमूर्धविभूषणं यत्*
*सम्पच्च सात्त्विकजनस्य यदेव नित्यम् ।*
*यद्वा शरण्य मशरण्यजनस्य पुण्यं*
*तत्संश्रयेम वकुला भरणाङ्घ्रियुग्मम् ॥ २ ॥*

त्रैविद्येति । यत्, ऋग्यजुस्सामभेदवत्य स्तिस्रो विद्या एव त्रैविद्यम्, स्वार्थिकोऽण् प्रत्ययः । तत्र वृद्धाः बहुशस्तदर्थपरिशीलनशीला इत्यर्थः । तेषां जनानां मूर्ध्नो विभूषणं, भवतीति शेषः । यदेव नित्यम् अत्र परत्र च सात्त्विकजनस्य सम्पत् भोग्यभूत मित्यर्थः प्राप्यमिति यावत् । अशरण्यजनस्य अकिञ्चनजनस्य शरण्यं रक्षकम् इष्टफलदं, पुण्यं साधनं वा शब्दश्चार्थः पूर्वोक्तान् समुच्चिनोति । तत् वकुला भरणाङ्घ्रियुग्मं संश्रयेम लिङ्त्तमबहुवचनम् ॥ २ ॥

*भक्तिप्रभावभवदद्भुतभावबन्ध*
*सन्धुक्षितप्रणयसार रसौघपूर्णः ।*
*वेदार्थरत्ननिधि रच्युतदिव्यधामा*
*जीया त्पराङ्कुशपयोधि रसीमभूमा ॥ ३ ॥*

भक्तीति । भक्तिप्रभावेन भक्त्यतिशयेन भवन् जायमानः अद्भुतः यो भावबन्धः अभिप्रायदार्ढ्यं तेन सन्धुक्षितः यः प्रणयसारः सारभूतः

प्रणयः स एव रसः तस्यौघेन प्रवाहेण पूर्णः। अत्र भक्तिप्रभाव भावबन्ध प्रणयसारशब्दैः परभक्ति परज्ञान परमभक्त्यादयः उच्यन्ते इति मन्तव्यम्। वेदार्था एव रत्नानि तेषां निधिः आकर इत्यर्थः। अच्युतस्य दिव्यधामा दिव्यमावासस्थानं, न विद्यते सीमा अवधि र्यस्य तादृशो भूमा महिमा यस्य सः, अन्यत्र भूमा विस्तारः; पराङ्कुश एव पयोधिः क्षीरसागरः जीयात् सर्वोत्कर्षेण वर्तताम् प्रपन्नजनकूटस्थ प्रथमाचार्यपराङ्कुशमुनेः निरङ्कुशभक्ते रेव श्रीवैष्णवसन्तानसमुत्तारकतया, जीयादिति प्रार्थनेति साम्प्रदायिकोऽर्थः ॥ ३ ॥

अथ श्रीमन्तं भगवन्तं स्तोतु मारभते -

***यन्मङ्गलाय महते जगता मुशन्ति***
***त्रैविष्टपान्यपि पदानि यदाश्रयाणि।***
***वन्दामहे सरसिजेक्षणमद्वितीयं***
***वेदान्तवेद्य मनिदं प्रथमं महस्तत्॥ ४॥***

यदिति। यत् जगतां महते मङ्गलाय उशन्ति इच्छन्ति, वशकान्तौ, वदन्तीत्यर्थः, तत्त्वज्ञा इति शेषः। सृष्टिकारणं गृणन्तीति यावत्। महते मङ्गलायेत्यनेन पूर्वप्रलयेऽप्याक्षिप्तः अतः अप्ययपूर्विका सृष्टिरुक्ता भवति "नष्टं प्राक् तदलाभत स्त्रिभुवनं सम्प्रत्यनन्तोदयम्" इत्यभियुक्तै रुक्तञ्च। त्रैविष्टपानि त्रिविष्टपस्सम्बन्धीनि स्थानानि यदाश्रयाणि यदाधाराणि अनेन स्थालीपुलाकन्यायेन विभूतिद्वय स्थिति कर्तृत्व मुक्तम् "एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्टतः" इति श्रुतेः। इदम्प्रथमं कालपरिच्छिन्नं, तन्नभवती त्यनिदम्प्रथमम्, अद्वितीयं जगत्सृष्ट्यादिषु निमित्तान्तरानपेक्षम्, विशेषणद्वयेन "स देव सोम्य" इति। सदद्वितीयपदे स्मारिते। वेदान्तवेद्यं एवमाद्याकारेण श्रुतिप्रतिपाद्यं सरसिजेक्षणम्, अनेन दिव्यविग्रहवत्त्व मुक्तम्। तत् महः "नारायण परो ज्योतिः" इत्युक्तं ज्योतिः वन्दामहे स्तुम इत्यर्थः, वदि अभिवादनस्तुत्योः॥ ४॥

अथ पूर्वश्लोके सरसिजेक्षण मिति संक्षिप्तं दिव्यमङ्गलविग्रहयोग माह -

*पीताम्बरं वरदशीतलदृष्टिपात -*
*माजानुलम्बिभुज मायतकर्णपाशम्।*
*तन्मेघमेचक मुदग्रविशाल वक्षो*
*लक्ष्मीधरं किमपि वस्तु ममाऽऽविरस्तु ॥ ५ ॥*

पीताम्बर मिति। पीत मम्बरं यस्य तत्। वरं ददातीति वरदः, शीतलः दृष्टिपातः कटाक्षो यस्य तत्, आजानु जानुपर्यन्तं लम्बेते इति यथोक्तौ भुजौ यस्य तत्, "आयताश्च सुवृत्ताश्च" इति व दिति भावः। प्रशस्तः कर्णः कर्णपाशः आयतः कर्णपाशो यस्य तत्, मेघमेचकं श्यामल वर्णम्, उदग्र मुन्नतं विशालं च वक्षो यस्य तत्, लक्ष्मीं धरतीति लक्ष्मीधरं, किमपि एतादृशाकार मिति निर्देष्टु मशक्यं वस्तु मम आविरस्तु प्रकाशताम्। अत्र "आदित्यवर्णं तमसः परस्तात्", "तस्य माहारजनं वासः", तस्य यथा कप्यासं पुण्डरीक मेव मक्षिणी", "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इत्याद्याः श्रुतयो गर्भिताः ॥ ५ ॥

*यत्तत्त्व मक्षर मदृश्य मगोत्रवर्ण -*
*मग्राह्य मव्यय मनीदृश मद्वितीयम्।*
*ईशान मस्य जगतो यदणो रणीय-*
*स्तद्वैष्णवं पद मुदार मुदाहरामः ॥ ६ ॥*

यदिति। यत् पदं तत्त्वं सत्यम्, अक्षरम् अनन्तम्, अनेन विशेषणद्वयेन "सत्यं ज्ञान मनन्तं ब्रह्म" इति वाक्ये सत्यानन्तपदे स्मारिते। अदृश्य मचक्षुर्ग्राह्यम्, अगोत्रवर्णं नाम रूपहितं, अग्राह्य मनुमाना द्यविषयभूतम्, अव्यय मसङ्कुचितकल्याणगुणगणम्, अनीदृश मपरिच्छिन्नरूपगुण विभूतिकं चेतनाचेतन विसजातीयं वा, अद्वितीयं समाभ्यधिक वस्त्वन्तररहितम्, अस्य जगतः ईशानम् "पतिं

विश्वस्याऽऽत्मेश्वरम्'' इति चेतनाचेतनात्मकसकलजगन्नियन्तृभूतम्, अणो रणीयः नियमनानुगुणभूतजीवान्तःप्रवेशशक्तियुक्तम्, उदारं महतो महच्च भवतीति शेषः। उदात्त मिति पाठेऽप्ययमेवाऽर्थः। वैष्णवं विष्णुसम्बन्धि तत्पदं, पद्यत इति पद मुपास्य स्वरूप मित्यर्थः। उदाहरामः स्तुम इत्यर्थः ॥ ६ ॥

*आम्नायमूर्धनि च मूर्धनि चोर्ध्वपुंसां*
*यद्धाम वैष्णव मभीक्ष्णतरं चकास्ति।*
*तन्मादृशा मपि च गोचर मेति वाचो*
*मन्ये तदीय मिद माश्रितवत्सलत्वम् ॥ ७ ॥*

आम्नायेति। वैष्णवं यद्धाम ज्योतिः। ''ज्योतिश्चरणाभिधानात्'' इति सूत्रोक्त स्वरूपं तेजोमयं, दिव्यविग्रह इति वा। आम्नायमूर्धनिवेदान्ते ऊर्ध्वपुंसां पूर्वाचार्याणां मूर्धनि च अभीक्ष्णतरं सुतरां चकास्ति प्रकाशते। अनेन ''यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति'' इति स्तोत्ररत्नोक्तं स्मारितम्। तद्धाम मादृशां वाचोऽपि च, अपिचेत्येकं पदम् गोचरं भावप्रधानो निर्देशः, गोचरत्वं विषयत्व मेतीति यावत्। इदं तदीयं विष्णुसम्बन्धि आश्रितवत्सलत्व मिति मन्ये। 'वात्सल्यं नाम दोषानादर हेतुस्नेहविशेष' इति श्रुतप्रकाशिकायाम् ॥ ७ ॥

भगवतो वात्सल्ये सत्यपि भवत्स्तुत्यत्वप्रयुक्त परिच्छिन्न स्वरूपादिमत्त्वं, भवतोऽपि चेतनत्वा दपरिच्छिन्नविषयस्तवावगाहन-हेतुकी त्रपाऽपि स्या दित्याशङ्कायां सदृष्टान्तं परिहरति -

*जानन्नपीह किल मामन पत्रपिष्णु -*
*र्विष्णोः पदप्रणयिनीं गिर माद्रियेऽहम्।*
*न श्वावलीढमपि तीर्थमतीर्थमाहु*
*र्नोदन्यताऽपि च शुना किल लज्जितव्यम् ॥ ८ ॥*

जानन्निति। अहं मां जानन्नपि अज्ञत्वेन जानन्नपीति भावः

अपत्रपिष्णुः लज्जाशीलः स न भवतीति तथोक्तस्सन् त्रपूष् लज्जायाम् इत्यस्माद्धातोः "अलङ्कृञ्" इत्यादिना इष्णुच् प्रत्ययः । विष्णोः पदे प्रणयिनीं प्रियवर्ती गिर माद्रिये आदरविषयं करोमि; प्रणयातिशयात् अपत्रपा अभिभूतेति भावः । तत्र दृष्टान्तमाह - नेति । तीर्थं शुद्धिकरं गङ्गातीर्थं "निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ" इत्यमरः । शुना अवलीढम् आस्वादितं सदपि अतीर्थं नाऽऽहुः न वदन्ति, सन्त इति शेषः । उदन्यता पिपासावता "उदन्या तु पिपासा" इत्यमरः । "अशनायोदन्यधनाया बुभुक्षा पिपासागर्धेषु" इति सूत्रनिपातिता दुदन्यशब्दात् लटि शतृप्रत्यये विहिते रूपम् । शुनाऽपि च न लज्जितव्यम् भावे त्तव्यप्रत्ययः, लज्जावता न भवितव्य मित्यर्थः । किलेति प्रसिद्धौ ॥ ८ ॥

ईषदास्वादनेन किमायात मित्यत्राऽऽह -

*देवस्य दैत्यमथनस्य गुणेष्वियत्ता*
*सङ्ख्या च वाङ्मनसगोचर मत्यभूताम् ।*
*अप्येव मण्वपि च तत्र ममाऽऽर्तिशान्त्यै*
*कीटस्य तृष्यत उदन्वति विप्रुषाऽलम् ॥ ९ ॥*

देवस्येति । दैत्यं मथ्नातीति दैत्यमथनः तस्य, दीव्यतीति देवः तस्य, दिवु क्रीडा विजिगीषाव्यवहार द्युति स्तुति मोदमदस्वप्नकान्तिगतिषु इति धातुः । अनेन पदद्वयेन हेयप्रत्यनीकत्वकल्याणगुणाकरत्वे सूचिते इति सम्प्रदायः । गुणेषु सङ्ख्या, इयत्ता च एकैकगुणस्य इयदिति परिच्छेदः सङ्ख्या च वाङ्मनसयो र्गोचरं, गन्तव्यभूमिमित्यर्थः । वाङ्मनसशब्दस्य "अचतुर" इत्यादिना अकारान्तत्वम् । अत्यभूताम् अत्यवर्तेताम् । एव मपि तत्र गुणेषु अण्वपि एकगुणैकदेशोऽपीत्यर्थः मम आर्तिशान्त्यै पिपासाशमनाय अलं पर्याप्तं भवतीति शेषः । तत्र दृष्टान्तमाह - कीटस्येति । तृष्यतः पिपासावतः कीटस्य उदन्वति समुद्रे विप्रुषा बिन्दुना अलम् । अतः अवगाहनाक्षमस्याऽपि स्तोत्रारम्भ उचित इति भावः ॥ ९ ॥

अथाऽपि शक्त्यतिशय रचनामाधुर्यचातुर्यवतां महता मेव स्तुत्यधिकार इत्याशङ्क्य परिहरति -

*प्रेमार्द्रविह्वलगिरः पुरुषाः पुराणा-*
*स्त्वां तुष्टुवु र्मधुरिपो मधुरै र्वचोभिः ।*
*वाचो विडम्बित मिदं मम नीचवाचः*
*क्षान्ति स्तु ते सविषया मम दुर्वचोभिः ॥ १० ॥*

प्रेमेति । हे मधुरिपो, प्रेम्णा भक्त्या, महनीये प्रीति र्भक्तिः, तेन आर्द्रास्सिक्तविह्वलाः, प्रेमान्ध्यनिबन्धनस्खालित्यवत्यइत्यर्थः ता गिरो येषान्ते ततोक्ताः, पुराणाः पुरुषाः भगवद्यामुनमुनिप्रभृतयः मधुरै र्वचोभिः त्वां तुष्टुवुः स्तुतिं कृतवन्तः । नीचा रचनोपयोगिभक्तिचातुरीरहिता वाक् यस्य तस्य मम इदं स्तोत्रं वाचो विडम्बितम्, भावे क्तः, प्राचां वाचो विडम्बनं अनुकारः । अनेन तेषां परिहसनश्च फलितम् । अत्र परिहार माह क्षान्ति रिति । मम दुर्वचोभिः ते क्षान्तिः क्षमा तु सविषया (विषय) लाभवती भवति, अन्यथा निर्विषया स्यादिति भावः, क्षान्त्या अपराधसहिष्णुतारूपत्वात् । मदीयस्तोत्रस्य क्षान्तिपरिग्रह सम्भवात् प्रवृत्ति र्युक्तेति भावः ॥ १० ॥

इदानीं वेदान्तवाक्यार्थानुसारेण सर्वेश्वरं स्तोष्यन् तदितरदर्शन निन्दापूर्वकं श्रुति मभिष्टौति -

*आज्ञातवाऽत्रभवती विदिता त्रयी सा*
*तां हि प्रमाणमुपजग्मु रतीन्द्रियेऽर्थे ।*
*आभासभूय मभियान्त्यपराणिदोषै*
*रेषा तु दोषरहिता महिता पुराणि ॥ ११ ॥*

आज्ञेति । अत्रभवती पूज्या सा प्रसिद्धा त्रयी वेदत्रयं "स्त्रियामृक्सामयजुषी इति वेदा स्त्रय स्त्रयी" इत्यमरः । तव आज्ञां विदिता

आज्ञात्वेन प्रसिद्धा। "श्रुतिः स्मृति र्ममैवाऽऽज्ञा" इति प्रसिद्धेः। तां त्रयीं अतीन्द्रिये प्रत्यक्षागोचरे अनुमानादिकं व्याप्तिग्रहणादिषु प्रत्यक्षसापेक्ष मिति तदगोचरत्वमप्यभिप्रेतम्। अर्थे कर्मब्रह्मात्मके वस्तुनि प्रमाण मुपजग्मुः अङ्गीचक्रुः, वैदिकोत्तमा इति शेषः। अपराणि प्रमाणानि दोषै राभासभूयं आभासत्व मभियान्ति प्राप्नुवन्ति। "भुवो भावे" इति भावार्थे क्यप् प्रत्यये विहिते आभासभूय मिति निष्पत्तिः। पुराणी नित्येत्यर्थः। अतएव दोषरहिता पौरुषेयत्वप्रयुक्तभ्रमविप्रलम्भादिदोषशून्या एषा त्रयी तु महिता प्रमाणेषु प्रशस्ता। अतः श्रुत्यनुगुण मेव स्तोतव्य मिति भावः॥ ११॥

*अन्तर्हितो निधि रसित्वमशेषपुंसां*
*लभ्योऽसि पुण्यपुरुषै रितरै र्दुरापः।*
*तत्र त्रयीं सुकृतिनः कृतिनोऽधिजग्मु -*
*र्बाह्येषु बाह्यचरितै रितिरै र्निपेते॥ १२॥*

अन्तर्हित इति। त्वम् अशेषपुंसां, योगिनामपीति भावः। अन्तर्हितः अतीन्द्रियः निधिरसि। भगवतो निधित्ववचना त्सिद्धस्वरूपं ब्रह्म न शास्त्रं प्रतिपादयति इत्याशङ्कापरिहारपर समन्वयाधिकरणार्थ स्सूचित इति सम्प्रदायः। तमेव विवृणोति - पुण्याः पुण्यकृतश्च ते पुरुषाश्च तै र्लभ्योऽसि लभेः प्राप्त्यर्थकत्वात्, गत्यर्था बुद्ध्यर्था इति न्यायेन ज्ञेयोऽसीत्यर्थः। इतरैः अपुण्यकृद्भिः दुरापः दुःखेनाऽपि प्राप्तु मयोग्यः। तत्र त्वत्स्वरूपादिज्ञाने सुकृतिनः कृतिनश्च पण्डिताः त्रयी मधिजग्मुः प्रापुः प्रमाणतयेति शेषः। बाह्यं चरितं येषां तैः, चरितस्य बाह्यत्वं शास्त्रनिरस्तत्वं, इतरै रपण्डितैः बाह्येषु वेदविरुद्धविषयेषु निपेते निपतितं भवति। भावे लिट्॥ १२॥

इतरै रपि स्वस्वमतानुगुण्येन वेद एव किल प्रमाणतयोपन्यस्यते इत्यत्राऽऽह -

## उत्कण्ठासाधारणः परितोषः

श्रीवत्साङ्कमिश्राः परमपदप्रापकं वरं प्रतिलेभिरे इति श्रुत्वा लक्ष्मणमुनीन्द्राः चिरकालानुवृत्तं महद्दुःखं मुमुचुः। "पुरा गोष्ठीपूर्णानां सन्निधौ रहस्यार्थान् लब्ध्वा रहस्यगोपनायाऽऽदिष्टोऽप्याचार्यैः गोष्ठीपुरे एव रहस्यार्थान् प्राचकाशम्। आचार्यनियमनोल्लङ्घनेन मया शाश्वतो निरयपात स्सम्पादितः। मोक्षप्राप्त्युपायो न मे विद्यत इत्यमन्ये। परन्त्वद्य 'भवत्सम्बन्धिभ्योऽपि मोक्ष मदाम्' इति भगवन्नियमनात् अद्य न मे किञ्चिद्दुःखम्। श्रीवत्सचिह्नमिश्रसम्बन्धो मां दिष्ट्या ! रक्षति" इति विश्वसन्तस्समाश्वसन्तः आनन्दपरवशाः काषाया मुत्तरीय मन्तरिक्षे विक्षिपन्तः अत्यर्थ मानन्दथु माविश्चक्रुः।

इत्थ मात्मनः आपवर्गिकपुरुषार्थसिद्धिं विचिन्त्य ह्लादमाना अपि यतीशानाः "आत्मसमं श्रीवत्साङ्कं विना कथमहं कृपणान् प्राणान्धारयिष्या" मीति खिद्यमानाः स्वचरणाश्रितैः शिष्यै स्साकं श्रीवत्साङ्कनिकेतनं गत्वा "किं कृतवानसि, किं कृतवानसि ! एव मस्माकं हिंसनं दयासागरस्य अत्यर्थसुकुमारान्तःकरणस्य तव किमुचितम्?" इत्यार्ता आचुक्रुशुः। श्रीकुरेशा श्च परमपदप्राप्तित्वराहेतुं विवव्रुः। योगीन्द्रा स्तदाकर्ण्य "नशास्त्रं नैव च क्रमः" इति वयोविद्यादिकृतप्रवरावरभाव-रहितायां नित्यविभूत्या मपि अहो भवान् क्रम मनुसरति ! तत्राऽपि शेषत्वकाष्ठा मनुसन्दधत स्ते दिव्यगुणं श्लाघितुं भाषैवनाऽलं भवति" इति विलपन्तः विक्लबीभूताः दुःखाक्रान्ताः श्रीवत्सचिह्नमिश्रान् परिष्वज्य - "हा हन्त ! प्राणाधारेण भवता वियुज्य प्राणान् धर्तुं कथं शक्नुयाम्? मा मपि भवता साकं कुतो नो नयसि ? त्यक्त्वा मा मेवं परिदीव्यन्तं एकाकी गन्तुं कथं वा व्यवसितवानसि ? किमिदं रुचिकरं ते ? अहो ! वैकुण्ठनाथः तत्रत्याश्च कीदृशं तपः किन्नामकं वव्रं वा अन्वतिष्ठन्। अत्र शेषे शयानेन श्रीरङ्गेशेन, अनुशयानैरस्माभिश्च कियत्पापं समचीयत।

'श्रीरङ्गनगरे विराजमान, स्वामिन् भवदीयदिव्यगुणानुसन्धानरूपं रसानुभवं विहाय, गत्वा महेन्द्रलोकं देवलोकपालनरस मपि नाऽह माशासे इत्यभिप्रायिकां गाथा मपि किं भवान्व्यस्मार्षीत् ? हा धिक्कष्टम् ! कि मेत दारब्धम् ? हुम् ! भवतु । इत्थम्भूते च व्यतिकरे भवत्स्वान्तसन्ताप-सन्दायिभि र्बहुभिर्जल्पितैरद्य को वा लाभः ? अस्माभि र्भवल्लाभप्रतिबन्धकै र्न भवितव्यम् । सुखेन नित्यविभूत्यै प्रतिष्ठस्व ।" इति विलप्य, पुन र्विष्टभ्यचाऽऽत्मानं श्रीवत्साङ्कश्रवणे द्वयमन्त्रं जपन्तिस्म। तदीयं पृष्ठं स्वेन दिव्यकरेण आस्फाल्य प्राञ्जलयोऽनुमन्यन्ते स्म।

## परमपदप्राप्तिः

भगवद्भाष्यकाराणा मनुज्ञा मधिगम्य श्रीवत्साङ्काः समूल-निपातितःपादप इव आचार्यचरणयो र्निपेतुः । आचार्याश्च उभाभ्या मपि सालसुन्दरभुजाभ्यां तानुत्थापयामासुः । उत्थाय च श्रीवत्साङ्काः आचार्यचरणारविन्दे स्वस्य नेत्रयोर्वक्षसि च दृढं संयोज्य प्रदक्षिणप्रणामपुरस्सरं श्रीपादतीर्थ ञ्च गृहीत्वा साञ्जलिबन्धं "अद्य तत्र भवद्भिर्मठाय प्रस्थातव्यम्" इति सम्प्रार्थ्य उत्तर कावेरीतीरपर्यन्तं रामानुजाचार्या ननुव्रज्य "श्रीवत्साङ्क, अत्र तिष्ठ" इत्याचार्यानुज्ञां लब्ध्वा बद्ध्वा च पुन रञ्जलिं प्रत्यावृत्य स्वभवननिकटपरिकल्पितं मण्डप मधिष्ठाय, धर्मपत्नी माण्डाळ्देवी मुद्दिश्य "किं चिन्तयसीति पप्रच्छुः । सा च पतिदेवता "भवता मनुसरणा दृते विचारान्तरं नाऽस्ति" इति भाषमाणा पादयोः प्रणम्य साञ्जलिबन्धं तूष्णी मतिष्ठत् । तनया वुपाहूय "वत्सौ, सति श्रीरङ्गनाथे, सत्याञ्च श्रीरङ्गनायक्यां न काचिदपि न्यूनता युवयो र्भविष्यति । श्रीरङ्गनाथपरिरक्षितौ दत्तपुत्रा वावामिति मा किञ्चिदपि दृप्यतम् । भगवद्रामनुजाचार्य चरणावेव शरण मित्यध्यवस्य जीवतम् । जननीवदनग्लानिं परिहरतम् । भागवतेषु त्रिकरणैः अपचारान् परिहरन्तौ सुखेन तिष्ठतम्" इति हित मुपदिशन्तः श्रीवत्साङ्काः पादयो र्निपत्य

बाष्पाम्बुना स्व चरणाभिषेकं कुर्वतो स्तनययो शिरसी स्वयमपि अश्रुधारया अभिषिञ्चन्तः स्वश्रीहस्तेन तयोः प्रमृज्यनयनसलिलं "युवां प्राकृतसम्बन्धं चिन्तयित्वा यदि विषीदतः तदा भगवद्भाष्यकार श्रीपादसम्बन्धो दूषितो भवेत्। यद्यात्मसम्बन्ध मनुचिन्त्य दुःख्यतः तदा निरसितुमशक्यस्य अस्मदीयस्य भगवत्सम्बन्धस्य अज्ञौ भवतः" इति तौ समाश्वास्य देवायतनस्य पुरः पिळ्ळैप्पिळ्ळै याळ्वान् नाम्नः उत्सङ्गे उत्तमाङ्गम् आण्डाळ्देव्या अङ्के श्रीपादौ च निक्षिप्य यामुनाचार्याणां रामानुजाचार्याणा ञ्च श्रीचरणौ ध्यायन्तः तस्मिन्नेवाऽहनि विष्णो र्ध्रुवं पद मविन्दन्त। श्रीरामानुजाचार्याश्चाऽऽगत्य चरमकैङ्कर्यं पुत्रेण निर्वर्तयामासुः।

इत्थमाचार्योत्तमानां विरक्तशेखराणां भागवतपरिबृढानां कविकुलभूषणानां श्रीवत्सचिह्नमिश्राणां पवित्रचरित्रे स्वल्पानेव कांश्चि दंशान् न्यवेदयाम। अत्र दोषानगणयित्वा, यदि सन्ति गुणाः तान् स्वीकुर्वन्तु प्राज्ञाः *।

## परिष्करणमधिकृत्य

किञ्चिदिदं विज्ञाप्यते। व्याख्यानारम्भेषु श्लोकप्रतीकधारणे बहवो दोषादृष्टः, ते च परिष्कृताः। यदा समासपदैकदेशः प्रतीकतयोद्ध्रियते, तदा प्रातिपदिकरूपस्य तस्य इति ना सन्धि रवश्यं कर्तव्यः। परन्तु बहुत्र तद्विरोधो लक्ष्यते। यथा - 'ज्ञानात्मनः' इति (वैकुण्ठ.50) मूलपदम्। ज्ञानेति तदेकदेशः प्रतीक उपात्तः। 'ज्ञानेति' इति निर्देष्टव्ये "ज्ञानइति' इति प्रतीकधारण मनुचितं मुद्रितम्। इदं 'ज्ञानः इति', 'ज्ञाने इति' इति वा अनभिमतं पदच्छेदं स्फोरये दपि। एवमेव 'वज्रध्वजाङ्कु' शेत्यारब्धदीर्घसमासपदैकदेशप्रतीकः (अतिमानुषः०४) 'वज्र इति' इति

* श्रीमद्भिः श्रीकाञ्चीप्रतिवादिभयङ्कर अण्णङ्गराचार्यै रनुगृहीतान् कूरत्ताळ्वान् वैभवात् (आन्ध्रामनूदितात्) विषया स्सङ्गृहीताः। सर्वदा कृतज्ञा भवामः।

निर्दिष्टः। अनेनाऽपि 'वज्रेति' इति भवितव्यम्। 'सौन्दर्यसा' रेत्यादि दीर्घसमासपदैकदेशप्रतीकदानेऽप्येवमेव (सुन्दरबाहु. 67) 'सौन्दर्य इति' इति प्रतीकधारण मसङ्गतम्। 'सौन्दर्येति' इत्येव युक्तरूपम्।

प्रतीकधारणविषयेऽन्यविधोऽपि दोषो लक्ष्यते। पूर्वनिर्दिष्टेषु सन्धौ कर्तव्येऽकरणं दर्शितम्। अद्य तु तद्भिन्ना रीतिः, अर्थात् सन्धावकर्तव्येऽपि तत्करण मुदाहरणीक्रियते। यथा - 'कूलेऽब्धेः' (सुन्दरबाहु. 105) इत्यादिमूलम्। तत्र कूले इति सप्तम्यन्तं पदम् प्रतीकतया दित्सितम्। असङ्गतं सन्धिं विधाय 'कूलेति' इति निर्देशः कृतः। 'कूल इति' इति तु युक्तम्। अथवा, 'कूले इति' इति सन्धिरहितरूपमपि मुद्रितं नोद्वेजयेत्। सन्धिस्तु विरूपः। एव मेव पुनरन्यत्र। 'मध्येक्षीरपयोधी' त्यादि मूलम् (सुन्दर.119)। प्रतीकतयोद्दिधीर्षितं तु पदं मध्ये इति। प्रतीक स्तु मुद्रितो दृश्यते कृतकुसन्धिः 'मध्येति' इति। 'मध्यइति' इत्येव मुद्रणीयः। एवं द्विरूपाः विरूपाः सन्ध्यकरणतत्करण कृताः दोषाः प्रायशोऽस्माभिरुद्धृताः।

क्वचि त्संवादाय वा, प्रकृतार्थप्रामाण्याय वा उद्धृतेषु ग्रन्थभाषेषु प्रविष्टा दोषाः आकरग्रन्थान्परिशील्य शोधिताः। यथा वैकुण्ठ स्तवीयचतुर्दशश्लोकव्याख्यायां "अभ्यवहृताज्जग्ध ग्रस्त . . . ." इत्यमरकोशपाठः मुद्रितः। स चाऽपपाठः "अभ्यवहृतान्नजग्ध ग्रस्त . . . . " इति आकरग्रन्थानुरोधेन परिष्कृतः। पुन रत्रैव स्तवे त्रयोदशश्लोकव्याख्याने "तत्त्वेनैतच्च्यवन्ति ते" इति आन्ध्रलिपि ग्रन्थस्थितोऽसाधुपाठः "तत्त्वेनातश्च्यवन्ति ते" इत्यौचित्यात्परीवर्तितम्। अत्रैव चतुर्विंशश्लोकव्याख्यायां "तस्यैवैष शारीर" इतीदं यथाऽऽकरं "तस्यैष एव शारीर" इति संस्कृतम्। सुन्दरबाहुस्तवे पञ्चविंशत्युत्तरशततमश्लोकव्याख्यायां स्थितं "नु प्रश्नायां वितर्के च" इत्यमरसिंहवचनं "नु पृच्छायां विकल्पे च" इति सम्यक्कृतम्। वरद राजस्तवे द्वादशश्लोकव्याख्यायां "यत्तददृश्यम्" इति मुद्रितं वेदवाक्यं "यत्तदद्रेश्यम्" इति शोधितम्।

*चित्रं विधे र्विलसित न्त्विद माविरस्ति*
*दुष्टात्मना मय महो किल दुर्विपाकः ।*
*यत्केचिदत्रभवतीं श्रुति माश्रयन्तोऽ*
*प्यर्थे कुदृष्टिविनिविष्टधियो विनष्टाः ॥ १३ ॥*

चित्र मिति । इदं विधे र्विलसितं दैवस्य विलासः, अदृष्टविपाक इत्यर्थः, चित्र माश्चर्यकर माविरस्ति प्रकाशते । सामान्यत उक्तं विशेषेण निदर्शयति - दुष्ट आत्मा मनो येषां तेषां, अनेकजन्मानुवृत्तकल्मषदूषिताना मित्यर्थः । अयं प्रकाशमानो दुर्विपाकः दुष्टादृष्टपरपिाकः अहो आश्चर्यकरः किल, यत् यस्माद्धेतोः केचित् नामनिर्देशानर्हाः, प्रच्छन्नबौद्धा इति भावः । अत्र भवतीं पूज्यां श्रुति माश्रयन्तः प्रमाणतया स्वीकुर्वन्तोऽपि अर्थे पदार्थे वाक्यार्थे तात्पर्यार्थे च कुदृष्टिषु अपन्यायेषु विशेषेण निविष्टा आग्रहग्रस्ता धी र्येषान्ते तथोक्ता स्सन्तः विनष्टाः, "न तु मा मभिजानन्ति तत्त्वेनाऽत-श्च्यवान्ति ते" इत्युक्तप्रकारेण, असत्कल्पा भवन्तीति भावः ॥ १३ ॥

वेदैकदेशस्वीकारादेतेषां बाह्यत्वोक्तिः कथ मित्याशङ्क्य तत्साम्यं दृष्टान्तमुखेन द्रढयति -

*बाह्याः कुदृष्टय इति द्वितयेऽप्यपारं*
*घोरं तम स्समुपयान्ति न हीक्षसे तान् ।*
*जग्धस्य काननमृगै र्मृगतृष्णिकेप्सोः*
*कासारसत्त्वनिहतस्य च को विशेषः ॥ १४ ॥*

बाह्या इति । बाह्याः वेदं प्रमाणतया ऽनङ्गीकुर्वन्तो माध्यमिकादयः, कुदृष्टयः अनादिपाप वासनादूषिताशेषशेमुषीकतया वेदैकदेशं व्यावहारिकप्रमाणतया स्वीकृत्यापि असमीचीनन्यायवादिनो मृषावादि प्रभृतयः, द्वितीयेऽपि उभयविधा वादिनोऽपि अपारं दुस्तरं घोरं पतनहेतुतया क्रूरं तमः तमोगुणं समुपयान्ति प्राप्नुवन्ति । कुत इत्यत आह नहीति । हि यस्मा त्कारणात् तान्नेक्षसे न कटाक्षयसि, जायमानदशाया मिति शेषः ।

"जायमानं हि पुरुषं यं पश्ये न्मधुसूदनः। सात्विक स्सतु विज्ञेय स्स वै मोक्षार्थचिन्तकः ॥ पश्य त्येनं जायमानं ब्रह्मा रुद्रोऽथवापुनः। रजसा तमसा चाऽस्य मानसं समभिप्लुतम्" इति वचन मत्राभिप्रेतम्। तत्र दृष्टान्तं दर्शयति- जग्धस्येति। मृगतृष्णिकाया मीप्सोः इच्छावतः मृगतृष्णिकाया मुदकप्रावाह भ्रान्त्या पिपासया च तदिच्छो रित्यर्थः। काननमृगैः शार्दूलादिभिः जग्धस्यभक्षितस्य, "अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते" इत्यमरः। अद भक्षणे इति धातोः "अदोजग्धिर्ल्यपि किति" इति जग्ध्यादेशः। कासारः सरः तस्मिन् विद्यमानैः सत्त्वैर्जन्तुभिः निहतस्य जलं दृष्ट्वाऽपि [1]परीक्षकावतारप्रदेशं त्यक्त्वा मतिभ्रंशा त्कचिदवतीर्णस्य हठात्पतितस्य, ग्राहादिभि र्भक्षितस्येत्यर्थः, को विशेषः ? पिपासाशमनं जीवनञ्च नास्तीत्येतत् द्वयोरपि तुल्यमिति भावः। तद्वत् उभयेषा मपि तत्त्वनिर्णयाभावः अधः पतनञ्च तुल्यमिति द्रष्टव्यम् ॥ १४ ॥

तर्हि श्रुत्यर्थनिर्णयोपायः क इत्याकाङ्क्षाया माह -

*न्यायस्मृतिप्रभृतिभि र्भवता निसृष्टै -*
*र्वेदोपबृंहणविधा वुचितैरुपायैः।*
*श्रुत्यर्थ मर्थमिव भानुकरै र्विभेजु-*
*स्त्वद्भक्तिभावित विकल्मषशेमुषीकाः ॥ १५ ॥*

न्यायेति। त्वद्भक्त्या भाविता भावनायुक्ता अतएव विकल्मषा विषयभावनाशून्या शेमुषी बुद्धि र्येषां ते तथोक्ताः, पुरुषा इति शेषः; इदं हेतुगर्भविशेषणम्। भवता निसृष्टैः तत्तत्प्रबन्धनिबन्धृपुरुषविशेषेषु आवेशवता भवता प्रदत्तै रित्यर्थः। वेदस्य उपबृंहणविधौ, उपबृंहणं नाम "उक्तार्थविशदीकारो युक्तार्थान्तर बोधनम्। मतं विवरणं नाम"

---

1. परिरक्षकावतार इति ग्रन्थाक्षर मुद्रितः पाठः। परीक्षितावतार इति वा परिरक्षितावतार इति वा पाठो भवे दित्यूह्यते।

इत्युक्तप्रकारं विवरणं, तस्य विधाने उचितैः योग्यैः उपायै स्साधनैः न्यायस्मृतिप्रभृतिभिः, एकनालावलम्बि फलद्वयन्यायेन तर्कमीमांसे उभे अपि न्यायशब्दो दर्शयति, समीचीनतर्कस्य पूर्वोत्तरमीमांसान्यायानाञ्च उपबृंहणानुगुणात्वात्। तदुक्तम्- "आर्षं धर्मोपदेशञ्च वेदशास्त्रविरोधिना। य स्तर्केणानुसन्धत्ते स धर्मं वेदनेतरः"। "वेदशास्त्ररथारूढा न्यायखड्गधरा द्विजाः। क्रीडार्थमपि यद्ब्रूयु स्सधर्मः परमो मतः" इति। स्मृतयः मन्वादयः। प्रभृतिशब्देन इतिहासपुराणादिकं विवक्षितम्, "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इत्युक्तेः। श्रुत्यर्थं, भानुकरैः सूर्यकिरणैः अर्थं घटपटादिक मिव विभेजुः विभक्तं कृतवन्तः, नित्यानित्यहेयोपादेय विभागः कृत इति भावः। अत्र भक्तेर्न्यायादीनाञ्च समीचीनज्ञानहेतुत्वोक्त्या "मायां न सेवे भद्रन्ते न वृथा धर्म माचरे। शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्" इति सञ्जयवचन मभिप्रेतम्। भक्त्या शुद्धभावं गत इत्यन्वयः ॥ १५ ॥

भक्तेः प्रधानसाधनतां व्यतिरेकमुखेन द्रढयन् सदृष्टान्तमाह -

***ये तु त्वदङ्घ्रिसरसीरुहभक्तिहीना -***
***स्तेषा ममीभिरपि नैव यथार्थबोधः।***
***पित्तघ्नमञ्जन मनापुषि जातु नेत्रे***
***नैव प्रभाभि रपि शङ्खसितत्वबुद्धिः ॥ १६ ॥***

ये त्विति। ये तु पुरुषाः, तु शब्दः पुरुषविशेषद्योतकः। त्वदङ्घ्रिसरसीरुहयोः भक्तिहीनाः, भवन्तीति शेषः। तेषा ममीभिः न्यायादिभिरपि यथार्थबोधः सम्यग्ज्ञानं नैव। एवकारः प्रसिद्धिसूचकः। तत्र प्रधान साधनवैकल्ये सति तदितर साधनसाकल्येनाऽपि कार्यानुत्पादनं दर्शयति - नेत्रे, पित्तं पित्तरोगं हन्तीति तथोक्तम् अञ्जन मनापुषि अप्राप्तवति, आप्लृ व्याप्तौ इति धातोः क्वसु प्रत्ययः। प्रभाभि रपि पूर्वोक्तभानुकरै रपि शङ्खसितत्वबुद्धिः शङ्खस्सित इति बुद्धिः नैव नोत्पद्यते हि॥ १६ ॥

**तत्त्वार्थतत्परपरश्शतवेदवाक्यै*
*स्सामर्थ्यतः स्मृतिभि रप्यथ तादृशीभिः ।*
*त्वा मेव तत्त्वपर सात्त्विक सत्पुराणै-*
*र्देवज्ञधीभिरपि निश्चिनुमः परेशम् ।। १७ ।।*

तत्त्वार्थेति । तत्त्वार्थे "तत्त्वं नारायणः परः" इति उक्ते भगवति तत्पराणि "उपक्रमोपसंहारा वभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्ती च" इत्युक्तषड्विध तात्पर्यवन्ति परश्शतानि शतात्पराणि, अनन्तानीत्यर्थः । तानि च यानि वेदवाक्यानि तैः, तादृशीभिः वेदवाक्योक्तविशेषण-विशिष्टाभिः स्मृतिभिः, अथ सामर्थ्यतः सामर्थ्यं नाम प्रतिपादितार्था-विरुद्धार्थान्तराक्षेपकत्वं, तत् शब्दार्थयो रुभयो रपि सम्भवति, तत्त्वपरैः अतएव सात्त्विकैः सद्भिः पुराणान्तरेभ्यो गौरवातिशययुक्तैश्च पुराणैः - "यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा स्वयम् । तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते । अग्ने श्शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम् । सङ्कीर्णेषु सरस्वत्याः पितॄणाञ्च निगद्यते । राजसेषु च कल्पेषु अधिकं ब्रह्मणो विदुः । सात्विकेष्वथकल्पेषु माहात्म्य मधिकं हरेः । तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम्" इत्यादिक मत्रानुसन्धेयम् । देवज्ञाः परदेवतापारमार्थ्यविदः पराशरपराङ्कुशमुनिप्रभृतयः तेषां धीभिरपि ज्ञानैश्च त्वा मेव परेषां चेतना चेतनानामीशं निश्चिनुमः निर्णयामः ।। १७ ।।

---

* १७ श्लोकात्पूर्वं क्वचि दय मधिकः श्लोको दृश्यते -
वेदार्थ धी स्त्वयितु भक्तित एव लभ्या
यावा न्हि यश्च भगवन्नसि तत्त्वत स्त्वम् ।
तत्त्वार्थतत्पर परश्शत वेदवाक्यै -
स्सामर्थ्यतः स्मृतिभि रप्यथ तादृशीभिः ।।

ईशशब्दस्य देवतान्तरे प्रसिद्धिप्राचुर्यात् कथं भगवद्वाचकत्व मित्याशङ्कायां परिहरति -

**अन्यत्र तु क्वचन केचि दिहेशशब्दा-**
**ल्लोकप्रसिद्धिमुपगम्य तमीश माहुः ।**
**तैश्च प्रसिद्धिविभवस्य समूलतायै**
**ग्राह्या त्रयी त्वयि तु साऽच्युत सम्मुखीना ॥ १८ ॥**

अन्यत्रेति । केचित्तु क्वचनग्रन्थेषु अन्यत्र देवतान्तरे ईशशब्दात् "शम्बु रीशः पशुपतिः" इत्यादिषु ईशशब्दप्रयोगा दित्यर्थः । लोक प्रसिद्धिं लौकिकवाक्यप्रसिद्धिम् उपगम्य अङ्गीकृत्य तं रुद्रं ईशशब्दवाच्यम् आहुः वदन्ति, तै र्वादिभिश्च प्रसिद्धिविभवस्य प्रसिद्धिप्राचुर्यस्य समूलतायै प्रसिद्धिः प्रमाणमूला नवेत्याशङ्कायां समूलत्वाय त्रयी ग्राह्या, प्रमाणतयोपादेया । सा तु त्रयी तु हे अच्युत, इयं सम्बुद्धिः हेतुगर्भा च्यवनताया मीश्वरत्वसम्भावनाया अप्यभावात्, "शाश्वतं शिव मच्युतम्" इति नारायणानुवाके त्वयि सम्मुखीना अभिमुखा भवति न तु देवतान्तरे इत्यर्थसिद्धम् ॥ २८ ॥

आभिमुख्य मेव दर्शयति -

***यः खल्वणो रणुतरो महतो महीया-***
***नात्मा जनस्य जनको जगतश्च योऽभूत् ।***
***वेदात्मकप्रणवकारणवर्णवच्यं***
***तं त्वां वयन्तु परमेश्वर मामनामः ॥ १९ ॥***

य इति । वयन्तु, भवानित्यध्याहार्यम्, अभूदिति प्रथमपुरुषनिर्देशात् । अणो रिति पञ्चमी अणुतरः अत्यन्ताणुः, महतः महीयान् अतिमहान् अभूत् अणुभूत जीवान्तर्व्याप्तिः महदादि कारणप्रकृतिबहिर्व्याप्ति श्च विशेषणद्वयेन विवक्षिते । जगतः अचेतनस्य जनस्य चेतनस्य च जनकः

उत्पादकः, आत्मा अन्तर्यामी च अभूत्। वेदात्मको यः प्रणवः, प्रणवस्यैव वेदात्मना परिणतत्वा दिति भावः। तस्य कारणभूतं यद्वर्णं तत्प्रकृतिभूतस्तु अकारः तेन वाच्यः। "अकारो विष्णुवाचकः" इति नैघण्टुकाः। तं त्वां परमेश्वरं परो मा यस्मा दिति परमः, स चाऽसा वीश्वरश्चेति कर्मधारयः तम् आमनामः आम्नायेन जानीमः। अत्र पूर्वार्धे "अणो रणीया न्महतो महीया नात्मा गुहायां निहितोऽस्य जन्तोः, तमक्रतुं पश्यति वीतशोको धातुः प्रसादा न्महिमानमीशम्" इति श्रुतिश्च, उत्तरार्धे अस्यैवानुवाकस्यान्ते "यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः पर स्स महेश्वरः" इति श्रुतिश्च विवक्षिते। तथा "तमीश्वराणां परमं महेश्वरम्", "उतामृतत्व स्येशानः", "पतिं विश्वस्यात्मेश्वरम्", "ईशानो भूत भव्यस्य" इत्याद्याः श्रुतयः। "ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति", "अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्", "ईशानः प्राणदः प्राणः" इत्याद्याः श्रुतयोऽप्य भिप्रेता इति मन्तव्यम्॥ १९॥

पूर्वश्लोकोक्तमर्थं विवृणोति -

*आत्मेश्वरोऽसि न परोऽस्ति तवेश्वरोऽन्यो*
*विश्वस्यचाधिपति रस्य परायणञ्च।*
*नारायणाच्युत, परस्त्वमिहैक एव*
*ब्रह्मादयोऽपि भवदीक्षणलब्धसत्ताः॥ २०॥*

आत्मेति। हे नारायण "आपो नारा इति प्रोक्ता आपो वै नारसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" इत्यादिनिर्वचनप्रकारेण नारशब्दवाच्यचेतनाचेतनान्तर्यामिन् अच्युत, चेतनस्य देवादिशरीरात्मकत्वेऽपि च्यवनमस्ति; तद्रहित इत्यर्थः। इह परः परतत्त्वभूतः त्वमेक एव आत्मेश्वरोऽसि नियन्ताऽसि, अन्तर्यामित्वफलं नियमन मिति भावः। तव अन्यः इतरः परः उत्कृष्टः ईश्वरः नास्ति। विश्वस्य अधिपतिः प्राप्यश्चाऽसि अस्य परायणं शरणं प्रापकश्चाऽसि। ब्रह्मादीना

मपि ईश्वरत्वं क्वचित्क्वचिद्दृश्यत इत्यत्राऽऽह - ब्रह्मादयोऽपि भवदीक्षणेन लब्धा सत्ता उत्पत्ति र्येषां ते तथोक्ता भवन्ति। "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै", "ब्रह्मणः पुत्त्राय ज्येष्ठाय श्रेष्ठाय विरूपाक्षाय" इत्यादिक मभिप्रेतम्॥ २०॥

***नित्य स्समाभ्यधिकवर्जित ऊर्जित श्री-***
***र्नित्येऽक्षरे दिवि वस न्पुरुषः पुराणः।***
***सत्त्वप्रवर्तनकरो जगतोऽस्य मूलं***
***नाऽन्य स्त्व दस्ति धरणीधर वेदवेद्यः॥ २१॥***

नित्य इति। हे धरणीधर, इद मुपलक्षणं, विभूतिद्वयनिर्वाहकेत्यर्थः। त्व मेक एव इति पूर्वश्लोका दनुषङ्गः। नित्यः कालापरिच्छिन्नः इतरेषां नित्यत्वे सत्यपि तत् भगवदिच्छायत्त मिति भावः। समाभ्यधिकवर्जितः वस्तुपरिच्छेदरहित इत्यर्थः। ऊर्जिता सत्यज्ञानादिभ्योऽपि स्वरूप-निरूपकत्वाद्दार्ढ्यवती श्रीः यस्य तथोक्तः, भगवद्यामुनमुनिभिः "कः श्रीःश्रियः" इति प्रथमत एवोदाहृतत्वा दिति भावः। नित्ये त्रैकालिके अक्षरे कालकृतपरिणामरहिते दिवि परमाकाश परमव्योमशब्दवाच्ये परमपदे इति शेषः। वसन् अस्य जगतः लीलाविभूतेः मूलं कारणं, सत्त्वप्रवर्तनकरः सत्त्वकार्यपालनकर इत्यर्थः, पुराणः पुरुषः पुरुषोत्तमोऽसि। त्वत् भवतः अन्यः वेदवेद्यो नाऽस्ति। नित्यत्वादिविशिष्ट पुराणपुरुषत्वेन श्रुतिप्रतिपाद्यपुरुषान्तरं नास्तीत्यर्थः। अत्र "नित्यो नित्यानां चेतन श्चेतनानां", "न तत्समश्चाऽभ्यधिकश्च दृश्यते", "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ", "तदक्षरे परमे व्योमन्", "यो वेद निहितं गुहायाम् परमे व्योमन्", "यतो वा इमानि भूतानि जायन्ते", "महान् प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः", "सर्वे वेदा यत्पद मामनन्ति" इत्यादिक मनुसन्धेयम्॥ २१॥

*यं भूतभव्यभवदीश मनीश माहु -*
*रन्तस्समुद्रनिलयं य मनन्तरूपम् ।*
*यस्य त्रिलोकजननी महिषी च लक्ष्मी -*
*स्साक्षात्स एव पुरुषोऽसि सहस्रमूर्धा ॥ २२ ॥*

यमिति । भूतभव्यभवतां भूतभविष्यद्वर्तमानकालिकानामीशम् । अनीशां न विद्यते ईशो यस्य तथोक्तमाहुः वदन्ति, श्रुतय इति शेषः । यम् अन्तस्समुद्रनिलयं क्षीराब्धिशायिनम्, अनन्तरूपम्, अतएव अपरिमितावतारविग्रह ञ्चाऽऽहुः । अत्र क्षीराब्धिनाथस्य अवतारकन्दत्वं गर्भितम् । यस्य महिषी लक्ष्मीश्च त्रिलोकजननी सकलजगन्माता भवतीति शेषः । साक्षा त्सहस्रं मूर्धानो यस्य स तथोक्तः स पुरुष एवाऽसि तादृश एव पुरुषोऽसीत्यर्थः । अत्र "ईशानो भूतभव्यस्य", "न तस्येशे कश्चन", "यमन्तस्समुद्रे कवयो वदन्ति", "तदेक मव्यक्त मनन्तरूपम्", "मातरं पद्ममालिनीम् श्रियं वासय", "सहस्रशीर्षा पुरुषः" इति श्रुतयः क्रमेणानुसन्धेयाः ॥ २२ ॥

अनन्तरोक्तं पुरुषसूक्तप्रतिपाद्यत्व मेवाऽऽह -

*सर्वश्रुति ष्वनुगतं स्थिर मप्रकम्प्यं*
*नारायणाह्वयधरं त्वमिवानवद्यम् ।*
*सूक्तन्तु पौरुष मशेषजगत्पवित्रं*
*त्वा मुत्तमं पुरुष मीश मुदाजहार ॥ २३ ॥*

सर्वेति । त्वमिव सर्वश्रुतिषु ऋग्यजुस्सामसु अनुगतं पठितमित्यर्थः । तदुक्तम् - "ऋग्वेदे षोडशर्चं स्यात् यजुष्वष्टादशार्चकम्, सामवेदेषु सप्तर्चं तथा वाजसनेयके" इति । स्थिरं सर्वै र्वादिभिरपि भगवत्परतयाऽङ्गीकृतम्, अप्रकम्प्यं कुतर्कै र्दैवतान्तरपरतया चालयितु मशक्यं, नारायणाह्वयधरं नारायणसूक्तमित्यपि अस्य नामान्तरमस्ति; तदुक्त मापस्तम्बेत" ब्रह्ममेधे नारायणाभ्या मुपस्थानम्" इति । अत्र "अद्भ्य स्सम्भूतः" इत्यनुवाकस्य

पुरुषसूक्तशेषभूतत्वात् अनुवाकद्वयाभिप्रायेण द्विवचनप्रयोग इत्यनवद्यम्। "वेदेषु पौरुषं सूक्तं धर्मशास्त्रेषु मानवम्। भारते भगवद्गीता पुराणेषु च वैष्णवम्" इति श्रुतिसारांशतयोक्तमित्यर्थः। अशेषजगतां पवित्रं पावनत्वकरं पौरुषं सूक्तं तु, तु शब्दः परत्वपरप्रमाणान्तरेभ्यो वैशिष्ट्यद्योतनार्थः। ईशं त्वा मुत्तमं पुरुष मुदाजहार प्रत्यपादयत्। "वेदाऽह मेतं पुरुषं महान्तम्" इति महापुरुषत्वकण्ठोक्ता वपि एतद्विवरणरूपस्य "उत्तमः पुरुष स्त्वन्यः परमा त्मेत्युदाहृतः। यो लोकत्रय माविश्य बिभर्त्यव्यय ईश्वरः" इति गीता वाक्यस्यानुगुण्यात्, उत्तमं पुरुष मुदाजहारेति मन्तव्यम्। अत्राशेषविशेषणेनाऽपि भगवत्परत्व मप्यभिप्रेतम्॥ २३॥

*आनन्द मैश्वर मवाङ्मनसावगाह्य-*
*माम्नासिषु श्शतगुणोत्तरितक्रमेण।*
*सोऽयं तवैव नृषु हित्व मिहान्तरात्मा*
*त्वं पुण्डरीकनयनः पुरुषश्च पौष्णः॥ २४॥*

आनन्दमिति। ऐश्वरं ईश्वरत्वप्रयुक्त मानन्दं शतगुणेन उत्तरितः सञ्जातोत्तरः वक्ष्यमाणानन्दो यस्य तेन क्रमेण। "तदस्य सञ्जातं तारकादिभ्य इतच्" इतीतच् प्रत्ययः। अवाङ्मनसावगाह्यम् अवाङ्मनस इति "अचतु" रेत्यादिना निपातना त्साधुः। वाङ्मनसापरिच्छेद्यम्। "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह" इति श्रुत्युक्तप्रकारं आम्नासिषुः आम्नानं पुनःपुन रभ्यासं चक्रुः, श्रुतय इति शेषः। सोऽय मानन्दः तवैव त्वदीय एव। हि यस्मात्कारणात् इह प्रकरणे नृषु त्वं अन्तरात्मा अन्तर्यामी, वर्तसे इति शेषः। अय मभिप्रायः - "प्राणमय मनोमयाभ्या मनन्तरं विज्ञानमयं प्रतिपाद्य "तस्यैष एव शारीर आत्मा" इति विज्ञानमयस्य जीवस्य आनन्दमय एव अन्तरात्मेत्युक्ते रिति, "स यश्चाऽयं पुरुषे, यश्चासावादित्ये" इति तत्रोक्तमेव श्रुत्यन्तरेण विवृणोति त्वमिति। पुण्डरीकनयनः पौष्णः पूष्ण स्सम्बन्धी, आदित्यमण्डलान्तर्वर्तिपुरुषश्च

त्वं भवसीति शेषः। तथा चान्दोग्ये - "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखा त्सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेव मक्षिणी तस्य उदिति नाम, एष हि सर्वेभ्यः पाप्मभ्यः उदित" इति॥ २४॥

*यन्मूलकारण मबुध्यत सृष्टिवाक्यै*
*र्ब्रह्मेति वा सदिति वाऽऽत्मगिराऽथवा तत्।*
*नारायण स्त्विति महोपनिषद्ब्रवीति*
*सौबालिकीप्रभृतयोऽप्यनुजम्भुरेनाम्॥ २५॥*

यदिति। यत् वस्तु मूलकारणं प्राथमिककारण मुपादानकारणम् अबुध्यत ज्ञातम्। "सदिति वा, ब्रह्मेति वा अथ आत्म इति गिरा वा सृष्टिवाक्यैः, "सदेव सोम्येद मग्र आसीत्, ब्रह्म वा इदमेक मेवाऽग्रआसीत्, आत्मा वा इदमेक एवाऽग्र आसीत्" इति कारणवाक्यैः प्रतिपादितमित्यर्थः। महोपनिषत् तत् मूलकारणं नारायण इति ब्रवीति। इदं हि महोपनिषद्वाक्यम्- "एको ह वै नारायण आसीत्, न ब्रह्मा ने शानः" इति। सुबालस्य सम्बन्धिनी सौबालिकी सुबालोपनिषत्प्रभृतयोऽपि एनां महोपनिषद मनुजग्मुः अनुसृतवत्यः। "य आत्मनि तिष्ठन् आत्मान मन्तरो यमयति य मात्मा नवेद, एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इति सुबालोपनिषत्। प्रभृतिशब्देन- "पुरुष एवेदं सर्वम् यद्भूतं यच्च भव्यम्", "धाता यथापूर्व मकल्पयत्", "विश्व मे वेदं पुरुष स्तद्विश्वमुपजीवति" इत्याद्या विवक्षिताः॥ २५॥

पूर्वोक्त मर्थं विवृणोति-

*ज्योतिः परं परमतत्त्व मथो परात्मा*
*ब्रह्मेति च श्रुतिषु यत्परव स्त्वधीतम्।*
*नारायण स्तदिति तद्विशिनष्टि काचि-*
*द्विष्णोः पदं परम मित्यपरा गृणाति॥ २६॥*

ज्योति रिति। श्रुतिषु, बह्वीष्विितिभावः, परमतत्त्वं परं ज्योतिः परं ब्रह्म, अथो अनन्तरं परात्मेति च यत् परवस्तु परमुत्कृष्टं "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्युक्तमित्यर्थः। वस्तु, न त्वौत्प्रेक्षिक मिति भावः। अधीतं सम्प्रदायाविच्छेदेन ज्ञातम्, तत् प्रसिद्धं तत् वस्तु नारायण इति काचित् नारायणानुवाक समाख्याश्रुतिः विशिनष्टि विवृणोति। "नारायण परं ब्रह्म तत्त्वं नारायणः परः, नारायण परो ज्योति रात्मा नारायणः परः" इति भावः। अपरा कठवल्ली तद्वस्तु विष्णोः परमं पदम् इति गृणाति वदति। पद्यते इति पदं, उपास्यं प्राप्यञ्च स्वरूप मित्यर्थः। "विज्ञापन सारथि र्यस्तु मनः प्रग्रहवान्नरः, सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद" मित्यादिनेति भावः। विष्णोः पदमिति निर्देशः आत्मनः स्वरूपमितिवत् औपचारिकः॥ २६॥

इदानीं वस्तुसामर्थ्या दपि परत्वं प्रतिपादयति-

*सन्तीदृशः श्रुतिशिरस्सु परस्सहस्रा-*
*वाच स्तव प्रथयितुं परमेशितृत्वम्।*
*किञ्चेह न व्यजगणः कृमिधातुभेदं*
*क्रामञ्जगन्ति निगिरन्पुनरुद्गिरं श्च॥ २७॥*

सन्तीति। तव परमेशितृत्वं "तमीश्वराणां परमं महेश्वरम्" इत्युक्तं सर्वेश्वरत्वं प्रथयितुं श्रुतिशिरस्सु सहस्रात्पराः परस्सहस्राः ईदृशः पूर्वोदाहृतश्रुतिसदृश्यः वाचः वाक्यानि सन्ति वर्तन्ते। किञ्च, जगन्ति क्रामन् त्रिविक्रमावतार इति भावः। जगन्ति निगिरन् आन्दोलयन्, प्रलये इति भावः, पुन रुद्गिरन् वमंश्च, सृष्टा विति भावः। त्वं कृमिधातृभेदं अयं कीटः, अयं चतुर्मुख इति विशेषम् इह क्रमणादिषु न व्यजगणः न विचारितवान्। विपूर्वात् गण सङ्ख्याने इति धातोः णौचङि अभ्यासे कृते लुङ्मध्यमैकवचने रूपम्। त्रिविक्रमावतारे भगवच्चरणस्य सत्यलोका दप्यूर्ध्वगमनं सुप्रसिद्धम्। सृष्टौ भगवन्नाभिपद्मात् ब्रह्मण उत्पत्तेः प्रलयेऽपि निगिरण मर्थसिद्ध मिति भावः॥ २७॥

ब्रह्मविदां तत्त्वनिर्णयोपायप्रकार माह -

*रूपश्रिया परमया परमेण धाम्ना*
*चित्रैश्च कैश्चि दुचितै र्भवतश्चरित्रैः ।*
*चिह्नैरनिह्नवपरै रपरैश्च कैश्चि-*
*न्निश्चिन्वते त्वयि विपश्चित ईशितृत्वम् ॥ २८ ॥*

रूपेति। विपश्चितः ब्रह्मविदः। विविधं पश्यच्चित्त्वं विपश्चित्व मिति निर्वचनम्। स्वरूपतः स्वभावतश्च (तत्त्व) त्रय मपि विविच्य जानन्त इति निष्कृष्टार्थः। भवतः परमया रूपस्य स्वरूपस्य विग्रहस्य वा श्रिया। उभयत्र प्रमाणम् - "तस्य भासा सर्वमिदं विभाति", दिवि सूर्य सहस्रस्य भवेद्युगपदुत्थिता। यदि भाः, सदृशी सा स्याद्भास स्तस्य महात्मनः" इति। परमेणधाम्ना स्थानेन ""आदित्यवर्णं तमसः परस्तात्", "तदक्षरे परमे व्योमन्", "योऽस्याध्यक्षः परमे व्योमन्" इत्यादि। चित्रैः आश्चर्यावहैः उचितैः महिमानुगुणैः कैश्चिच्चरित्रैश्च सकलजगत्कारणादिभिः। अयमर्थः- "वेदापहार गुरुपातक दैत्यपीडा द्यापद्विमोचने" ति श्लोके स्फुटतरः। अवतारेष्वपि स्तम्भाविर्भाव हिरण्यनिबर्हण सेतुनिर्माण चराचरमोक्षप्रदान गोवर्धनोद्धरण गीतोपदेशादीनि चरित्राणि सन्ति। निह्नवः अपलापः तत्परा न भवन्तीति तथोक्तैः, परत्वनिर्णयैकतत्परैरित्यर्थः। कैश्चित् प्रत्येकं तत्त्वनिर्णयशक्तै रिति भावः। अपरै श्चिह्नैश्च लक्ष्मीपतित्व शेषशायित्व वैनतेयवाहनत्व तुलसीदामत्वादिलक्षणैश्च त्वयि ईशितृत्वं सर्वेश्वरत्वं निश्चिन्वते निश्चयं कुर्वन्ति ॥ २८ ॥

तेषु चिह्नेषु लक्ष्मीपतित्वस्य सर्वोत्तरत्व माह-

*यस्याः कटाक्षण मनुक्षण मीश्वराणा-*
*मैश्वर्यहेतुरिति सर्वजनीन मेतत्।*
*तां श्रीरिति त्वदुपसंश्रयणा न्निराहु-*
*स्त्वाञ्च श्रियः श्रियमुदाहु रुदारवाचः ॥ २९ ॥*

यस्या इति। यस्याः लक्ष्म्याः कटाक्षणं कटाक्षः ईश्वराणां इन्द्रादीनां ऐश्वर्यस्य हेतु रिति कारणमिति एतत् सर्वजनीनं, सर्वजनप्रसिद्धमिति यावत्। तां तादृशीं श्रियं त्वदुपसंश्रयणात् हेतोः श्रीरिति श्रयते इति श्रीः इत्यवयव शक्त्या श्रीनामधेयेति निराहुः निरुक्तिं कुर्वन्ति, उदारवाचः विपश्चि इत्यर्थः। त्वां श्रियः श्रियम् उदाहुः उदाहरन्ति। तदुक्तं श्रीरामायणे- "श्रियः श्रीश्चभवे दग्र्या कीर्तेः कीर्तिः क्षमाक्षमा" इति। स्तोत्ररत्ने च - "कः श्रीः श्रियः" इति च॥ २९॥

इतरेषा मेतादृशप्रमाणगणश्रवणं नास्ति वा इति शङ्कायामाह -

*माया त्वया गुणमयी किल या निसृष्टा*
*सा ते विभो किमिव नर्म न निर्मिमीते।*
*कौतस्कुताः स्थिरकुतर्कवशेन केचि-*
*त्सत्यां श्रुतौ च बधिरा स्त्वयि तन्महिम्ना॥ ३०॥*

मायेति। हे विभो ! सर्वेश्वर, त्वया गुणमयी सत्त्वरजस्तमोमयी "अजा मेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्" इति श्रुतिः। "सत्त्वं रज स्तम इति गुणाः प्रकृतिसम्भवाः" इति गीतावचनम्। या माया प्रकृतिः "मायान्तु प्रकृतिं विद्या न्मायिन न्तु महेश्वरम्" इति श्रुतेः। निसृष्टा देहेन्द्रियादित्वेन प्रयुक्ता सा माया ते भवतः किमिव नर्म न निर्मिमीते, सकलां लीलां कलयतीत्यर्थः। किलेति मायाया भगवल्लीलोप-करणत्वप्रसिद्धौ। केचित् नाम ग्रहणानर्हा इति भावः। कौतस्कुताः कुतः कुत इति वदन्तः कुयुक्ति मात्रैकशरणा इति भावः। स्थिराः प्रमाणाननुगुणत्वेऽपि आग्रहपरिगृहीताश्च ते कुतर्काश्च तेषां वशेन तदेकशरणतयेति भावः। त्वयि, श्रुतौ सत्याञ्च भगवत्पारम्य पर श्रुतिशते सत्यपीत्यर्थः। तस्या मायाया महिम्ना वधिराः तादृशप्रमाणश्रवणेऽप्य-पटुकरणाः, भवन्तीति शेषः। "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मा मेव ये प्रपद्यन्ते माया मेतां तरन्ति ते" इत्यादिक मनुसन्धेयम्॥ ३०॥

कौतस्कुतानां मायिनां प्रलापप्रकार माह-

*यः स्थावरक्रिमिपतङ्गमतङ्गजाति-*
*ष्वन्येषु जन्तुषु सदैव विजायमानः ।*
*त्वं नित्य निर्मल निरञ्जन निर्विकार*
*कल्याणसद्गुणनिधे स इतीरित स्तैः ॥ ३१ ॥*

य इति । तैः बधिरैः, हे नित्य "नित्यो नित्यानां चेतनश्चेतनानाम्" इति श्रुतिप्रतिपादित, निर्मल हेयप्रतिभट, नित्यनिर्मलेत्येकं पदं वा, निरञ्जन चेतनानुप्रवेशकृतकर्मवश्यतादिसङ्गरहित, निर्विकार अचिदनुप्रवेशकृत-परिणाम रहित, कल्याणाः स्वानुसन्धातॄणा मपि शुभावहाः, सन्तः [1]चिर मुपासनार्थमारोपिता इति भावः, ये गुणाः तेषां निधे, निधित्वरूपणेन गुणानां निरवधिकत्वमक्षयत्वं च सूचितम् । सम्बुद्ध्य स्सर्वा स्साभिप्रायाः । "अपहतपाप्माविजरो विमृत्यु र्विशोको विजिघत्सोऽपिपास स्सत्यकामस्सत्य सङ्कल्पः" इत्युक्तमुभयलिङ्गत्वं विवक्षितम् । यः चेतनः, स्थावराः अजङ्गमाः, क्रिमयः कीटाः, पतङ्गाः पक्षिणः, मतङ्गजाः करिणः-मृगाणा मुपलक्षण मिदम् ते आदि र्येषां तेषु आदिशब्देनानुक्ताः जन्तुजातिभेदाः गृह्यन्ते । अन्येषु त्वत्स्वरूपस्वभाव वैजात्यवत्स्वित्यर्थः । जन्तुषु जन्तुशरीरे ष्वित्यर्थः, सदैव निरन्तरं विजायमानो विविधं जायमानो भवति, स एव त्वमिति "परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति" इत्युक्तप्रकारेण ब्रह्मैव स्वमायया मोहितं जीव इति ईरितः । हेयप्रत्यनीकत्व कल्याणगुणकरत्व रूपोभयलिङ्गविशिष्टस्य तव कर्मवश्यत्वा दत्यन्तहेयतार्हजीवभावकथनमनुचित मिति भावः ॥ ३१ ॥

*त्वद्दृष्टिजुष्ट मिद माविरभू दशेषं*
*नोचेत्कटाक्षयसि नैव भवेत्प्रवृत्तिः ।*

---

1. नतूपासनार्थ मारोपिताः - इति पाठो भवेदित्यूह्यते ।

*स्थातुं च वाञ्छति जगत्तव दृष्टिपातं*
*तेन श्रुतौ जगदिषे हि जगत्त्वमेव ॥ ३२ ॥*

त्वदिति। इदं "स देव सोम्येदमग्र आसीत्", "तमः परे देव एकी भवति" इत्युक्तप्रकारेण प्रलये विभागानर्हातिसूक्ष्मदशापन्नमिदम्। इदं शब्दः 'सदेवे'ति वाक्यस्थः। त्वद्दृष्ट्या त्वत्सङ्कल्परूपज्ञानेन जुष्टं युक्तं, "तदैक्षत बहु स्याम्" इति सङ्कल्पविषयं सत् इत्यर्थः। अशेषम् "इदं सर्व मसृजत" इति वत्कृत्स्नं चिदचिदात्मकप्रपञ्चजातमाविरभूत् आविर्भावं प्राप्तम्। आविरभू दित्यनेन प्रलयेऽपि सूक्ष्मतया स्थिति स्सिद्धा। नो कटाक्षयसिचेत् कटाक्षलक्ष्यं न करोषि यदि प्रवृत्तिः आविर्भावरूपा नैव भवेत्। एवकारः प्रसिद्धिसूचकः। नोचे दिति व्यतिरेकोक्तिः, "नाऽवेक्षसे यदि ततो भुवना न्यमूनि नाऽलं प्रभो भवितुमेव" इति श्लोकार्थज्ञापनार्था। जगत्स्थातुं स्थित्यर्थं, दृष्टिपातंकटाक्षं, चकारा दनुप्रवेशश्च सृष्ट्यनन्तर-भाविनमिति यावत्। "अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा, तत्सृष्ट्वा तदेवानुप्राविशत्, तदनुप्रविश्य, सच्चत्यच्चाऽभवत्" इत्यादिषूक्तं वाञ्छति इच्छति, अनुप्रवेशसङ्कल्पाभ्यामेव स्थिति र्भवतीति यावत्। तेन हेतुना श्रुतौ त्वमेव जगत् जगदिषे उच्यसे हि। गदव्यक्तायां वाचि इति धातोः कर्मणि लिण्मध्यमपुरुषैकवचनम्। प्रलयदशायां सूक्ष्मचिदचिद्विशिष्टतया सच्छब्दवाच्यस्य भवतः 'बहु स्या' मिति सङ्कल्पपूर्वकपरिणामात्, स्थित्यर्थानुप्रवेशा च्च। "सर्वं खल्विदं ब्रह्म", "ऐतदात्म्यमिदं सर्वम्" इत्यादि श्रुतिभि श्शरीरवाचिशब्दानां शरीरिपर्यन्ताभिप्रायत्वशक्त्या त्वमेव जगदित्युच्यसे इति भावः ॥ ३२ ॥

पूर्वोक्तमेव विवृणोति-

*एव म्भगो इह भवत्परतन्त्र एव*
*शब्दोऽपि रूपवदमुष्य चराचरस्य।*
*ऐश्वर्य मीदृश मिदं श्रुतिषूदितं ते*
*पापीयसा मय महो त्वयि मोहहेतुः ॥ ३३ ॥*

एव मिति । हे भगो भगवन्, "विभाषा भवद्भगवदघवता मोच्चाऽवस्य" इति रूपसिद्धिः। अमुष्य परिदृश्यमानस्य चराचरस्य शब्दो नामापि रूपवत् स्वरूपवत् । एवं "अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इत्यनुप्रवेशकार्यत्वेन इह सामानाधिकरण्ये भवत्परतन्त्र एव, "सर्वं खल्विदं ब्रह्म", "ज्योतींषि विष्णु र्भुवनानि विष्णुः" इति समानाधिकरणशब्दा अपि भवदात्मकत्वनिबन्धना एवेति भावः। ते तव इद मैश्वर्यं उपादानकारणत्वे सति निमित्तकारणत्वरूप मैश्वर्यं नाम गुणः श्रुतिषूदितं बहुश्रुतिप्रतिपादितम् । अयमैश्वर्यगुणः, पापीयसां जायमान सङ्कल्प काल कटाक्षहेतु सुकृताभावेऽपि "पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसा तमसा चाऽस्य मानसं समभिप्लुतम्" इत्युक्तदेवतान्तर निरीक्षणानुगुणपापप्राचुर्यवता मित्यर्थः, त्वयि विषये, मोहहेतुः मृत् घटः इतिवत् प्रपञ्चाभेदभ्रमहेतु रित्यर्थः । अहो आश्चर्ये; घण्टापथेऽपि भ्रमन्तीति भावः ॥ ३३ ॥

अन्यत्रापीश्वरशब्दप्रयोगस्य उपपत्ति माह-

*ये त्वत्कटाक्ष लवलक्ष्यमिव क्षणं तै-*
*रैश्वर्य मीदृश मलभ्य मलम्भि पुम्भिः ।*
*यत्केऽपि सञ्जगरिरे परमेशितृत्वं*
*तेषा मपि श्रुतिषु तन्महिमप्रसङ्गात् ॥ ३४ ॥*

ये पुमांसः क्षणकालमात्रं त्वत्कटाक्षे लवलेशमात्रस्य लक्ष्य मिव लक्ष्यभूता इव । इवशब्दः अनादरसूचकः । अभव न्नितिशेषः । तैः पुम्भिरलभ्यं इतरदुर्लभम् ईदृशं जगत्स्रष्टृत्वरूप मैश्वर्यं अलम्भि प्राप्तम् । लभेश्च, "विभाषा चिण्णमुलो" रिति विकल्पेन नुमागमः । यत् यस्मात्कारणात्, केऽपि पुरुषाः, तेषामपि पुंसां तन्महिमप्रसङ्गात् तादृशैश्वर्यातिशयानुषङ्गात् परमेशितृत्वं सर्वाधिक मीश्वरत्वं श्रुतिषु "हिरण्यगर्भ स्समवर्तताग्रे" इत्याद्यासु प्रतिपादित मिति शेषः॥ सञ्जगरिरे

उक्तवन्तः । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै", "प्राजापत्यं त्वया कर्म सर्वम्मयि निवेशितम्" इति श्रुतिस्मृत्यो र्विद्यमानत्वात् भगवदनुग्रहायत्तस्रष्टृत्वादिशक्तौ ब्रह्मणः प्रतिपादितायां सत्यां तदर्वाचीनाना मैश्वर्यस्य भगवदायत्तत्वे कैमुतिकन्यायावतारा च्च, तत् त्वत्कटाक्षलक्ष्यत्वनिबन्धन मिति भावः ॥ ३४ ॥

*नित्येषु वस्तुषु भवन्निरपेक्ष मेव*
*तत्तत्स्वरूप मितिकेचि दिह भ्रमन्तः ।*
*ऐश्वर्य मत्र तव सावधि सङ्गिरन्ते*
*ब्रूते त्रयी तु निरुपाधिक मीशनन्ते ॥ ३५ ॥*

नित्येष्विति । इहलोके भ्रमन्तः तत्तद्विषये नित्यत्वभ्रमवन्तः केचित् नित्येषु वस्तुषु तत्तत्स्वरूपं तत्तन्नित्यवस्तुस्वरूप मित्यर्थः । भवन्निरपेक्षं त्वत्कटाक्षानपेक्षं, त्वत्सङ्कल्पानपेक्ष मिति यावत् । स्वतस्सिद्ध मिति मत्वेति शेषः । अत्र जगत्कारणत्वे तव ऐश्वर्यं सावधि नित्यवस्तुव्यतिरिक्त विषय मिति सङ्गिरन्ते वदन्ति । त्रयी तु ते ईशन मैश्वर्यं निरुपाधिकं स्वाभाविकं ब्रूते वदति । "पतिं विश्वस्यात्मेश्वरं शाश्वतं शिव मच्युतम्", "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः", पराऽस्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्याद्याः श्रुतय इति भावः ॥ ३५ ॥

नित्यानां भगवदायत्तसत्ताकत्वं कथमिति शङ्काया माह -

*इच्छात एव तव विश्वपदार्थसत्ता*
*नित्यं प्रिया स्तव तु केचन ते हि नित्याः ।*
*नित्यं त्वदेकपरतन्त्रनिजस्वरूपाः*
*भावत्कमङ्गल गुणा हि निदर्शनन्नः ॥ ३६ ॥*

इच्छात इति । विश्वपदार्थानां नित्यानित्यवस्तूनां सत्ता उत्पत्तिः तव

इच्छात एव सिसृक्षारूपसङ्कल्पा देव। तर्हि नित्यत्वव्याघात इत्यत्राऽऽह-नित्यमिति । तु विशेषोऽस्ति । केचनपदार्थाः तव नित्यं प्रियाः नित्यतयाऽपेक्षिताः अभवन्निति शेषः, ते हि नित्याः । हीति प्रसिद्धिः । अत्र दृष्टान्त उच्यते उत्तरार्धेन। हि यस्मात्कारणात् नित्यं त्वदेकपरतन्त्रं, एकशब्देन अन्यपारतन्त्र्यं व्यवच्छिद्यते। तवैव परतन्त्रं निजं स्वरूपं येषान्ते तथोक्ताः । भावत्काः भवदीया श्च ते मङ्गलगुणाः नः अस्माकं निदर्शनं दृष्टान्तः। तस्मात् नित्यानां सत्ताऽपि त्वत्सङ्कल्पायत्तेति भावः। "सत्यकाम स्सत्यसङ्कल्पः", "यस्सर्वज्ञ स्सर्ववित्" इति गुणानां नित्यतया प्रतिपादितत्वात्, गुणानां गुण्यायत्तसत्ताकत्वाच्च निदर्शनत्वोक्ति रिति मन्तव्यम् ॥ ३६ ॥

भगवत एव जगदुपादानकारणत्वे निर्विकारश्रुतेः का गति रित्याशङ्क्याऽऽह-

***विश्वस्य विश्वविधकारण मच्युत त्वं***
***कार्यं तदेत दखिलं चिदचित्स्वरूपम्।***
***त्वं निर्विकार इति वेदशिरस्सु घोषो***
***निस्सीम मेव तव दर्शयतीशितृत्वम् ॥ ३७ ॥***

विश्वस्येति। हे अच्युत, त्वं, इतरेषां च्यवनधर्मवत्त्वात् जगत्कारणत्वं न सम्भवतीति भावः। विश्वस्य कृत्स्नस्य विश्वविधञ्च तत्कारणं, भवसीति शेषः। अखिलं सर्वं तत् प्रसिद्धं एतत् प्रत्यक्षं चिदचित्स्वरूपं तव कार्यम्। कारणस्य सर्वविधत्वम् - उपादानत्वं, निमित्तत्वं, सहकारित्वं च । भगवतोऽपि सूक्ष्मचिदचिद्विशिष्टवेषेणोपादानत्वं, 'बहु स्या' मिति सङ्कल्पविशिष्टवेषेण निमित्तत्वं, कालादिविशिष्टवेषेण सहकारित्वम् - इति विभागः । वेदशिरस्सु वेदान्तेषु त्वं निर्विकारः विकाररहितः इति घोषः प्रवादः निस्सीमं निरवधिकं तव ईशितृत्व मेव दर्शयति प्रकाशयति। अत्र ईशितृत्व शब्देन षाड्गुण्यपूर्णता विवक्षिता। वीर्यगुणकार्यत्वात्,

निर्विकारत्वस्य'' स्वयमविकृतत्वे सति इतरेषां विकारहेतुत्वं वीर्यम्'' इति निर्वचनम् ॥ ३७ ॥

इदानीं लौकिकघटादिनिर्मातृदृष्टान्तनिबन्धनशङ्कां परिहरति -

*किं साधनः क्व निवस न्कि मुपाददानः*
*कस्मै फलाय सृजतीश इदं समस्तम्।*
*इत्याद्यनिष्ठितकुतर्क मतर्कयन्त -*
*स्त्वद्वैभवं श्रुतिविदो विदुरप्रतर्क्यम् ॥ ३८ ॥*

किमिति। श्रुतिविदः वेदान्ततात्पर्यविदः इत्यर्थः। ईश स्सर्वेश्वरः किं साधन मस्येति किं साधनः कुलालस्य घटनिर्माणे दण्डचक्रादिसाधनं दृष्टं, तद्वत् जगन्निर्माणे ईश्वरस्य साधनं किमिति भावः। क्व निवसन् कुत्र वसन् सन्नित्यर्थः, किं वस्तु उपाददानः मृत्पिण्डवत् कि मुपादानद्रव्यतया गृह्णन् सन् कस्मै फलाय, घटनिर्माण मुदकाहरणाय, तद्वत् कस्मै प्रयोजनाय समस्त मिदं सृजति इत्यादिः अनिष्ठितः क्वचिदप्यप्रतिष्ठितश्च यः कुतर्कः तर्काभासः तम्, आदिशब्देन नामरूपादिविचारो गृह्यते, अतर्कयन्तः अचिन्तयन्त स्सन्तः त्वद्वैभवं अप्रतर्क्यं लौकिकदृष्टान्तनिबन्धनाक्षेपानर्हं विदुः ज्ञातवन्तः। तथा च श्रुतयः ''पराऽस्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' इत्याद्याः ॥ ३८ ॥

एवमप्यवाप्तसमस्तकामस्य फलापेक्षासम्भवात् 'प्रयोजन मनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायात् सृष्ट्यादि प्रवृत्तिः कथ मित्याशङ्काया माह -

*यत्संवृतं दशगुणोत्तरसप्ततत्त्वै -*
*रन्डं चतुर्दशजगद्भवधातृधाम।*
*अण्डानि तत्सुसदृशानि परश्शतानि*
*क्रीडाविधे स्तव परिच्छदता मगच्छन् ॥ ३९ ॥*

यदिति । दशगुणोत्तरैः पूर्वपूर्वतत्त्वापेक्षया उत्तरोत्तरदशगुणैः सप्तसङ्ख्याकै स्तत्त्वैः पृथिव्यप्तेजोवाय्वाकाशाहङ्कार महदाख्यैः तत्त्वैः संवृतं वेष्टितं चतुर्दशसंख्याकानि जगन्ति यस्मिन् तत्, भवधात्रोः शिवचतुर्मुखयोः धाम वासस्थानं, तयोः अण्डान्तर्वर्तिचेतनप्रधानत्वा दिति भावः । यत् अण्डं तस्य सुतरां सदृशानि परश्शतानि अण्डानि च तव क्रीडाविधेः लीलाविधानस्य परिच्छदतां उपकरणतां अगच्छन् प्रापुः । असंख्याताण्डनिर्माणस्य प्रयोजनं केवललीलैवेति भावः ॥ ३९ ॥

अथ पूर्वोक्तमर्थ मनूद्य विशिंषन् नित्यविभूतियोग माह -

*इच्छाविहारविधये विहिता न्यमूनि*
*स्यात्त्वद्विभूतिलवलेशकलायुतांशः ।*
*या वै न जातु परिणामपदास्पदं सा*
*कालातिगा तव परा महती विभूतिः ॥ ४० ॥*

इच्छेति । इच्छविहारविधये स्वैरलीलाविधानाय विहितानि सृष्टानि अमून्यण्डानि त्वद्विभूतेः त्वन्महिम्नः यो लवः तस्य यो लेशः तस्य या कला अंशः तस्य अयुतांशः दशसहस्रतमांशः स्यात् । "कस्यायुतायुत शतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम्" इति स्तोत्ररत्नार्थोऽनुसंहितः । या विभूतिः जातु कदाऽपि परिणामपदास्पदं परिणमते इति व्यवहारास्पदं न भवति । कालातिगा काल कृतपरिणामवत्त्व मतिक्रान्ता, परा अन्या विभूतिः महती । "पादोऽस्य विश्वा भूतानि त्रिपादस्या मृतं दिवि" इति श्रुते रिति भावः ॥ ४० ॥

अथ पञ्चभिः श्लोकैः परमपद मेव वर्णयति -

*यद्वैष्णवं हि परमं पद मामनन्ति*
*खं वा यदेव परमं तमसः परस्तात् ।*
*तेजोमयं परमसत्त्वमयं ध्रुवं य -*
*दानन्दकन्द मतिसुन्दर मद्भुतं यत् ॥ ४१ ॥*

यदिति। यत् - यच्छब्दानां "वैकुण्ठनाम तव धाम तदमनन्ति" इत्युत्तरत्रान्वयः। वैष्णवं विष्णुसम्बन्धि परमं पद मामनन्ति आम्नायाः वदन्तीत्यर्थः। "तद्विष्णोः परमं पदम् सदा पश्यन्ति सूरय" इति श्रुतिः। य देव परमं खं वा परमाकाशञ्च आमनन्ति। वा च शब्दार्थे। "तदक्षरे परमे व्योमन्" इति श्रुतिः। यत्तमसः परस्तात्, परमसत्त्वमयं निष्कृष्टसत्त्वस्वरूपं, यदेव तेजोमयं ध्रुवञ्च भवति सुन्दरं अतएव अद्भुतं यदानन्दकन्दम् "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्, न बिभेति कदाचन" इत्युक्तानन्दहेतुश्च भवति॥ ४१॥

*यद् ब्रह्मरुद्रपुरुहूतमुखै र्दुरापं*
*नित्यं निवृत्तिनिरतै स्सनकादिभिर्वा।*
*सायुज्य मुज्ज्वल मुशन्ति य दापरोक्ष्यं*
*यस्मात्परं न पद मञ्चित मस्ति किञ्चित्॥ ४२॥*

यदिति। ब्रह्मरुद्रपुरुहूताः मुखं आदिः येषां तैः सृष्टिसंहारक-त्रैलोक्याधिपत्यादिशक्तियुक्तै रपीति भावः। यत् दुरापं दुष्प्रापं, नित्यं निवृत्तिनिरतैः प्रपत्तिधर्मनिष्ठैः "भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिः प्रपत्तिः" इति लक्षणम्। सनकादिभिर्वा। वा शब्दो ब्रह्मादिभ्योऽप्येषा-मतिशयसूचनार्थः। यद्दुराप मित्यनुषङ्गः। यस्य आपरोक्ष्यं साक्षात्कारं उज्ज्वलं मुख्यं सायुज्यम् - समानेन गुणेन युक् सयुक् ब्रह्मणा समानगुणः तस्य भावः सायुज्यं ज्ञानानन्दाद्याविर्भावः परमपदप्राप्ति-समकालिक इति भावः। उशन्ति, इच्छन्ति वदन्तीत्यर्थः। ब्रह्मविद इति शेषः। यस्मात्परं अञ्चितं पूजितं, महनीयं किञ्चि त्पदं नाऽस्ति न विद्यते॥ ४२॥

*रूपेण सद्गुणगणैः परया समृद्ध्या*
*भावै रुदारमधुरै रपि वा महिम्ना।*
*तादृक्त दीदृगिद मित्युपवर्णयन्त्यो*
*वाचो यदीयविभवस्य तिरस्क्रियायै॥ ४३॥*

रूपेणेति । रुपेण "न तत्र सूर्यो भाति" इत्युक्तेन रूपेण तेजसा, सद्भिर्गुणगणैः निरतिशयानन्दावहत्वादिगुणसमाजैः, परया समृद्ध्या "यत्र नाऽन्यत् पश्यति नाऽन्यच्छृणोति" इत्युक्तसमृद्ध्या, उदाराश्च मधुराश्च तैः महद्भिः भेग्यैश्च, भावैः पदार्थैः आस्थानरत्नादिभिरिति भावः । महिम्नाऽपि वा ब्रह्मादिदुष्प्रापत्वरूपाद्यतिशयेनाऽपि वा तत् तादृक् अपरिदृष्टलोकस्वरूपस्वभावयुक्तं, इद मीदृक् परिदृष्टलोकस्वरूप-स्वभावयुक्त मिति वर्णयन्त्यो वाचः यदीयविभवस्य यदीयातिशयस्य तिरस्क्रियायै तिरोधानाय भवन्ति, अवाङ्मनसगोचररूपादिमत स्तस्य परिच्छिद्य वर्णनं तिरोधायक मिति भावः ॥ ४३ ॥

**यद्वृद्ध्यपक्षय विनाशमुखै र्विकारै -**
**रेतै रसंस्तुतमनस्तमितास्ति शब्दम् ।**
**यद्गौरवा च्छृतिषु फल्गुफलं क्रियाणा**
**मादिष्ट मन्य दसुखोत्तर मध्रुव ञ्च ॥ ४४ ॥**

यदिति । यत्, वृद्धिश्च अपक्षयश्च विनाशश्च मुखं आदिर्येषां तैः । एतैः घटादिषु परिदृश्यमानैः विकारैः असंस्तुतं अपरिचितम् । "संस्तवः स्यात्परिचयः" इत्यमरः । अस्ति जायते परिणमते एधते अपचीयते प्रणस्यति इति षड्भावविकारा स्सन्ति । अत्र अनस्तमितः अस्तिशब्दो यस्य तत्तथोक्तम् । एतेन मुखशब्देन जननपरिणामौ गृह्येते इति मन्तव्यम् । अनस्तमितास्तिशब्दं यदपक्षयविनाशमुखै रेतै र्विकारै रसंस्तुत मिति वाऽन्वयः । यद्गौरवात् यस्य वैभवमपेक्ष्य इत्यर्थः । श्रुतिषु अन्यत्, क्रियाणां ज्योतिष्टोमादिकर्मणां फलं फल्गु असारं असुखोत्तरं दुःखोदर्कम् अध्रुवम् अनित्यञ्च आदिष्टं प्रतिपादित मित्यर्थः । "तदक्षरे परमे व्योमन्", "तद्विष्णोः परमं पदम् सदा पश्यन्ति सूरयः", "न च पुनरावर्तते", "ते ह नाकम्महिमानस्सचन्ते, यत्र पूर्वे साध्या स्सन्ति देवाः" इत्याद्युक्त नित्यमुक्तनिरन्तरानुभाव्यपरमपदगौरवे विचार्यमाणे "गतागतं कामकामा

लभन्ते'', ''क्षीणे पुण्ये मर्त्यलोकं विशन्ति'', ''तद्यथेह कर्मचितो लेकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते'' इत्याद्युक्त्या कर्मचितो लोकः फल्गुत्वादिविशिष्ट इति भावः ॥ ४४ ॥

*निष्कल्मषै र्निहतजन्मजराविकारै*
*र्भूयिष्ठभक्तिविभवै रभवै रवाप्यम् ।*
*अन्यैरधन्यपुरुषै र्मनसाऽप्यनाप्यं*
*वैकुण्ठनाम तव धाम तदामनन्ति ॥ ४५ ॥*

निष्कल्मषैरिति । निर्गतं कल्मषं येभ्यस्तैः कर्मयोगानुष्ठाननिर्धूत-पापैरिति भावः । अभवैः भवेच्छारहितै रित्यर्थः । ज्ञानिभिरिति यावत्, ज्ञानयोगकथनस्यापेक्षिततत्वात् । अन्यथा निहतजन्मजराविकारैः इत्यनेन पुनरुक्तेश्च । भूयिष्ठः अतिमहान् भक्तिविभवः यैषान्तैः अतएव निहतजन्मजराविकारैः मुक्तै रित्यर्थः । अवाप्यं प्राप्यम्, अन्यै रधन्यपुरुषैः कर्मज्ञानभक्तिविहीनैः मनसाऽप्यनाप्यं दुष्प्रापं वैकुण्ठमिति नाम यस्य तत्, अयं तच्छब्दः पूर्वप्रयुक्तसर्वयच्छब्द प्रतियोगी । तव धाम आवासस्थानं आमनन्ति आम्नायाः वदन्ति । ''आदित्यवर्णं तमसः परस्तात्'', ''यो अस्याध्यक्षः परमे व्योमन्'' इत्याद्या इति भावः ॥ ४५ ॥

उक्त मुपसंहरन् भगवतोऽतिशयान्तराण्याह -

*नित्या तवाऽन्यनिरपेक्षमहामहिम्नो -*
*ऽप्येतादृशी निरवधि र्नियता विभूतिः ।*
*ज्ञानादयो गुणगणा स्समतीतसीमा*
*लक्ष्मीः प्रिया परिजनाः पतगेन्द्रमुख्याः ॥ ४६ ॥*

नित्येति । अन्यनिरपेक्षः हेत्वन्तरनिरपेक्षः महान् निरवधिः महिमा यस्य तस्य तवाऽपि, अपिशब्दो विभूत्याद्यभावेऽपि महिम्नो निरवधित्वं सूचयति, नित्या निरवधिः एतादृशी विभूतिः नियता अनपायिनी

नियतभोगोपकरणं भवतीति भावः । समतीता सीमा अवधि यैस्ते समतीतसीमाः अत्र सीमाशब्दः आकारान्तः "सीमसीमे स्त्रिया मुभे" इत्यमरः । ज्ञानादयः अत्र ज्ञानादय इत्यनेन स्वरूपनिरूपक ज्ञानानन्दादयः, निरूपितस्वरूपविशेषणभूताः ज्ञानशक्त्यादयश्च गृह्यन्ते । गुणगणाः नियता इत्यनुषङ्गः । लक्ष्मीः प्रिया नियता नित्यं प्रिया अनपायिनीत्यर्थः । "राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि । अन्येषु चावतारेषु विष्णो रेषाऽनपायिनी" इत्युक्ते रितिभावः । पतगेन्द्रः पक्षिराजो मुख्यो येषां ते परिजनाः नियताः । पतगेन्द्रस्य मुख्यत्वं वेदात्मतया भगवत स्स्वरूपरूपगुणविभूत्यादिनित्यसाक्षात्कारानुगुणदर्पणस्थानीयत्वा दिति मन्तव्यम् । अय मर्थः श्रीपराशरभट्टारकै रपि "श्रुतिमयम्" इति श्लोके अनुसंहितः ॥ ४६ ॥

सम्प्रति भगवद्गुणानां सर्वप्रकारातिशयं भगवत स्तन्निरपेक्षातिशय-विषयत्व ञ्चाऽऽह -

*एकस्य येषु हि गुणस्य लवायुतांश-*
*स्स्यात्कस्य चित्स खलु वाङ्मनसातिगश्रीः ।*
*ते तादृशोऽत्यवधय स्समतीत सङ्ख्या-*
*स्त्वत्सद्गुण स्त्वमसि तन्निरपेक्षलक्ष्मीः ॥ ४७ ॥*

एकस्येति । येषु त्वद्गुणेषु एकस्य गुणस्य लवस्य अयुतांशः दशसहस्रांशः कस्यचित् यस्य कस्याऽपि स्यात्, यदीति शेषः । हि हेतौ ते नैव हेतुनेत्यर्थः । सः वाङ्मनसे अतिगा अतिक्रान्ता श्रीः यस्य सः तथोक्तः स्यात् खलु । तादृशः उक्तप्रकारविशिष्टाः, अतिक्रान्तः अवधिः परिच्छेदः यै स्ते तथोक्ताः ते प्रसिद्धाः त्वत्सद्गुणाः भवत्कल्याणगुणाः समतीता सङ्ख्या यैस्ते तथोक्ताः सङ्ख्या तु मशक्या इत्यर्थः, भवन्तीति शेषः । त्वं तन्निरपेक्षा तादृशगुणानपेक्षा लक्ष्मीः सम्पत् अतिशयो यस्य तथोक्तोऽसि । त्वदीयातिशयो भवत्कल्याण गुणायत्तो न भवतीति भावः ॥ ४७ ॥

उक्तमर्थमेव विवृणोति -

*सर्वस्य चैव गुणतो हि विलक्षणत्व -*
*मैश्वर्यतश्च किल कश्चि दुदञ्चित स्स्यात् ।*
*तत्प्रत्युत त्वयि विभो विभवो गुणाश्च*
*सम्बन्धत स्तव भजन्ति हि मङ्गलत्वम् ॥ ४८ ॥*

सर्वस्येति । सर्वस्य च पुंसः विलक्षणत्वं सजातीयेभ्यः उत्कृष्टत्वं गुणत एव हि भवति; गुणवत एव किलोत्कृष्टत्वं भवतीति भावः । कश्चित् नामधेयशून्योऽपीति भावः । ऐश्वर्यतः किल उदञ्चितः सुतरां पूजितः स्यात् । चकारः क्रियाद्वयसमुच्चयार्थः । हे विभो, तत् पूर्वोक्त मुभय मपि त्वयि प्रत्युत, विपरीत मिति शेषः । हि यस्मात्कारणात् विभवः ऐश्वर्यं गुणाश्च तव सम्बन्धतः, मङ्गलत्वं कल्याणत्वं भजन्ति । अतः त्वं तन्निरपेक्षलक्ष्मीरिति भावः । ज्ञानानन्दादिस्वरूपगुणस्य ज्ञानशक्त्यादि-धर्मभूत गुणस्य च जीवे विद्यमानत्वेऽपि परिच्छिन्नत्वं दृश्यते । "स एको मानुष आनन्दः" इत्यादौ "यतो वाचो निवर्तन्ते" इत्यादौ तैषा मेवाऽपरिच्छिन्नत्ववचनं त्वत्सम्बन्धनिबन्धनं दृश्यते । अतो गुणाना मतिशयो न स्वरूपप्रयुक्त इति सम्प्रदायः ॥ ४८ ॥

तर्हि निर्गुणत्वश्रुतेः का गति रित्यत्राऽऽह -

*दूरे गुणा स्तव तु सत्त्वरजस्तमांसि*
*तेन त्रयी प्रथयति त्वयि निर्गुणत्वम् ।*
*नित्यं हरे निखिलसद्गुणसागरं हि*
*त्वा मामनन्ति परमेश्वर मीश्वराणाम् ॥ ४९ ॥*

दूरे इति । हे हरे सत्त्वरजस्तमांसि गुणास्तु तव दूरे, तै रस्पृष्ट इत्यर्थः । शुद्धसत्त्वमात्रगुणाकर इति यावत् । तेन हेतुना "सत्त्वादयो न सन्तीशे यत स्ते प्रकृते र्गुणाः" इत्युक्ते रिति भावः । तेन हेतुना त्रयी त्वयि निर्गुणत्वं

प्रथयति प्रकाशयति। "निर्गुणं निरञ्जन" मित्यादिकेति भावः। ईश्वराणां परमेश्वरं त्वां "तमीश्वराणां परमं महेश्वरम्" इत्युक्तं त्वाम्। अनेनेश्वरस्यैव सगुणत्वं, परब्रह्मणस्तु निर्गुणत्व मित्युक्तिरपि निरस्तेति ज्ञेयम्। नित्यं निखिलानां सद्गुणानां सागर मामनन्ति। सागरत्वोक्ति र्गुणाना मपरिच्छिन्नत्वसूचनार्था। "यस्सर्वज्ञ स्सर्ववित्", "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च", "सत्यकाम स्सत्यसङ्कल्पः" इत्यादिकाः श्रुतयो वदन्तीति भावः॥ ४९॥

ज्ञानस्वरूपस्य भगवतः कथं ज्ञानगुणकत्वं उभयो रपि ज्ञानत्वाविशेषा द्गुणगुणि भावानुपपत्ते रित्याशङ्क्य दृष्टान्तमुखेन परिहरति -

***ज्ञानात्मन स्तव तदेव गुणं गृणन्ति***
***तेजोमयस्य हि मणेर्गुण एव तेजः।***
***तेनैव विश्व मपरोक्ष मुदीक्षसे त्वं***
***रक्षात्वदीक्षणत एव यतोऽखिलस्य॥ ५०॥***

ज्ञानेति। ज्ञान मेवाऽऽत्मा स्वरूपं यस्य तस्य तव तदेव ज्ञान मेव गुणं धर्मभूतं गृणन्ति वदन्ति, ब्रह्मविद इति शेषः। हि यस्मात्कारणात् तेजोमयस्य तोजोरूपस्य मणेः रत्नस्य; मणे रिति द्युमणिप्रभृतीनामपि उपलक्षणम्। तेजः प्रभा गुण एव। तेनैव ज्ञानेनैव विश्वं कृत्स्नं अपरोक्षं प्रत्यक्षं यथा तथा उदीक्षसे पश्यसि यतः कारणात् अखिलस्य सत्तामात्रयोगिनः सकलस्य जन्तोः रक्षात्वदीक्षणत एव, नाऽन्येभ्यो हेतुभ्य इति भावः। अतो विश्व मुदीक्षसे इति पूर्वेणान्वयः। यद्वा, यतः त्वदीक्षणतः यस्माद्भवदीक्षणा देव रक्षा इत्यन्वय स्सम्भवति। तेजसो द्रव्यत्वेऽपि आश्रयाश्रयिभावनैयत्यात् प्रभाप्रभावद्रूपेण यथा गुणगुणि भावः, तथा ज्ञानस्य द्रव्यत्वेऽपि स्वरूपभूतज्ञानस्य, धर्मभूतज्ञानस्य च नियताश्रयाश्रयिभावेन गुणगुणिभाव उपपन्नः इति भावः॥ ५०॥

पूर्वं भगवत्स्वरूपनिरूपणप्रकरणे प्रतिपादित मानन्दस्य अपरिच्छिन्नत्व मेव गुण प्रकरणे विवृणोति -

*त्रय्युद्यता तव युवत्वमुखै र्गुणौघै -*
*रानन्द मेधित मिया निति सन्नियन्तुम् ।*
*ते ये शतन्त्विति परम्परया प्रवृत्ता*
*नैवैष वाङ्मनसगोचर इत्युदाह ॥ ५१ ॥*

त्रयीति । तव एधितं प्रवृद्धम् आनन्दं युवत्वं यौवनं मुख मादिर्येषां तैः गुणौघैः गुणगणैः । "युवा स्यात्" इत्युपक्रमा दिति भावः । इयान् इयत्परिमाण इति सन्नियन्तुं परिच्छेत्तुं उद्यता उद्युक्ता त्रयी आनन्दवल्ली परम्परया पूर्वोक्ते ष्वपर्यवसाना दिति भावः । "ते ये शत" मिति प्रवृत्ता ते ये शतमिति प्रवृत्तियुक्ता सती एष तु ब्रह्मानन्द स्तु वाङ्मनसयोः गोचरः विषयः नैव न भवत्येवेति उदाह उच्चैर्वदति, सर्वजनसुप्रसिद्धं घोषं करोतीति भावः । युवा स्या त्साधु युवाध्यायकः आशिष्ठो द्रढिष्ठो बलिष्ठः, तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्, स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः" इत्यारभ्य "ते ये शतं प्रजापते रानन्दाः, स एको ब्रह्मण आनन्दः" इत्युक्त्या तदनन्तरं "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्" इत्युपसंहारा दिति भावः ॥ ५१ ॥

उक्त मानन्दगुणस्य अवाङ्मनसगोचरत्वं स्थालीपुलाकन्यायात् भगवत स्सकलकल्याणगुणानामप्यपरिच्छिन्नत्वप्रदर्शनार्थ मित्याह -

*एवं तया चतुरया तव यौवनाद्या -*
*स्सर्वे गुणा स्सह समस्तविभूतिभिश्च ।*
*प्रव्याहृता स्स्यु रवधीनवधीरयन्तो*
*वाचा मगोचरमहामहिमान एव ॥ ५२ ॥*

एव मिति । चतुरया गुणान्तराणां विभूतीनाञ्च अपरिच्छिन्नत्व

प्रतिपादनसमर्थया तया आनन्दवल्ल्या, एव मुक्तप्रकारेण तव यौवनाद्या स्सर्वे गुणाः यौवनसौन्दर्यादयो गुणाः ज्ञानादिस्वरूपगुणाश्चेत्यर्थः। समस्तविभूतिभिश्च सह, बहुवचनेन प्रधानपुरुषकाल शुद्धसत्त्वरूप-विभूतिभेदा गृह्यन्ते। समस्तशब्देन तत्तदवस्थान्तरभेदो गृह्यते। मानुषानन्दनिरूपणे "युवा स्यात्साधु युवाऽध्यायकः" इत्यादिना यौवन ज्ञानादीनां गृहीतत्वात्, पृथिवीति विभूति ग्रहणाच्च भगवदानन्द-निरूपणेऽपि यौवनादीनां तात्पर्यविषयत्वं गम्यते इति भावः। अवधीन् परिच्छेदान् अवधीरयन्तो निरस्यन्त स्सन्तः वाचा मगोचरः महान्महिमा येषान्ते तथोक्ताः प्रव्याहृताः स्युः। वाचामिति मनसोऽप्युपलक्षणम्॥ ५२॥

इदानीं सङ्कल्परूपस्य भगवज्ज्ञानविशेषस्याऽपरिच्छिन्नमहिमत्व माह-

*संवर्तवर्ति निखिलं निरभिज्ञमज्ञं*
*चित्रे च कर्मणि यथार्हमहो नियच्छन्।*
*सद्यः क्रिमिद्रुहिणभेद मभेद मेत -*
*दाविश्चकर्थ सकृदीक्षणदीक्षणेन॥ ५३॥*

संवर्तेति। कारणवाक्येषु सर्वेषु अप्ययपूर्विका सृष्टिः प्रतिपाद्यते 'सदेव सोम्येद मग्र आसीत्, ब्रह्म वा इद मेक मेवाऽग्र आसीत्, आत्मा वा इद मेक एवाऽग्र आसीत्" इत्यादिषु, मनुस्मृतौ च "आसी दिदं तमोभूतम्" इत्युपक्रम्य तद्वदेवाह। संवर्ते प्रलये वर्तते इति तथोक्तम्, अभेदं विभागानार्हं सूक्ष्मदशापन्नं, निरभिज्ञं अभिज्ञा अनुभवरुपं ज्ञानं तद्रहितम्, अज्ञं प्रत्यभिज्ञारूपज्ञानरहितं निखिलं, एतज्जन्तुजात मिति शेषः। कर्मणि चित्रे च तत्तत्कर्मणि विचित्रे सत्यपि, सकृदीक्षणरूपेण दीक्षणेन दीक्षया "तदैक्षत बहु स्याम्" इति सङ्कल्पेनेत्यर्थः। यथार्हं तत्तत्कर्मानुगुणं नियच्छन् नियमयन् सन् सद्यः क्रिमिः कीटः द्रुहिण श्चतुर्मुखः क्रिमि मारभ्य

द्रुहिणपर्यन्तं भेदो यस्य स तथोक्तं, अभेदं पक्षपातशून्यं वैषम्यनैर्घृण्यशून्य मिति यावत् आविश्वकर्थ आविर्भूतं कृतवानसि। अत स्तव सङ्कल्पो महाप्रभाव इति भावः ॥ ५३ ॥

इदानीं सङ्कल्पेन सह शक्त्याः प्रभाव मनुसन्धत्ते -

*अस्तं य दुद्य दुपचाय्यपचायिचैव -*
*मीशं दरिद्र मथ जङ्गममप्यनिङ्गम्।*
*विश्वं विचित्र मविलक्षणवीक्षणेन*
*विक्षोभय स्यनवधि र्बत शक्ति रैशी ॥ ५४ ॥*

अस्त मिति। हे ईश अस्तं विनाशं यत् प्राप्नुवत्, उद्यत् उदयं प्राप्नुवत्। उत्पूर्वा दिण् गता वितिधातोः शत्रन्तं पदम्। उपचायि वर्धिष्णु, अपचायि क्षयिष्णु, ईश माढ्यं, दरिद्रं सम्पद्रहितं, जङ्गमं सञ्चरिष्णु, अनिङ्गं स्थावरम् इङ्गं न भवतीति अनिङ्गम्, विचित्रं उक्तप्रकारेणेति भावः। विश्वं कृत्स्नम्, अविलक्षण वीक्षणेन एकरूपसङ्कल्पेन, सकृत्सङ्कल्पेनेत्यर्थः। विक्षोभयसि विशेषेण क्षोभयुक्तं विकारयुक्तं करोषि सृष्ट्यनुगुण विकारयुक्तं करोषीत्यर्थः। ऐशी ईश्वरत्वप्रयुक्ता शक्तिः अघटितघटनासामर्थ्यं अनवधिः अपरिच्छिना। बते त्याश्चर्ये ॥ ५४ ॥

सम्प्रति स्वातन्त्र्यस्य निरङ्कुशत्व माह -

*रूपप्रकारपरिणामकृतव्यवस्थं*
*विश्वं विपर्यसितु मन्य दसच्च कर्तुम्।*
*क्षाम्यन् स्वभावनियमं किमुदीक्षसे त्वं*
*स्वातन्त्र्य मैश्वर मपर्यनुयोज्य माहुः ॥ ५५ ॥*

रूपेति। रूपस्य स्वरूपस्य, प्रकारस्य स्वभावस्य च परिणामेन कृता व्यवस्था मर्यादा यस्य तत्तथोक्तम्। अचिद्द्रव्यस्य स्वरूपान्यथाभावरूपः परिणामः, चेतनस्य स्वभावान्यथाभावरूपः परिणाम इति विभागो द्रष्टव्यः।

विश्वं चेतनाचेतनात्मकं कृत्स्नं जग द्विपर्यसितुं विपर्यस्तं कर्तुं प्रलीनं कर्तुं, असत् "असद्वा इद मग्र आसीत्" इति विभागानर्हसूक्ष्मदशापन्नतया असत्कल्प मित्यर्थः। अन्यच्च कर्तुं सत्तायुक्तं कर्तुं स्रष्टुमित्यर्थः। क्षाम्यन् शक्तः त्वं स्वभावनियमं तत्तत्कर्मफलस्वभावनैयत्यं, उदीक्षसे कटाक्षयसि किम्, "एककालिकसर्गस्य एककालिकप्रलयस्य च तत्तत्कर्माय-त्तत्वाभावा दिति भावः। अतः ऐश्वरं स्वातन्त्र्यं अपर्यनुयोज्यं पर्यनुयोगस्य प्रश्नस्य अनर्हम् आहुः, वेदान्तविद इति शेषः। पूर्वकर्मानुगुणदेवादिशरीर-प्रदाने सत्यपि सृष्टिप्रलययो यौगपद्यं निरङ्कुश स्वातन्त्र्यकार्यमिति भावः। यद्वा-विपर्यसितं अन्यत्कर्तुं क्षाम्यन् तादृशस्वतन्त्र स्त्वं स्वभावनियमं चेतना-चेतनयोः स्वभावनियमं अचेतनानां भूतानाञ्च परस्परस्वभावनियमं किं किमर्थं उदीक्षसे आलोचयसि। एकदैव सकृत्सृष्टिसंहारकरणे स्वतन्त्रस्य तव स्वभावनियमावलोकनमपि स्वातन्त्र्यभेद एवेति भावः ॥ ५५ ॥

इदानीं पराभिभवनसामर्थ्यरूपं तेजः आह -

*संवर्तसंम्भृतकरस्य सहस्ररश्मे -*
*रुस्रं तमिस्रय दजस्रविहारि हारि।*
*नित्यानुकूल मनुकूलनृणां परेषा -*
*मुद्वेजन ञ्च तव तेज उदाहरन्ति ॥ ५६ ॥*

संवर्तेति। संवर्ते प्रलये सम्भृताः सम्पूर्णाः कराः किरणाः यस्य तस्य सहस्ररश्मेः उस्रं किरणम् "किरणोस्रमयूखे" त्यमरः। तमिस्रयत्, तमिस्रमन्धकारं कुर्वत्, तिरस्कारकृदिति भावः। अजस्रं विहारि विहारयुक्तं नित्यासङ्कुचित मित्यर्थः। हारि मनोहारि, परेषां शत्रूणा मुद्वेजनञ्च उद्वेगकरं भयङ्कर मित्यर्थः। तव तेजः अनुकूलाश्च ते नरश्च अनुकूलनरः, तेषां भक्तानामित्यर्थः। नित्यानुकूलं निरन्तरभोग्यम् उदाहरन्ति। "एकस्यैव तेजसः परेषा मुद्वेगकरत्वं अनुकूलानां भोग्यत्वं च अत्याश्चर्यावह" मिति भावः ॥ ५६ ॥

औदार्य माह -

***नैव ह्यवाप्य मनवाप्त मिहास्ति यस्य***
***सत्ताऽपि तस्य तववीक्षणतः प्रजानाम् ।***
***सम्पत्तु किं पुनरतो न वदान्य मन्य -***
***म्मन्ये त्वमेव खलु मन्दिर मिन्दिरायाः ॥ ५७ ॥***

नैवेति। यस्य तव इह विभूतिद्वयेऽपि अनवाप्तं अलब्धं अवाप्यं इतः परं लभ्यं वस्तु नैवाऽस्ति हि, अवाप्तसमस्तकामत्वा दिति भावः । तस्य तव वीक्षणतः प्रजानां ब्रह्मादिस्तम्बपर्यन्तानां चेतनानां सत्ता उत्पत्तिरपि भवति। सत्तेति स्थितिप्रवृत्त्योरप्युपलक्षम् । त्व मेव खलु इन्दिरायाः श्रियः मन्दिर मावासस्थानम् । सम्पत्तु लक्ष्मीकटाक्षायत्तभोग्य भूतवस्तुसमृद्धिस्तु किं पुनः, अस्तीति किमु वक्तव्यम् इति हेतोः अन्यं वदान्यं दातारं न मन्ये न चिन्तयामि । अवाप्तसमस्तकामस्य ब्रह्मादिसत्तास्थिति प्रवृत्तिहेतुभूत सङ्कल्पलवस्य श्रियःपते स्तवौदार्यं सर्वातिशायीति भावः ॥ ५७ ॥

अनन्तरं कृपा मनुसन्धत्ते -

***पापै रनादिभवसम्भववासनोत्थै -***
***र्दुःखेषु यः खलु मिमङ्क्षति हन्तजन्तुः ।***
***तं केवलं नु कृपयैव समुद्धरिष्यं -***
***स्तद्दुष्कृतस्य ननु निष्कृति मात्थ शास्त्रैः ॥ ५८ ॥***

पापै रिति । अनादि र्यो भव स्संसारः तत्र सम्भवः जन्म तेन या वासना तज्जन्यस्संस्कारविशेषः तया उत्थै र्जनितैः पापैः जन्तुः जीवः दुःखेषु तत्तत्पापफलभूतनरकादिव्यसनेषु मिमङ्क्षति मङ्क्तु मिच्छति हन्त खलु इदं आश्चर्यं किल, स्वय मेव स्वानर्थावहाकृत्यकरणा दितिभावः । तं जन्तुं केवलं कृपयैव निर्हेतुककृपयैव समुद्धरिष्यन् समुद्धृतं करिष्यन् किल शास्त्रैः मन्वादिभिः, यद्वा गीतादिभिः तद्दुष्कृतस्य निष्कृतिं प्रायश्चित्तं

आत्थ ब्रवीषि ननु। अत्र कृपा स्वार्थनिरपेक्षता, परदुःखासहिष्णुता च द्विधेति सूचिता। अत स्त्वदीयकृपावैभवमपरिच्छिन्न मिति भावः ॥ ५८ ॥

उक्तमर्थं विवृणोति -

*शास्त्रै रनादिनिधनैः स्मृतिभि स्त्वदीय -*
*दिव्यावतारचरितै श्शुभया च दृष्ट्या।*
*निः श्रेयसं य दुपकल्पयसि प्रजानां*
*सा त्वत्कृपाजलधितल्लजवल्गितश्रीः ॥ ५९ ॥*

शास्त्रै रिति। अनादिनिधनैः उत्पत्तिविनाशरहितैः शास्त्रैः श्रुतिभिरित्यर्थः; शासनाच्छास्त्र मिति हि व्युत्पत्तिः। स्मृतिभि रित्युपलक्षणम्, स्मृतीतिहासपुराणानां वेदोपबृंहणत्वाविशेषात्। त्वदीयानां दिव्यावताराणां चरितै रनुष्ठानैः, अवताराणां धर्मसंस्थापनार्थत्वा दिति भावः। शुभया श्रेयो हेतुभूतया, स्वयं शोभनया च दृष्ट्या कटाक्षेण च, "जायमानं हि पुरुषं यं पश्ये न्मधुसूदनः। सात्त्विक स्सतु विज्ञेय स्स वै मोक्षार्थचिन्तकः"। इत्युक्ते रिति भावः। प्रजानां निःश्रेयसं मोक्षं उपकल्पयसि, इति यत् सा त्वत्कृपैव जलधितल्लजः समुद्रश्रेष्ठः क्षीरसमुद्रः तस्य यद्वल्गितं वल्गनं कल्लोलः, तस्य श्रीः सम्पत् अतिशयः। सेति स्त्रीलिङ्गनिर्देशः "शैत्यं हि यत्सा प्रकृति र्जलस्य" इतिवत् विधेयापेक्षया। भवदीय दयातरङ्गोल्लासकार्यं निश्श्रेयस प्रदान मिति भावः ॥ ५९ ॥

क्वचिद्भाग्यविहीनेषु कृपासङ्कोच मनुसन्धत्ते -

*है हन्त जन्तुषु निरन्तरसन्ततात्मा*
*पाप्मा हि नाम वद कोऽय मचिन्त्यशक्तिः।*
*यस्त्वत्कृपाजलधिम प्यतिवेलखेल -*
*मुल्लङ्घ्य त्यकृतभासुर भागधेयान् ॥ ६० ॥*

है हन्तेति। जन्तुषु निरन्तरं सर्वकालेऽपि सम्यक् ततः विस्तृतः आत्मा स्वरूपं यस्य स तथोक्तः अचिन्त्या अस्मदादिभिः चिन्तयितु मशक्या

शक्ति र्यस्य सः अयं पाप्मा पापं को नाम कीदृशस्वरूपः कीदृशशक्तियुक्तो वा वद। है हन्त ! अत्याश्चर्यावहतया भवताऽप्यनिर्वचनीय इति भावः। हि यस्मात्कारणात् यः पाप्मा, अकृत मननुष्ठितं भासुर मुज्ज्वलं भागधेयं भाग्यं भागधेयमूलकारणं शरणवरणादिकं यैस्तान् पुरुषान् अतिक्रान्ता वेला अवधि र्यया सा खेला लीला यस्य तं तथोक्तम् उद्वेलकल्लोल मिति यावत् त्वत्कृपाजलधि मपि उल्लङ्घयति उल्लङ्घिता नतिक्रान्तान्करोति। णिजन्तत्वात् द्विकर्मत्वं त्वत्कृपाया अलक्ष्यतां करोतीति भावः ॥ ६० ॥

इदानीं दयाया अप्युन्मेषकरीं अपराधसहिष्णुतारूपां वात्सल्यहेतुं क्षान्ति मनुसन्धत्ते -

*यद्ब्रह्मकल्पनियुतानुभवेऽप्यनाश्यं*
*त त्किल्बिषं सृजति जन्तु रिह क्षणार्धे।*
*एवं सदा सकलजन्मसु सापराधं*
*क्षाम्य स्यहो तदभिसन्धिविराममात्रात् ॥ ६१ ॥*

यदिति। यत् किल्बिषं ब्रह्मकल्पानां नियुतेन अनुभवेऽप्यनाश्यं नाशयितु मशक्यं तत् किल्बिषं कर्म इह जगति जन्तुः क्षणार्धे अर्धक्षणे सृजति करोति, ब्रह्महत्यादिक मिति भावः। एव मुक्तप्रकारेण सदा सकलजन्मसु देवतिर्यगादि सर्वजन्मसु सापराधं जन्तुं, तस्मिन् पापे अभिसन्धिस्सङ्कल्पः तस्य विरामः उपरतिः तन्मात्रात् इतःपर मपि पापं न कुर्याम् इति सङ्कल्पेन। प्रवृत्त्यभावमात्रादेवेत्यर्थः। क्षाम्यसि क्षमाविषयं करोषि अपराधस्य क्षमाविषयत्वे, तद्विशिष्टोऽपि क्षमाविषयो भवति। अहो ! आश्चर्यम् ! भवदीया क्षान्ति रत्याश्चर्यकरीति भावः ॥ ६१ ॥

पूर्वोक्तार्थानुवादेन क्षान्तिकार्यं वात्सल्य मनुसन्धत्ते -

*क्षान्ति स्तवेयमियती महती कथन्नु*
*मुह्ये दहो त्वयि कृताञ्जलिपञ्जरेषु।*

*इत्थं स्वतो निखिलजन्तुषु निर्विशेषं*
*वात्सल्य मुत्सुकजनेषु कथं गुण स्ते ॥ ६२ ॥*

क्षान्ति रिति । इयती महती पूर्वोक्तेदृशमाहात्म्यवती तव क्षान्तिः त्वयि विषये कृतः अञ्जलि रेव पञ्जरः कवचः यै स्तेषु । अञ्जलेः कवचत्वनिरूपणं स्वदोषापनोदनहेतुत्वा दिति मन्तव्यम् । कथं मुह्येत् मोहं प्राप्नुयात् ? अहो ! अभिसन्धिविराममात्रतृप्ता क्षान्तिः अञ्जलिलाभे सत्यपि कथं वा विस्मरे दिति भावः । एवं क्षान्तिप्रकारेण निखिलजन्तुषु अश्रितानाश्रितविभागशून्येष्विति भावः । निर्विशेषं पक्षपातरहितं ते वात्सल्यं उत्सुकजनेषु त्वयि प्रीतिमत्सु कथं गुणः ? सर्वसाधारणस्य वात्सल्यस्य भक्तिमत्सु गुणत्वं कथं वा इत्यर्थः । अनुत्सुकविषयं हि वात्सल्य मत्यन्तातिशयावह मिति भावः ॥ ६२ ॥

पुन रपि वात्सल्यातिशय मेवानुसन्धते -

*विश्वं धियैव विरचय्य निचाय्य भूय -*
*स्सञ्जहुष स्सति समाश्रितवत्सलत्वे ।*
*आजग्मुष स्तव गजोत्तमबृंहितेन*
*पादं परामम‍ृशुषोऽपि च का मनीषा ॥ ६३ ॥*

विश्व मिति । धियैव सङ्कल्परूपज्ञानेनैव विश्वं विरचय्य सृष्ट्वा, निचाय्य अभिवर्ध्य पालयित्वा, सञ्जहुषः संहरतः सम्पूर्वाद्धरतेः क्वसु प्रत्यये कृते रूपम् । एव मन्यत्राऽपि । सञ्जह्निवा निति प्रथमा । समाश्रितवत्सलत्वे सति समाश्रितविषये वात्सल्ये समुद्भूते सतीत्यर्थः । गजोत्तमस्य ग्राहगृहीतपादस्य गजेन्द्रस्य बृंहितेन गर्जितेन आजग्मुषः आगतवतः सरस्तीर मिति शेषः पादं गजेन्द्रपादं परामम‍ृशुषः परामृष्टवतः, इदमपि त्वत्सङ्कल्पेनैव कर्तुं शक्यं, अथाऽप्येवमाचरत इति भावः । का मनीषा का बुद्धिः, कीदृश स्सङ्कल्पइत्यर्थः । आश्रितवात्सल्यप्रयुक्तव्यामोहेन सङ्कल्पोऽभिभूत इति भावः ॥ ६३ ॥

तिर्यग्जातिसम्भूते गजेन्द्रे कथ मेतादृशव्यामोह इत्यत्राऽऽह -

*यः कश्चिदेव यदि किञ्चन हन्तजन्तु -*
*र्भव्यो भजेत भगवन्त मनन्यचेताः ।*
*तं सोऽय मीदृश इया निति वाऽप्यजानन्*
*है वैनतेयसममप्युररी करोषि ।। ६४ ।।*

य इति । भव्यः यः कश्चिदेव जन्तुः जात्यादिभि र्निकृष्ट एवाऽपि त्वदीयचरणसमाश्रयणानुगुणशुभस्वभावविशिष्टः प्राणीत्यर्थः । भगवन्तं तदीयसमीचीनाचारादिनिरपेक्षक्षमादि गुणवन्तं त्वां अनन्यचेताः अन्यस्मिन् उपायोपेयवस्तुनि न विद्यते चेतो यस्य सः तथोक्त स्सन् किञ्चन भजेत यदि अल्पं समाश्रये द्यदि भजनानुकूलाऽद्वेषादिमात्रं कुर्या द्यदीति भावः । तं सोऽयं एतज्जातीयोऽयं ईदृशः एतादृशाचारः इयान् एतादृशगुणपूर्तियुक्त इति वाऽप्यजानन् दोषानादरहेतुस्नेहविशेषो वात्सल्य मिति निर्वचनात् वैनतेयेन समं सदृशं यथा तथा, तस्यैव कटाक्षपात्रभूतत्वादिति भावः । उररीकरोषि अङ्गीकरोषि । है इति विस्मये, प्रसिद्धौ वा । हन्तेति हर्षे । ईदृश भगवद्वात्सल्यानुसन्धान मनुष्ठितसाङ्गोपाङ्गाना माश्रितानां हर्षावह मिति भावः । "अपि चे त्सदुराचारो भजते मा मनन्यभाक् । साधु रेव समन्तव्य स्सम्य ग्व्यवसितो हि सः" इति श्लोकोऽत्रानुसन्धेयः ।। ६४ ।।

इदानीं महतो मन्दै स्सह नीरन्ध्रेण संश्लेष इति निरुक्तं सौशील्य मनुसन्धत्ते -

*त्वत्साम्य मेव भजता मभिवाञ्छसि त्वं*
*तत्सात्कृतै र्विभवरूपगुणै स्त्वदीयैः ।*
*मुक्तिं ततो हि परमं तव साम्य माहु -*
*स्त्वद्दास्य मेव विदुषां परमं मतं तत् ।। ६५ ।।*

त्वदिति । भजतां पुंसां तत्सात्कृतैः तदायत्तीकृतैः त्वदीयैः विभवरूपगुणैः विभवः, रूपं विग्रहः, गुणाः ज्ञानशक्त्यादयः, तैरुपलक्षित स्त्वं भक्तपराधीनत्वात् भवगत इति भावः । त्वत्साम्यं त्वया समानज्ञानादि धर्मवत्त्वं अभिवाञ्छसि उत्पादयितु मिति शेषः । ततो हेतो र्हि तव परमं साम्यं मुक्तिमाहुः । "निरञ्जनः परमं साम्य मुपैति", "मम साधर्म्य मागताः" इत्याद्याः श्रुतिस्मृतयः इति भावः । विदुषां भगवदनन्यार्हशेषत्वरूप स्वात्मयाथात्म्यज्ञानवतां तत् तादृशशेषत्वानुरूपतया प्रसिद्धं त्वद्दास्यं त्वदीयकैङ्कर्य मेव परमं उत्कृष्टं मतम् । नीरन्ध्रेण संश्लेषो नाम परमसाम्य मिति भावः ॥ ६५ ॥

तदेव सौशील्यं कारणान्तरेणानुसन्धत्ते -

*तद्वै तथाऽस्तु, कतमोऽय महो स्वभावो*
*यावान्यथाविधगुणो भजते भवन्तम् ।*
*तावां स्तथाविधगुण स्तदधीनवृत्ति -*
*स्संश्लिष्यसि त्व मिह तेन समानधर्मा ॥ ६६ ॥*

तदिति । श्रीभाष्ये "तत्क्रतुश्च" इति सूत्रस्य विषयवाक्यतया 'यथा क्रतु रस्मिन् लोके पुरुषो भवति तथा इतः प्रेत्य भवति" इति श्रुति मुपादाय यांदृशस्वरूपरूपगुणादिविशिष्टतया चेतनो भगवन्त मुपास्ते, तादृश-स्वरूपादिविशिष्ट मेव भगवन्तं प्राप्नोतीति तात्पर्यार्थः प्रतिपादितः । स एवाऽर्थः प्रतिपाद्यतेऽनेनश्लोकेन । तद्वै तथाऽस्तु, पूर्वोक्तं सौशील्यं हि तथा भवतु । यावान् यादृशपरिमाणज्ञानादियुक्तः पुरुषः यथाविधगुणः स्वकीयरुच्यनुगुण मुपास्यतया परिगृहीतयादृशप्रकारगुणविशिष्टः सर्वविद्यासाधारणानन्दादिगुणो वा, तत्तद्विद्यामात्रप्रतिपादित सन्मात्रत्वादिगुणो वा यस्य स तथोक्त स्सन्, यं गुणं यादृशप्रकारविशिष्ट मुपास्यतयाऽङ्गीकुर्वन् सन् इत्यर्थः । भवन्तं भजते । इह पूर्वोक्तमुक्तिविषये, तावान् तज्ज्ञानाद्यनुगुणविषयस्वस्वरूपः, तथाविधगुणः तदुपासितगुण-

मात्राविष्कार युक्तः अतएव तदधीना उपासकाधीना वृत्ति र्यस्य स तथोक्तः त्वं तेन समानधर्मा सन् संश्लिष्यसि संश्लेषं सङ्गतिं प्राप्नोषि। निरङ्कुशस्वतन्त्रस्य तव प्रकारान्तरेणाऽपि उपासनफलसंश्लेषप्रदाने शक्येऽपि यथोपासनमेव संश्लेषरूपः अयं स्वभावः कतमः कीदृशः ? अवाङ्मनसगोचरः इत्यर्थः। अहो आश्चर्ये ॥ ६६ ॥

इदानीं स्वकीयरुचिविषयफलं प्रार्थयते -

*नीलाञ्जनाद्रिनिभ मुन्नसमायताक्ष -*
*माजानुजैत्रभुज मायतकर्णपाशम्।*
*श्रीवत्सलक्षण मुदारगभीरनाभिं*
*पश्येम देव शरद श्शत मीदृशं त्वाम् ॥ ६७ ॥*

नीलाञ्जनेति। हे देव, "दिवु क्रीडाविजिगीषाव्यवहारद्युति स्तुतिमोदमद स्वप्नकान्तिगतिषु" इति धातूक्तसकलगुणविशिष्ट, अनेन श्रीवैकुण्ठनाथ इति सम्बुद्धि स्सिद्धा। नीलाञ्जनमयेन अद्रिणा निभं सदृशं, वर्णान्तरमुक्तत्वेऽपि नेत्रदोषापहसर्वद्रव्यस्याऽपि अञ्जनत्वेन नीलाञ्जन मिति विशिष्यते; श्रीवैकुण्ठनाथः कालमेघश्याम इति प्रसिद्धिः। उन्नता नासा यस्य तं उन्नसम्। 'पद्दनोमास्हृत्' इत्यादिना नासिकाया नसादेशः। आयते अक्षिणी यस्य तम्। आजानवः जानुपर्यन्ताः जैत्राः जयशीला भुजा यस्य तम्। आयतौ कर्णपाशौ यस्य तम्। श्रीवत्सो लक्षणं यस्य तम्, श्रीवत्सस्य असाधारणत्वा दिति भावः। उदारा ऊर्जिता गभीरा महती र्यस्य तम्। ईदृशम् एतादृशदिव्यमङ्गलविग्रहविशिष्टं त्वां शरदः शतं संवत्सरान् पश्येम। "कालाध्वनो रत्यन्तसंयोगे" इत्यनेन द्वितीया। "सदा पश्यन्ति सूरयः" इतिवत् निरन्तरदर्शनविषयं कुर्यामेत्यर्थः। अनेन भगवत्स्वरूपानुभवाद् विग्रहानुभव एव साधीया निति भावः ॥ ६७ ॥

*अम्भोरुहाक्ष मरविन्दनिभाङ्घ्रियुग्म -*
*माताम्रतामरसरम्यकराग्रकान्ति।*

*भृङ्गालकं भ्रमरविभ्रमकायकान्ति*
*पीताम्बरं वपु रद स्तु वयं स्तवाम ॥ ६८ ॥*

अम्भोरुहेति। वयन्तु स्वरूप गुणानुभवनिष्ठेभ्यो व्यावृत्ता वय मिति भावः। अम्भोरुहवत् पुण्डरीकवत् अक्षिणी यस्य तत् अरविन्देन निभं सदृशं अङ्घ्रियुग्मं यस्य तत्। आताम्र तामरस मिव रक्तोत्पल मिव रम्या मनोज्ञा कराग्रस्य कान्ति र्यस्य तत्। भृङ्ग इव अलका यस्य तत्, नीलालक मित्यर्थः। भ्रमरस्य विभ्रमः विलासः स इव विभ्रमो यस्या स्सा कायकान्ति र्यस्य तत् तथोक्तम्। कायशब्देन विग्रहैकदेशो लक्ष्यते। पीताम्बरम् अदः पूर्वोक्तं वपुः स्तवाम स्तुतिविषयं करवाम। ष्टुञ् स्तुतौ इति धातोः लोडुत्तमपुरुषबहुवचनम्। "वपु रद स्तव संस्तवाम" इति पाठे, संस्तवाम परिचिनुयाम इत्यर्थः। "संस्तवः स्या त्परिचयः" इत्यमरः ॥ ६८ ॥

*भ्रूविभ्रमेण मृदुशीतविलोकितेन*
*मन्दस्मितेन मधुराक्षरया च वाचा।*
*प्रेमप्रकर्षपिशुनेन विकासिना च*
*सम्भावयिष्यसि कदा मुखपङ्कजेन ॥ ६९ ॥*

भ्रूविभ्रमेति। अत्र पूर्वार्धोक्तानि भ्रूविभ्रमेणेत्यादीनि स्वतन्त्राणि वा। भ्रुवोर्विभ्रमो विलासो यस्मिं स्तेन, मृदु सौम्यं शीतं दयार्द्रञ्च विलोकितं यस्मिं स्तेन, मन्दं अत्यल्पं स्मितं यस्मिं स्तेन, प्रेम्णः वात्सल्यस्य प्रकर्षस्य अतिशयस्य पिशुनेन सूचकेन अतएव विकासिना च मुखपङ्कजेन मधुराण्यक्षराणि यस्यां तया वाचा च कदा मां सम्भावयिष्यसि सम्भावितं सत्कृतं करिष्यसि, तादृशी दशा मेकदा भूया दिति भावः ॥ ६९ ॥

*वज्राङ्कुशध्वज सरोरुहशङ्खचक्र -*
*मत्सीसुधाकलशकल्पककल्पिताङ्कम्।*
*त्वत्पादपद्मयुगलं विगलत्प्रभाभि -*
*र्भूयोऽभिषेक्ष्यति कदा नु शिरो मदीयम् ॥ ७० ॥*

वज्रेति। वज्रः वज्रायुधम्। मत्सी मत्स्यस्य स्त्रीति योपधा च्छब्दात् ङीष्प्रतिषेधे सत्यापि, "योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्याना मप्रतिषेध इति ङीष्। "सूर्यतिष्ये" त्यादिना यकारलोपः। सुधाकलशं अमृतकलशः कल्पकः सुरतरुः रेखारूपै र्वज्रादिभिः कल्पितः रचितः अङ्कः लक्षणं यस्य तत् त्वत्पादपद्मयुगलं भूयः बहुशः विगलन्तीभिः प्रभाभिः मदीयं शिरः कदानु अभिषेक्ष्यति अभिषिक्तं करिष्यति। सपदि त्वत्पादारविन्दमूलं प्रापयेत्यर्थः ॥ ७० ॥

अप्राकृत सौकुमार्यादियुक्तस्य मदीयचरणस्य कथं तवोत्तमाङ्गनिक्षेप इति भगवदभिप्राय माशङ्क्य साधारण मसाधारणञ्च दृष्टान्तद्वयं वदन् स्वस्याऽप्यभिलाष माविष्करोति -

*त्रैविक्रमक्रमकृताक्रमणत्रिलोक -*
*मुत्तंसमुत्तममनुत्तमभक्तिभाजाम्।*
*नित्यं धनं मम कदा हि मदुत्तमाङ्ग*
*मङ्गीकरिष्यति चिरं तव पादपद्मम् ॥ ७१ ॥*

त्रैविक्रमेति। मदुत्तमाङ्गं त्रैविक्रमे त्रिविक्रमसम्बन्धिनि क्रमे पदविन्यासे कृताक्रमणं आक्रान्तं त्रिलोकं येनेति तथोक्तम्। अनुत्तमां सर्वोत्तरां भक्तिं भजन्ते इति तथोक्तानां उत्तमं श्लाघ्यं उत्तंसं शिरोभूषणं मम नित्यं धनं निरन्तरस्पृहणीयं तव पादपद्मं कदा हि कदा वा चिरं अङ्गीकरिष्यति यावदात्मभाविस्वनिक्षेपरूपाङ्गीकारविषयं करिष्यतीत्यर्थ॥ ७१ ॥

*उन्निद्रपत्रशतपत्रसगोत्र मन्त -*
*र्लेखारविन्द मभिनन्दनमिन्द्रियाणाम्।*
*मन्मूर्ध्नि हन्त करपल्लवतल्लजं ते*
*कुर्वन्कदा कृतमनोरथयिष्यसे माम् ॥ ७२ ॥*

उन्निद्रेति। उन्निद्राणि विकसितानि पत्राणि यस्य तस्य शतपत्रस्य

सगोत्रं समानकुलं सदृश मित्यर्थः। अन्तः अन्तःप्रदेशे लेखारूप मरविन्दं यस्य तम्, इन्द्रियाणा मभिनन्दन मानन्दावहं मार्दवौज्ज्वल्य सौगन्ध्यादीना मनेकेन्द्रियानुभाव्यगुणानां सत्त्वा दिन्द्रियाणा मिति बहुवचनम्। ते तव कर एव पल्लवतल्लजः किसलयश्रेष्ठः तं मन्मूर्ध्नि कुर्वन् सन् कदा मां कृतमनोरथयिष्यसे कृतार्थयिष्यसे॥ ७२॥

*आङ्गी निसर्गनियता त्वयि हन्त कान्ति -*
*र्नित्यं तवाल मियमेव तथाऽपि चान्या।*
*वैभूषणी भवति कान्ति रलन्तरां सा*
*है पुष्कलैव निखिलाऽपि भवद्विभूतिः॥ ७३॥*

आङ्गीति। त्वयि आङ्गी अङ्गेषु भवा कान्तिः निसर्गेण स्वभावेन नियता सम्बद्धा स्वाभाविकी, भवतीति शेषः। इयमेव नित्यं तव अलं त्वदीयभोग्यतायै पर्याप्तेत्यर्थः। हन्त! हर्षे। तथाऽपि अस्या एव पर्याप्तत्वेऽपि अथ अन्या सा प्रसिद्धा वैभूषणी विभूषणसम्बन्धिनी कान्तिः अलन्तरां भवति, सुतरां भोग्यतायै पर्याप्तेत्यर्थः। निखिलाऽपि भवद्विभूतिः, भवद्विभूतिभूतं सर्वमपीत्यर्थः, पुष्कलैव पूर्णैव। है! आश्चर्ये। एकैकस्यैव यावदात्मभाविनित्यमुक्तभोगाय पर्याप्तत्वा दिति भावः॥ ७३॥

सम्प्रति विभूषणकान्त्यनुभव मेव प्रार्थयते -

*श्रीवत्स कौस्तुभकिरीटललाटिकाभिः*
*केयूरहारकटकोत्तमकर्णिकाभिः।*
*उद्दाम दाम मणि नूपुरनीविबन्धै -*
*र्भान्तं भवन्त मनिमेष मुदीक्षिषीय॥ ७४॥*

श्रीवत्सेति। श्रीवत्सस्य दिव्यविग्रहालङ्कारत्वाद्भूषणकोटौ परिगणनम्। ललाटिका ललाटालङ्कार ललन्तिकादिः, श्रीवत्सादिभिः। कर्णिका कर्णभूषणम् उत्तमेति तद्विशेषणम् केयूरादिभिः उद्गताः दाम्नः उद्दामानः

अप्रतिहतशोभा इति यावत्, ते च ते, दाम च दाम वनमाला, मणिनूपुरो रत्नमञ्जीरः, नीविबन्धः पट्टबन्धश्च। 'पट्टबन्धैः' इत्येवपाठे पट्टबन्धः उदरबन्धः, तै र्भान्तं प्रकाशमानं भवन्तम्, न विद्यते निमेषो यस्मि न्कर्मणि तद्यथा तथा, उदीक्षिषीय; उत्पूर्वादीक्षते र्धातो रात्मनेपदाशिषिलिङ्॥ ७४॥

सम्प्रति भगवद्विग्रहावयवशोभा माभरणशोभाञ्चानुभवितुं प्रार्थयते-

*ऐन्दीवरी क्वचि दपि क्वचनाऽऽरविन्दी*
*चान्द्रातपी क्वचन च क्वचनाऽथ हैमी।*
*कान्ति स्तवोढपरभागपरस्पर श्रीः*
*पार्येत पारणयितुं किमु चक्षुषो मे॥ ७५॥*

ऐन्दीवरीति। क्वचनाऽथेत्यत्र क्वचन अथ इति पदच्छेदः। क्वचिदपि ऐन्दीवरी इन्दीवर सम्बन्धिनी, विग्रहकनीनिकादा विति भावः। क्वचन आरविन्दी अरविन्दसम्बन्धिनी, वदनकरतलचरणतलादा विति भावः। क्वचन चान्द्रातपी चन्द्रिकासम्बन्धिनी, मन्दहासमुक्ताहारादा विति भावः। क्वचन हैमी कोस्तुभपीताम्बरादा विति भावः। एवं ऊढः धृतः परभागः वर्णान्तर सान्निध्यलब्धवर्णोत्कर्षो यया तादृशी परस्परस्य श्रीः शोभा यस्या स्सा तथोक्ता, तव कान्तिः मे चक्षुषोः पारणयितुं तृप्तिं कर्तु मित्यर्थः। पार्येत शक्नुयात् किमु, तादृशी दशा कदा मे भविष्यतीति भावः॥ ७५॥

*त्वां सेवितं जलजचक्रगदासिशार्ङ्गै -*
*स्तार्क्ष्येण सैन्यपतिनाऽनुचरै स्तथाऽन्यैः।*
*देव्या श्रिया सह वसन्त मनन्तभोगे*
*भुञ्जीय साञ्जलि रसङ्कुचिताक्षिपक्ष्मा॥ ७६॥*

त्वामिति। जलजः शङ्खः। "अब्जौ शङ्ख शशाङ्कौ च" इत्यमरः। पाञ्चजन्यसुदर्शनकौमोदकीनन्दकशार्ङ्गैः, तार्क्ष्येण पक्षिराजेन, सौन्यपतिना विष्वक्सेनेन, तथा पूर्वोक्त पाञ्चजन्यादिवत् अनुचरैः अन्यैः कुमुद

चण्डप्रचण्डादिभिश्च सेवितम्, श्रिया श्रीनाम्न्या "श्रीरित्येव च नाम ते भगवति!" इत्युक्ताभिधानवत्येति भावः। देव्या महिष्या सह। अनन्तस्य नागराजस्य भोगे विग्रहे वसन्तं त्वां साञ्जलि रहं असङ्कुचितानि असञ्जात सङ्कोचानि अक्षिपक्ष्माणि यस्य तथोक्तस्सन्, अनिमेष स्सन्नित्यर्थः। "पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि" इत्यमरः। अक्षिपक्ष्मेति प्रयोगः करिघटा मेघकादम्बिनी वंशकरीरः इत्यादिवत्। भुञ्जीय अनुभवेयम्। "भुजोऽनवने" इत्यात्मनेपदे लिङ्॥ ७६॥

*कैङ्कर्य नित्यनिरतै र्भवदेकभोगै -*
*र्नित्यै रनुक्षणनवीन रसार्द्रभावैः।*
*नित्याभिवाञ्छितपरस्परनीच भावै-*
*र्मद्दैवतैः परिजनै स्तव सङ्ग सीय॥ ७७॥*

कैङ्कर्येति। कैङ्कर्यनित्यनिरतैः निरन्तरसन्तन्यमान भगवत्कैङ्कर्यैरित्यर्थः। भवत्येकस्मिन्नेव भोगो येषां तैः, भवदनन्यभोगै रित्यर्थः। नित्यैः नित्यसिद्धैः अनुक्षणं नवीनो नूतनो यो रसः भगवदनुरागः, तेनार्द्रः द्रवीभूतो भावो येषां तैः। नित्य मभिवाञ्छितः परस्परं नीचभावः शेषत्वं यै स्तैः, भागवतशेषत्वस्य सर्वैरपि प्रार्थनीयत्वा दिति भावः। मद्दैवतैः मदाराध्यै रित्यर्थः। तव परिजनैः पूर्वश्लोकोक्तैः विष्वक्सेनप्रभृतिभिर्नित्यसिद्धैः अनुक्तै र्मुक्तैश्च सङ्गसीय सङ्गतो भूयासम्। सम्पूर्वाद्गमेः आत्मनेपदाशिषिलिङुत्तमैकवचनम्॥ ७७॥

परम प्राप्यभगवत्परिजनसमागमानन्तरं तदनुष्ठेयं श्रीभूमिनीला सहितस्य भगवतोऽनुभवं प्रार्थयमानः प्रथमतः प्रधानमहिष्या श्रिया विशिष्टस्यानुभव परीवाहरूपपरिचर्यां प्रार्थयते श्लोक त्रयेणैकवाक्येन -

*यत्किञ्चिदुज्ज्वल मिदं यदुपाख्ययाऽऽहु -*
*स्सौन्दर्यमृद्धि रिति य न्महिमांशलेशः।*

*नाम्नैव यां श्रिय मुशन्ति यदीयधाम*
*त्वा मामनन्ति यतमा यतमानसिद्धिः ॥ ७८ ॥*

यत्किञ्चिदिति। उज्ज्वलं तेजिष्ठं इदं परिदृश्यमानं यत्किञ्चिद्वस्तु, न तु जात्यादिनैयत्येनेति भावः । यस्याः श्रियः उपाख्यया नाम्ना आहुः, तेजिष्ठं सर्वमपि श्रीरिति वदन्तीत्यर्थः । यस्याः महिम्नोंऽशस्य एकदेशस्य लेशः अणुः सौन्दर्यं अवयवशोभा ऋद्धिः सम्पदितिचोच्यते। यद्वा, सौन्दर्य मृद्धिश्च यन्महिमांशलेश इत्युच्यते। यां नाम्नैव श्रिय मुशन्ति, योगरूढिभ्या मिति भावः । त्वां यदीयं धाम आमनन्ति, भगवतः श्रीनिवासत्वा दिति भावः । यतमा या श्रीः, यच्छब्दात्तमप् प्रत्ययः । यतमानानां "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये" इत्युक्तानां योगिनां सिद्धिस्वरूपिणी भवति। श्रिय एव सिद्धिप्रदत्वात्। कारणे कार्योपचारः । एतच्छ्लोकोक्तयच्छब्दानां तृतीयश्लोक प्रयुक्तेन तामिति पदेनाऽन्वयः ॥ ७८ ॥

*या वै त्वयाऽप्युदधिमन्थनयत्नलभ्या*
*याऽन्तर्हितेति जगदुन्मथनोद्यतोऽभूः ।*
*या च प्रतिक्षण मपूर्वरसानुबन्धै -*
*र्भावै र्भवन्त मभिनन्दयते सदैव ॥ ७९ ॥*

येति। त्वयाऽपि सत्यसङ्कल्पेन त्वयाऽपि या उदधिमन्थन मेव यत्नः प्रयासः तेन लभ्या भवति । या अन्तर्हितेति तिरोहितेति जगदुन्मथने जगदुपसंहारे उद्यतः उद्युक्तोऽभूः। प्रसिद्धश्चैतदारण्यकाण्डे, उत्तरश्रीरामायणे च। या प्रतिक्षणं, अपूर्वाणां निरन्तरानुभवेऽपि नित्यापूर्वाणां कदाचिदपि अननुभूतव दाश्चर्यावहाणां रसाना मनुबन्धो येषु तैः भावै स्सात्त्विकादिभावैः भवन्त मभिनन्दयते च आनन्दिनं करोति च । ता मित्यनन्तरश्लोकेनाऽन्वयः ॥ ७९ ॥

*रूपश्रिया गुणगणै र्विभवेन धाम्ना*
*भावै रुदारमधुरैश्चतुरैश्चरित्रैः ।*

*नित्यं तवैव सदृशीं श्रिय मीश्वरीं तां*
*त्वाञ्चाञ्चितः परिचरेय मुदीर्णभावः ॥ ८० ॥*

रूपेति । रूपस्य विग्रहस्य श्रिया शोभया लावण्य सौन्दर्यसौकुमार्यादिभिरिति यावत्। गुणगणैः दयावात्सल्यादि गुणसमूहैः, गुणानां गणत्वम् आश्रयण सौकर्यापादकत्वाऽऽश्रितकार्यापादकत्वादि-कार्यभेदे नेति मन्तव्यम् । विभवेन अवतारेण, धाम्ना स्थानेन, उदारैः महद्भिः मधुरैश्च तैः, भावैश्चित्तवृत्तिभिः, चतुरैः आश्रितसंरक्षणादिसमर्थैः चरित्रैः व्यापारैश्च नित्यं तवैव सदृशीम्, "तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् । राघवोऽर्हति वैदेहीं, तञ्चेय मसितेक्षण" इत्याद्युक्तसाधर्म्यविशिष्टा मित्यर्थः। "ईक्ष्वरीं सर्वभूतानां त्वा मिहोपह्वये श्रियम्" इत्युक्तां तां श्रियं, त्वाञ्च अञ्चितः प्राप्तः, अञ्चतेः कर्तरि क्तः। अहमिति शेषः। उदीर्णभावः उदारकैङ्कर्यमनोरथ स्सन्नित्यर्थः। परिचरेयं परिचर्यां कुर्याम्, उत्तरवाक्योक्तकैङ्कर्यैकरति र्भूयास मिति भावः ॥ ८० ॥

*या बिभ्रती स्थिरचरात्मक मेव विश्वं*
*विश्वम्भरा परमया क्षमया क्षमा च ।*
*ताम्मातर ञ्च पितरञ्च भवन्त मस्य*
*व्युच्छन्तु रात्रय इमा वरिवस्यतो मे ॥ ८१ ॥*

या इति। या देवी स्थिरचरात्मकं स्थावरजङ्गमस्वरूपं विश्वं जगत् बिभ्रत्येव वहन्त्येव (सती) विश्वम्भरा विश्वम्भरानामधेया भवति; न तु केवल रूढ्येति भावः । परमया निरवधिकया क्षमया क्षमागुणेन क्षमा क्षमानाम्नी भवति, अपराधसहिष्णुता क्षमा । मातरं सर्वसाधारण निरूपाधिकमातृत्वयुक्ता मित्यर्थः। क्षमाभरणयोः मातुरसाधारणगुणत्वा दिति भावः । तां भूमिदेवीं, पितरं भवन्तञ्च वरिवस्यतः शुश्रूषमाणस्य अस्य मे इमा रात्रयः, इमे काला इत्यर्थः नित्यविभूतौ दिवा रात्रिविभागा-भावात्। व्युच्छन्तु व्युष्टा स्स्युः, प्रभातानि भवन्तु, कैङ्कर्योपयुक्त काला भवन्त्वित्यर्थः। रात्रय इत्युक्तानुगुणो व्युच्छन्त्विति निर्देशः ॥ ८१ ॥

*भावै रुदारमधुरै र्विविधै र्विलासै-*
*र्भूविभ्रमस्मितकटाक्ष निरीक्षणैश्च।*
*या त्वन्मयी त्व मपि यन्मय एव सा मां*
*नीला नितान्त मुररीकुरुता मुदारा॥ ८२॥*

भावैरिति। उदारमधुरैः गभीरमनोहरैः भावैश्चित्तवृत्तिभिः विविधै र्विलासैः नानाविधै श्चित्तवृत्तिसूचकशृङ्गारचेष्टितैश्च भ्रूविभ्रमस्मितकटाक्ष-निरीक्षणैश्च भ्रूभङ्ग मन्दहासापाङ्गविलोकनैश्च। यद्वा, विविधैः भ्रूविभ्रमस्मित कटाक्षनिरीक्षणै र्विलासैश्चेत्यन्वयः। या नीला त्वन्मयी त्वमपि यन्मय एव। "मनस्वी तद्गत स्तस्या नित्यं हृदि समर्पितः" इत्युक्तप्रकारेण अन्योन्य मनन्यभोग्यौ भवन्ता वित्यर्थः। नितान्तमुदारा आश्रिताभिलषित-प्रदाननियता, सा नीला मा मुररीकुरुताम् नित्यकिङ्करत्वेन अङ्गीकारार्हं करोतु। "ऊरीकृत मुररीकृत मङ्गीकृतम्" इत्यमरः। "नीलातुङ्गस्तन-गिरितटीसुप्तम्" इत्युक्तप्रकारेण नीलाया भगवदभिमतवल्लभात्वात् तदङ्गीकार एव परमप्राप्य इति भावः॥ ८२॥

*भावै रनुक्षणमपूर्वरसानुविद्धै -*
*रत्यद्भुतै रभिनवै रभिनन्द्य देवीः।*
*भृत्या न्यथोचितपरिच्छदिनो यथार्हं*
*सम्भावयन्त मभितो भगवन्भवेयम्॥ ८३॥*

भावै रिति। हे भगवन्, अनुक्षण मपूर्वेण भोग्यतातिशयात् नित्यापूर्ववत्प्रतीयमानेन, रसेन शृङ्गाररसविशेषेण अनुविद्धैर्मिलितैः अत्यद्भुतैः अत्याश्चर्यावहैः अभिनवै र्नित्य मपूर्वैः भावै स्सात्त्विकादिभिः भावैः देवीः श्रीभूमिनीलाः अभिनन्द्य अत्यन्तानन्दयुक्ताः कृत्वा यथोचितः स्वस्वाधिकारानुरूपः परिच्छदः परिकरः वेत्रच्छत्रादि रेषा मस्तीति तथोक्तान् भृत्यान् विष्वक्सेनादीन् यथार्हं अधिकारानुगुणं सम्भावयन्तं सत्कृता न्कुर्वन्त मङ्गीकुर्वन्त मित्यर्थः। भवन्त मिति शेषः। अभितः

भवेयम् । "अभितः परितः" इत्यादिना द्वितीया । भवद्विषयक सर्वविधकैङ्कर्यकरण शीलो भूयास मित्यर्थः । यद्वा, भवन्तमभितो भवेयम् पत्नीपरिजनादिविशिष्टस्य भवतः परित स्सञ्चरन् भवदीयदिव्यमङ्गल-विग्रहमनुभवेय मित्यर्थः ॥ ८३ ॥

एवं परिपूर्णभगवदनुभवप्रार्थनां कृत्वा स्वनैच्यानुसन्धानेन एतादृशी प्रार्थनाऽपि अपचारावहेत्याह -

*हा हन्त हन्त ! हतकोऽस्मि खलोऽस्मि धिङ्मा -*
*म्मुह्यन्नहो अह मिदं किमुवाच वाचा ।*
*त्वा मङ्ग, मङ्गलगुणास्पद मस्तहेय-*
*माः स्मर्तुमेव कथ मर्हति मादृगंहः ॥ ८४ ॥*

हा हन्तेति । अङ्गेति सम्बोधने । "स्युः प्याड्वाडङ्ग हे है भोः" इत्यमरः । हा हन्त हन्ते त्यव्ययसमुदायेन खेदातिशय स्सूच्यते । हतकोऽस्मि दुष्कर्मभि र्हतप्रायः कृतोऽस्मीत्यर्थः । "असन्नेव स भवति, असद्ब्रह्मेति वेदचेत्, अस्ति ब्रह्मेति चे द्वेद, सन्त मेनं ततो विदुः" इत्युक्त ब्रह्मज्ञानालाभमूल-सत्ताहानि र्जायत इति भावः । अत एव खलोऽस्मि विषयान्तर प्रवणोऽस्मि । मां धिक् ! निन्दाविषं कुरु । "धि ङ्निर्भत्सननिन्दयोः" इत्यमरः । मुह्यन् अभोग्येषु शब्दादिषु भोग्यतया भ्राम्यन्नहं, वाचा अहृदयया केवलवाचेत्यर्थः । इदं कि मुवाच कि मवोचम् । उवाचेति लिडुत्तम-पुरुषैकवचनम् । अहो ! आश्चर्ये । निरन्तरं विषयानुभवप्रार्थनापरस्य मे भगवदनुभवप्रार्थना कथञ्जातेति भावः । अस्तहेयं निरस्त समस्तहेयगुणं, मङ्गलगुणास्पदं कल्याणगुणाकरं त्वां स्मर्तु मेव स्मृतिविषयं कर्तुमेव । एवकारेण अनुभवप्रार्थना व्यवच्छिद्यते । मादृगंहः मादृशानां जनाना मंहः दुरितं कर्तृ । "कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम्" इत्यमरः । कथ मर्हति, कथं वा युक्तं भवति ? स्मर्तु मेव नाऽऽर्हति, किं पुनः प्राप्तु मित्यर्थः । आः ! पीडायाम् । "आस्तु स्यात्कोपपीडयोः" इत्यमरः ॥ ८४ ॥

*अंहः प्रसह्य विनिगृह्य विशोध्य बुद्धिं*
*व्यापूय विश्व मशिवं जनुषाऽनुबद्धम् ।*
*आधाय सद्गुणगणानपि नाऽह मर्ह -*
*स्त्वत्पादयो र्यदह मत्र चिरं निमग्नः ॥ ८५ ॥*

अंह इति । यत् यस्मात् कारणात् अहं तत्र अंहस्सु चिरं निमग्नः अवगाढः, अतोहेतोः, अंहः दुरितं, प्रसह्य विनिगृह्य बलात्कारेण निराकृत्य "धर्मेण पाप मपनुदति" इति न्यायेन क्रमेण चिरकालानुष्ठित-प्रायश्चित्तविनाश्यं दुष्कर्म क्षमाविषयं कृत्वेत्यर्थः । बुद्धिं विशोध्य, "जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" इत्युक्तप्रकारेण प्रक्षीणाशेषकल्मषपुरुषचित्तोत्पत्तियुक्तां भक्तिमपि मदीयबुद्ध्या उत्पाद्येत्यर्थः । जनुषा जन्मना अनुबद्धं अनुषक्तं, विश्वं समस्तं अशिवं अशुभावहं विषयवासनारुच्यादि । अशिवं विश्व मिति वाऽन्वयः । व्यापूय शोधयित्वा, वि, आङ् पूर्वात् पूञ् पवने इति धातो र्ल्यप् । व्याधूयेति पाठे अपोह्येत्यर्थः । सद्गुणगणान् अपहतपाप्म-त्वादिगुणसमाजान् आधाय उत्पाद्याऽपि त्वत्पादयोः नाऽर्हः त्वच्चरण-परिचरणार्हो न भवामीत्यर्थः ॥ ८५ ॥

भगवतो दयावात्सल्यादिक मनुसन्धाय पुनस्समाहित हृदयो भवति ।

*जानेऽथ वा किमह मङ्ग यदेव सङ्गा -*
*दङ्गीकरोषि नहि मङ्गल मन्यदस्मात् ।*
*तेन त्वमेन मुररीकुरुषे जनञ्चे -*
*न्नैवामुतो भवति युक्ततरो हि कश्चित् ॥ ८६ ॥*

जाने इति । अथवेति पक्षान्तरे । अङ्गेति सम्बोधने । अहं किं जाने, एवं न जाने । त्वदङ्गीकारहेतुभूत त्वदीयवात्सल्यादिकं परिच्छिद्य न जानामीत्यर्थः । यदेव पूर्वोक्तं दुरित मेव, सङ्गात् स्वस्वामिभावसम्बन्धात् कारणात्, अस्मा द्दुरिता दन्यत् मङ्गलं परिग्राह्यता हेतुभूतं सुकृतं नास्तीति

मत्वेति शेषः। अङ्गीकरोषि हि; दुरित मेव सुकृतत्वेनाङ्गीकरोषिहीत्यर्थः। प्रसिद्ध श्चैतत् - "दोषो यद्यपि तस्य स्यात् सता मेतदगर्हितम्। विभीषणो वा सुग्रीव, यदि वा रावणः स्वयम्" इत्यादौ। यद्वा, देव, यत्तु सङ्गा दङ्गीकरोषि अस्माद्भवदङ्गीकारात् अन्यन्मङ्गलं नहीत्यन्वयः। भवदङ्गीकृतत्व मेव मङ्गल मिति भावः; अन्य त्समानम्। तेन दोषेषु गुणत्वबुद्धिमूलकारणेन सङ्गेन त्वं एनं जनं "आः स्मर्तुमेव कथ मर्हति मादृगंहः" इति पूर्वोक्तकलुषदूषित मिम मित्यर्थः। उररीकुरुषे चेत्, अङ्गीकरोषि यदि, अमुतः अमुष्मात् जनात्। पञ्चम्यास्तसिल्। युक्ततरः कश्चित् "तेषां ज्ञानी नित्ययुक्तः एकभक्ति र्विशिष्यते" इत्युक्तो योऽपि कोऽपि योगिश्रेष्ठो नैव भवति हि नास्त्येव हि। "नाऽयमात्मा प्रवचनेन" इत्यारभ्य "य मे वैष वृणुते तेन लभ्यः" इत्यत्र तात्पर्यम्। स्वस्वामिभावरूपसङ्गेन दोषेषु गुणत्वबुद्धिरूपवात्सल्यं जायते। तेनाऽस्मादृशा मपि अनुष्ठित साङ्गभक्तियोगाना मिव भवदङ्गीकारो भवतीति भावः॥ ८६॥

केवलवात्सल्यमूल भगवत्कृपाविषयत्वं निरन्तराचरितपापप्रचुरस्य स्वस्य कथं सम्भवतीति पुनरप्याशङ्कते -

*यन्नाऽभवाम भवदीयकटाक्षलक्षं*
*संसारगर्तपरिवर्त मतोऽगमाम।*
*आगांसि ये खलु सहस्र मजस्र मेव*
*जन्म स्वतन्महि कथं त इमेऽनुकम्प्याः॥ ८७॥*

यदिति। यत् यस्मात्कारणात् भवदीयकटाक्षस्य लक्षं लक्ष्यं पात्र मित्यर्थः। "लक्ष्यं लक्षं शरव्यञ्च" इत्यमरः। नाऽभवाम न भूताः। अतो हेतोः संसार एव गर्तः बिल मित्यर्थः। "गर्तावटौ भुविश्वभ्रे" इत्यमरः। संसारस्य अशक्यारोहणत्वात् गर्तत्वोक्तिः। तस्मिन्परिवर्तं परिवर्तनम् अगमाम प्राप्ताः स्मः। लुङुत्तम बहुवचनम्। जायमानकालकटाक्षाभावात

नित्यसंसारिणो जाता इत्यर्थः। एवं जन्मसु अनेकजन्मनीत्यर्थः। अजस्रं अविच्छेदेन सहस्रं आगांसि अकृत्यकरणाद्यपराधानेव खलु, अतन्महि अरचयाम। तनोतेरात्मनेपदलङुत्तमबहुवचनम्। त इमे असंख्यातेषु जन्मसु निरन्तर मनन्तापराधकारिण एते वयमित्यर्थः। कथ मनुकम्प्याः। "वधार्ह मपि काकुत्स्थः कृपया पर्यपालयत्" इत्यत्राऽपि सकृत् कृत एवापराध इति भावः॥ ८७॥

सम्प्रति संसारगर्तपरिवर्तनश्रान्तस्य कर्मज्ञानभक्तिशून्यस्य मम "एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः, जीवे दुःखाकुले विष्णोः कृपा काऽप्युपजायते" इत्युक्तनिर्हेतुककृपैव गति रित्याह -

*सत्कर्म नैव किल किञ्चन सञ्चिनोमि*
*विद्या प्यवद्यरहिता न तु विद्यते मे*
*किञ्च त्वदञ्चितपदाम्बुज भक्तिहीनः*
*पात्रं भवामि भगवन्भवतो दयायाः॥ ८८॥*

सदिति। हे भगवन् ज्ञानशक्त्यादिषाड्गुण्यपरिपूर्ण, किञ्चन किञ्चिदपि सत्कर्म, फल-सङ्ग-कर्तृत्व रहितं केवल भगवदाराधनरूपं यज्ञदानादिकं नित्यनैमित्तिकभेदेन वर्णाश्रमविहितं कर्म, नैव सञ्चिनोमि न सम्पादयाम्येव। नैवेति एक मव्ययं वा। किलेति प्रसिद्धौ। अवद्यरहिता संशयविपर्ययादि-दोषरहिता विद्याऽपि ज्ञानञ्च मे नतु विद्यते। अर्थपञ्चक विषयकसमीचीन-ज्ञान ञ्च नास्तीत्यर्थः। किञ्च, तदुभयाभावे सत्यपि त्वदञ्चितपदाम्बुजयोः त्वदीय सर्वसमर्चितपादारविन्दयोः भक्तिहीनः प्रीतिशून्यः, महनीयविषया प्रीति र्भक्ति रित्युच्यते। कर्मज्ञानभक्तियोगेषु प्रवेशमात्र मपि नास्तीति निष्कृष्टार्थः। एवम्भूतोऽहं भवतो दयायाः निर्हेतुककृपायाः पात्रं भवामि, स्वकीयदयाया स्तथाविधत्वा दिति भावः॥ ८८॥

*किं भूयसा प्रलपितेन यदेव किञ्चि-*
*त्पापाह्व मल्प मुरु वा तदशेष मेषः।*

*जानन्न वा शतसहस्रपरार्धकृत्वो*
*योऽकार्ष मेन मगतिं कृपया क्षमस्व ॥ ८९ ॥*

किमिति। भूयसा बहुना, प्रलपितेन प्रलापेन। नपुंसके भावे क्तः। किम् ? न किमपि प्रयोजन मित्यर्थः। अल्प मुरु वा स्वल्पं महद्वा, यदेव किञ्चित्पापाह्वं पापशब्दभिधेयं, मे यत्किञ्चि त्कर्माऽस्ति, तदशेषं तत्सर्वं जानन्वा न वा, ज्ञानेन अज्ञानेन वा, बुद्धिपूर्व मबुद्धिपूर्वं वेत्यर्थः। अल्प मुरु वा स्वल्पं महद्वा योऽहं शतसहस्रपरार्धकृत्वः अपरिमितकृत्व इत्यर्थः। अकार्षं कृतवानस्मि। अतः अगति मेनं गत्यन्तरशून्यम् अनन्यशरणमिमं जनं, कृपया केवलदयया क्षमस्व क्षमाविषयं कुरुष्व मदीयापराधान् क्षमस्वेत्यर्थः ॥ ८९ ॥

इदानीं भवदीयपरिग्रहातिशयसूचक ज्ञानभक्त्यादि सम्पन्न भगवद्रामानुजार्यकृपाविषय मपि मां विषयवासना दूषयतीति विषीदति-

*देव, त्वदीयचरणप्रणयप्रवीण-*
*रामानुजार्यविषयीकृतमप्यहो माम्।*
*भूयः प्रधर्षयति वैषयिको विमोहो*
*मत्कर्मणः कतर दत्र समानसारम् ॥ ९० ॥*

देवेति। हे देव स्वामिन्, त्वदीयचरणयोः प्रणये भक्त्यां प्रवीणः निपुणः भवदीयपादविषयक भक्त्यनुष्ठानकुशल इत्यर्थः। तादृशो यो रामानुजार्यः तेन विषयीकृतं परिगृहीतमपि मां वैषयिकः विषयसम्बन्धी विमोहः भ्रान्तिः अत्यन्तहेयविषयकभोग्यताबद्धि रित्यर्थः। भूयः भूयशः प्रधर्षयति परिभवति स्ववशीकरोतीत्यर्थः। अत्र अस्मिन् जगति मत्कर्मणः समानसारं तुल्यबलं कतरत् कीदृशं वा कर्मेत्यर्थः। तादृशं प्रबलं दुष्कर्म न परिदृश्यत इति भावः ॥ ९० ॥

सम्प्रति सांसारिकदुःखसन्तते रत्यन्तदुस्सहतां पञ्चभिः श्लोकैराह-

*गर्भेषु निर्भरनिपीडनखिन्नदेहः*
*क्षोदीयसोऽतिमहतोऽप्यखिलस्य जन्तोः ।*
*जन्मान्तरा ण्यनुविचिन्त्य परस्सहस्रा -*
*ण्यत्राऽह मप्रतिविधि र्निहतश्चरामि ।। ११ ।।*

गर्भेष्विति । क्षोदीयसः अतिक्षुद्रस्य, अल्पशरीरपरिमाणस्येत्यर्थः । अतिमहतः अतिस्थूलशरीरपरिमाणस्यापि,अखिलस्य जन्तोः कृत्स्नस्य सत्त्वस्य, गर्भेषु निर्भरनिपीडनेन अतिमात्रसम्बाधजन्यपीडयेत्यर्थः । खिन्नदेहः क्लिष्टशरीरः, परस्सहस्राणि जन्मान्तराणि अनुविचिन्त्य निहतः निहतप्रायः अहं अत्र अस्मिन् काले अप्रतिविधिः अप्रतिक्रियः प्रायश्चित्तशून्यस्सन् चरामि गर्भदशायां जातिस्मरणं, जातस्य ज्ञानभ्रंशोऽपि, "निरुच्छ्वासस्सचैतन्य स्स्मरन् जन्मशतान्यपि, आस्ते गर्भेऽतिदुःखेन निजकर्म-निबन्धनः ॥ विज्ञानभ्रंश माप्नोति ज्ञातश्च मुनिसत्तम" इति विष्णु पुराणे प्रतिपादितः । 'क्षोदीयसोऽतिमहतः' इति पिपीलिकादिः गजान्तश्च गृह्यते ॥ ११ ॥

*भूयश्च जन्मसमयेषु सुदुर्वचानि*
*दुःखानि दुःख मतिरिच्य किमप्यजानन् ।*
*मूढोऽनुभूय पुनरेव तु बालभावात्*
*दुःखोत्तरं निजचरित्र ममुत्र सेवे ।। १२ ।।*

भूयश्चेति । भूयश्च गर्भक्लेशानुभवानन्तरञ्च, जन्मसमयेषु, जन्मना मनेकत्वा द्बहुवचनम् । सुदुर्वचानि, ईदृशानि इयन्तीति निर्वक्तु मशक्यानि दुःखानि अनुभूय, दुःख मतिरिच्य किमप्यजानन् दुःखादन्य त्किमप्यननुभव न्नित्यर्थः । मूढः दुःखनिवर्तकोपायज्ञानशून्यः अहं, पुनरेव तु 'अपिच' इतिवत् एकपदमव्ययम्; पुनरपीत्यर्थः । बालभावात् बालत्वात् सुखोपायज्ञानानुष्ठानशून्यत्वा दित्यर्थः । अमुत्र परलोके, दुःखोत्तरं दुःखमुत्तरं यत्रेतिविग्रहः, प्रचुरदुःखावहं निजचरित्रं स्वकर्म सेवे भजामि, तादृशं पाप मनुतिष्ठामीत्यर्थः ॥ १२ ॥

इदानीं यौवनकालिकं चरित्र मनुसन्धत्ते -

*भूयांसि भूय उपय न्विविधानि दुःखा -*
*न्यन्यच्च दुःख मनुभूयसुखभ्रमेण।*
*दुःखानुबन्ध मपि दुःखविमिश्रमल्पं*
*क्षुद्रं जुगुप्सितसुखं सुख मित्युपासे॥ १३॥*

भूयांसीति। भूयः पुनरपि विविधानि नानाप्रकाराणि भूयांसि, बहूनि दुःखानि उपयन् प्राप्नुवन् अहं अन्य द्दुःखञ्च दुःखे ष्वन्यतम मेव सुखभ्रमेण अनुभूय दुःखविमिश्रं अनुभवदशाया मेव क्लेशाविनाभूतं, दुःखानुबन्धमपि कालान्तरे दुःखोत्पादकञ्च, अल्पं अल्परूपं क्षुद्रं अल्पकालिकं, क्षयिष्णु इत्यर्थः, स्वप्नकल्पमिति यावत्। जुगुप्सितसुखं शिष्टगर्हितं, विषयानुभवसुख मिति यावत्। इद मेव सर्वोत्तीर्णं सुख मिति मत्वा उपासे तत्साधनान्यनुतिष्ठा मीत्यर्थः॥ १३॥

*लोलद्भि रिन्द्रियहयै रपथेषु नीतो*
*दुष्प्रापदुर्भगमनोरथमथ्यमानः।*
*विद्याधनाभिजनजन्ममदेन काम -*
*क्रोधादिभिश्च हतभी र्न शमं प्रयामि॥ १४॥*

लोलद्भिरिति। लोलद्भिः चलद्भिः इन्द्रियहयैः, "इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः" इत्युक्तप्रकारेण विशृङ्खलप्रचारै रिन्द्रियाश्वैः अपथेषु अपमार्गेषु नीतः, अतएव दुष्प्रापै र्दुर्लभैः, दुर्भगै र्गर्हितैश्च मनोरथै र्मनोरथशतैः, "य त्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः, एकस्याऽपि न पर्याप्तम्" इत्युक्तप्रकारेण असंख्यातै र्मनोरथैः मथ्यमानः पीड्यमानः, अतएव हतभीः निर्भयोऽहं, विद्याधनाभिजनेभ्यो जन्म यस्य तेन मदेन, "विद्यामदो धनमदस्तथैवाऽभिजनो मदः" इत्युक्तमदत्रयेणेत्यर्थः। कामक्रोधादिभिश्च आदिशब्देन असूयामात्सर्यादयो गृह्यन्ते। शम मिन्द्रियजयं न प्रयामि न भजामि॥ १४॥

उक्तमर्थ मेव विवृणोति -

***लभ्येषु दुर्लभतरेष्वपि वाञ्छितेषु***
***जाता सहस्रगुणतः प्रतिलम्भनेऽपि।***
***विघ्नै र्हतेष्वपि च तेषु समूलघातं***
***वर्धिष्णु रेव, न तु शाम्यति हन्त तृष्णा॥ ९५॥***

लभ्येष्विति। लभ्येषु सुलभेषु, दुर्लभतरेषु अत्यन्तदुर्लभेष्वपि वाञ्छितेषु इष्टवस्तुषु जाता तृष्णा सहस्रगुणतः सहस्रकृत्वः तेषां सुलभानां प्रतिलम्भने लाभेऽपि, तेषु दुर्लभतरेषु समूलघातं यथा तथा विघ्नै र्हतेषु हिंसितेष्वपि वर्धिष्णु रेव प्रतिक्षणं पल्लविता भवतीत्यर्थः। किन्तु न शाम्यति, लभ्याना मनन्तकृत्वो लाभेऽपि न तृष्णोप शमः; सर्वात्मना दुर्लभानां समूलहानावपि न तृष्णोपशम इतिभावः। हन्तेति खेदे। न तु शाम्यति, किन्तु वर्धिष्णुरेवेति वाऽन्वयः॥ ९५॥

प्रातिकूल्यवर्जनाभाव मुक्त्वा, आनुकूल्यसङ्कल्पोऽपि नास्तीत्याह-

***त्वत्कीर्तनस्तुतिनमस्कृतिवेदनेषु***
***श्रद्धा न भक्ति रपि शक्ति रथो न चेच्छा।***
***नै वा नु तापमतिरेष्वकृतेषु किन्नु***
***भूया नहो परिकरः प्रतिकूलपक्षे॥ ९६॥***

त्वदिति। त्वदीयनामकीर्तन गुणकीर्तनप्रणामध्यानेषु भक्तिः अत्यन्ताभिनिविष्टभोग्यताबुद्धिः न, श्रद्धा विश्वासत्वरा च न, शक्तिः अनुष्ठानसत्त्वमपि न, अथो अथवा पूर्वोक्तत्रितयाभावेऽपि इच्छा रुचिरपि च न। एष्वकृतेषु अननुष्ठितेषु अनुतापमतिश्च नैव। ''एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते। दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं न[illegible] इत्युक्तानुतापोऽपि नास्ति। किन्तु प्रतिकूलपक्षे भूयान् अनेक[illegible] उपकरणं अस्तीति शेषः। अहो आश्चर्ये॥ ९६॥

प्रातिकूल्यसद्भाव मेवाऽऽह -

*एतेन वै सुविदितं बत मामकीनं*
*दौरात्म्य मप्रतिविधेय मपार मीश !*
*सम्मूर्छतोऽप्यपदमस्मि यतस्त्वदीय-*
*निस्सीमभूमकरुणामृतवीचिवायोः ॥ १७ ॥*

एतेनेति। हे ईश, यतः कारणात् सम्मूर्छतोऽपि सर्वत्र विसृत्वरस्यापि त्वदीया निस्सीमभूमा निरवधिकमहिमा च करुणैव अमृतवीचिः क्षीरार्णवः अमृतोत्पत्तिनिमित्तत्वात् क्षीरार्णवस्य तथोक्तिः, तस्या स्सम्बन्धिनो वायोः करुणापरम्परा सम्बन्ध स्यापीत्यर्थः । अपद मस्मि अपात्र मस्मि । एतेन कारणेन अपारं अप्रतिविधेयं दुस्समाधेयं प्रायश्चित्ताविनाश्य मित्यर्थः । मामकीनं दौरात्म्यं दुस्स्वभावत्वं, "[1]आत्मा देहे धृतौ बुद्धौ स्वभावे परमात्मनि" इत्यमरः । सुविदितं हि सुप्रसिद्धं हीत्यर्थः: । विषयविभागाभावेन विजृम्भमाण भगवदनुकम्पापयोनिधितरङ्ग शीकर सम्बन्धिगन्धवहस्याप्यविषयत्वात् मदीयदुष्कृतं निष्कृतिरहित मिति विदित मिति भावः ॥ १७ ॥

तर्हि का गति रित्याशङ्कायां मदङ्गीकारेण भवदीयकल्याणगुणानां विषयलाभो भवतीत्याह-

*ऐश्वर्यवीर्यकरुणागरिमक्षमाद्याः*
*स्वामि न्नकारण सुहृत्त्व मथो विशेषात् ।*
*सर्वे गुणा स्सविषया स्तव मा मपार -*
*घोराघपूर्ण मगतिं निहतं समेत्य ॥ १८ ॥*

ऐश्वर्येति । हे स्वामिन्, अनया सम्बुद्ध्या अपराधसहन-पूर्वकेष्टप्रापकत्वे प्राप्ति रुक्ता । ऐश्वर्यं किञ्चित्कारनिरपेक्षत्वे हेतुः । वीर्यं

---

1. 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरकोशपाठः ।

सङ्कल्पानुगुणरक्षणे हेतुः । करुणा "व्यसनेषु मनुष्याणाम्" इत्युक्तप्रकारेण आश्रितदुःखनिवृत्तेः स्वदुःखनिवृत्तित्वे हेतुः । गरिमा आश्रितदोषानभिज्ञतायां हेतुः । क्षमा अपराधसहनशीलता । आद्यशब्देन वात्सल्यसौशील्यादयो गृह्यन्ते । तव सर्वे गुणाः अथो अनन्तरं विशेषात् अकारणसुहृत्त्वम् अनुपकारिण्यपि सौहार्दम् । इदमनिष्टनिवृत्तिपूर्वकेष्टप्रापणे हेतुः अयं गुणश्च अपारघोराघपूर्णं दुस्तरदुर्विषह (निरयावहपुरस्कृतत्वावच्छिन्न) दुष्कृतसम्पूर्णं अगतिं प्रायश्चित्तादि शून्यम्, अतएव नितरां हतं मां समेत्य सविषयाः विषयलाभवन्तः; अन्यत्र भवद्गुणानां सर्वेषां विषयलाभो न भवतीति भावः ॥ ९८ ॥

यथाकथञ्चि दपराधसहनेऽपि अपवर्गप्रदान मनुष्ठितसाधनाना मेवेत्याशङ्क्याऽऽह -

*त्वत्पादसंश्रयणहेतुषु साधिकारा -*
*नुद्युञ्जत श्चरितकृत्स्नविधींश्च तांस्तान् ।*
*त्वं रक्षसीति महिमा न तवाऽल मेष*
*माञ्चेदनीदृश मनन्यगतिं न रक्षेः ॥ ९९ ॥*

त्वदिति । हे स्वामि न्नित्यनुषङ्गः । त्वत्पादसंश्रयणे भवत्पदारविन्दप्राप्तौ हेतुषु साधनभूतेषु कर्मयोगादिषु साधिकारान् उपनयनाध्ययनाद्यधिकारसहितान् उद्युञ्जतः अनुष्ठानोद्योगवतः, चरितकृत्स्नविधीन् अनुष्ठितसाङ्गसाधनांश्च तांस्तान् त्वं रक्षसीति तवैष महिमा, नाऽलं न पर्याप्तः । कुत इत्यत आह मा मिति । अनीदृशं पूर्वोक्ताधिकारानुष्ठानशून्यम्, अतएव अनन्यगतिं उपायान्तर शून्यं न रक्षेश्चेत् तव महिमा नाऽलमिति पूर्वेणान्वयः । अनुष्ठितसाधनजनरक्षणं कृतप्रतिकृतप्रायं स्यादिति भावः ॥ ९९ ॥

तर्हि अपवर्गसाधनानुष्ठानविधिवैयर्थ्यं स्या दित्यत आह -

*या कर्मणा मधिकृति र्य इहोद्यमस्ते -*
*ष्वप्येष्वनुष्ठिति रशेष मिदं हि पुंसाम्।*
*त्वा मन्तरेण न कथञ्चनशक्य माप्तु -*
*मेव ञ्च तेषु मयि चाऽस्ति न ते विशेषः ॥ १०० ॥*

येति। या पूर्वोक्ता कर्मणा मधिकृतिः अधिकारः इह तेषु शास्त्रप्रसिद्धेषु एषु कर्मसु उद्यमः उद्योगः अनुष्ठितिः अनुष्ठान मपि। अत्र कर्मशब्देन मुक्तिसाधन मुच्यते। अशेष मिदं अधिकारोद्योगानुष्ठानानीत्यर्थः। त्वा मन्तरेण त्वत्सङ्कल्प मन्तरेणेत्यर्थः। आप्तुं अधिगन्तुं कथञ्चन अतिप्रयासेनाऽपि न शक्यम्। एवञ्च सति, अशेषस्याऽपि त्वत्सङ्कल्पायत्तत्वे सति तेषु अनुष्ठितसाधनेषु, मयि च ते तव विशेषो नाऽस्ति; साधनानुष्ठान मपि त्वत्सङ्कल्पायत्त ञ्चेत् त्वत्पादसंश्रयणे एव सङ्कल्पः कर्तव्य इति भावः ॥ १०० ॥

साधनानुष्ठानद्वारैव रक्षितव्य मिति यदि सङ्कल्प स्तदानीं गति माह-

*निर्बन्ध एष यदि ते य दशेषवैध-*
*संसेविनो वरद, रक्षसि नेतरां स्त्वम्।*
*तर्हि त्व मेव मयि शक्त्यधिकारवाञ्छाः*
*प्रत्यूहशान्ति मितरच्च विधेहि विश्वम् ॥ १०१ ॥*

इति हारीतकुलतिलक श्रीवत्सचिह्नमिश्रविरचिते पञ्चस्तवे श्रीवैकुण्ठस्तवः परिसमाप्तः ॥

निर्बन्धेति। हे वरद, वरं श्रेष्ठपुरुषार्थं ददातीत्यर्थः। अनेन सिद्धोपायत्वं भगवत स्सूचितम्। अशेषवैधसंसेविनः विध्युक्तसमस्त साधनानुष्ठानानुष्ठातॄन् रक्षसि, इतरान् न रक्षसीति यत् एष निर्बन्धः ते यदि अस्ति चेत्, तर्हि तदा त्वमेव मयि शक्त्यधिकारवाञ्छाः वाञ्छाशक्तिभ्यां तत्कार्ये उद्योगानुष्ठाने लक्ष्येते। प्रत्यूहशान्तिं विघ्नशमनं, इतर द्विश्वं च

अङ्गोपाङ्गपूर्तिरूप मन्य त्सर्वञ्च विधेहि। अत्र "सुदुष्करेण शोचे द्यो येन येनेष्टहेतुना, स स तस्याऽह मेवेति चरमश्लोकसङ्ग्रहः" इत्यभियुक्तोक्ति रनुसन्धेया॥ १०१ ॥

इति पञ्चस्तवव्याख्याने श्रीवैकुण्ठस्तवव्याख्या परिसमाप्ता॥

*व्यक्तीकुर्व न्निगम शिरसा मर्थ मन्तर्निगूढं*
*श्री वैकुण्ठस्तवमकृत यः श्रेयसे सज्जनानाम्।*
*कूराधीशं गुरुतरदयादुग्धसिन्धुं त मीडे*
*श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैकधाम॥*

# अतिमानुषस्तवः

एवं श्रीवैकुण्ठनाथविषयं श्रीवैकुण्ठस्तवं परिसमाप्य व्यूहावतारस्याऽपि तत्समानयोगक्षेमतया तमुपेक्ष्य अनन्तरं विभवावतारं तुष्टूषन्तः श्रीवत्साङ्कमिश्राः, अतिमानुषावहचित्रचरित्रासक्तभगवद्वाल्मीकि पराशर पाराशर्य शुकप्रभृतिभिः भट्टनाथपराङ्कुशपरकालप्रभृतिभिः परमाचार्यैश्चाऽऽविष्कृतं अतिरहस्यं अतिमानुषचरित्र वैचित्र्य मेव मादृशां प्रकाशयितुं प्रथमतो नमस्क्रियारूपं मङ्गलं निबध्नन्ति -

*अतिमानुषशीलवृत्तवेषै-*
*रतिवृत्तामरविक्रमप्रतापैः ।*
*अतिलङ्घितसर्वलोकसाम्यं*
*वरये वैष्णववैभवावतारम् ॥ १ ॥*

अतीति । विक्रमः निर्विशङ्कं शत्रुसैन्यप्रवेशः, प्रतापः परैरनभिभवनीयत्वं, अविषह्यत्वञ्च अमराणां विक्रमप्रतापौ अतिवृत्तौ अतिक्रान्तौ यै स्तैः । अतिमानुषैः मानुषा नतिक्रान्तैश्च तैः शीलवृत्तवेषैः स्वभावव्यापाराकारैः । यद्वा, अतिवृत्तामरैश्च तै र्विक्रमप्रतापैश्चेति स्वतन्त्रं वा । तदानीं विक्रमप्रतापयो रवान्तरभेदेन बहुत्वं द्रष्टव्यम् । मनुष्ये ष्वदृष्टचरैश्शीलवृत्तवेषैः, अमरेष्वप्यदृष्टचरै र्विक्रमप्रतापैश्च अतिलङ्घितं सर्वलोकसाम्यं सर्वजनसादृश्यं सकलभुवनेषु सादृश्यं येन तम्, ''जन्मकर्म च मे दिव्यम्' इत्युक्ते रिति भावः । वैष्णवं विष्णुसम्बन्धिनं वैभवावतारं विभव एव वैभवम्, विभवावतार मित्यर्थः । वरये समाश्रयणीयत्वेन वृणोमि

स्वीकरोमीत्यर्थः, "स उ श्रेयान्भवति जायमानः" इति श्रुतेः। "य स्सर्वज्ञ स्सर्ववित्", "पराऽस्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च", "त मीश्वराणां परमं महेश्वरम्", "न तत्समश्चाभ्यधिकश्च दृश्यते", "अपहतपाप्माविजरः" इत्याद्युक्ताः कल्याणगुणाः अवतारेष्वेव सम्यक्प्रकाशन्ते इति स एव समाश्रयणीय इति भावः ॥ १ ॥

अनन्तरं सर्वावतारप्रधानश्रीदाशरथिप्रतिनिधि श्रीरङ्गनाथ-चरणारविन्द प्रणामरूपां श्चतुरः श्लोका नाह -

*श्रेयः किरन्तु किरणाश्चरणारविन्द*
*निष्यन्दमानमकरन्दरसौघदेश्याः ।*
*तज्जाः श्रुते र्मधुन उत्स इति प्रतीता*
*माङ्गल्यरङ्गनिलयस्य परस्य धाम्नः ॥ २ ॥*

श्रेय इति । माङ्गल्यं मङ्गलप्रदं यद्रङ्गं श्रीरङ्गविमानं तत् निलयो वासस्थानं यस्य तस्य परस्य धाम्नः, "नारायण परो ज्योतिः" इत्युक्तस्य भगवतः चरणारविन्दनिष्यन्दमानस्य प्रवहतः मकरन्दरसौघस्य देश्याः सदृशप्रायाः । "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति देश्य प्रत्ययः । श्रुते र्वेदात्, मधुनो मकरन्दस्य उत्सः प्रवाह इति प्रतीताः प्रसिद्धाः । "विष्णोः पदे परमे मध्व उत्सः" इति श्रुते रिति भावः । तज्जाः चरणारविन्दजनिताः किरणाः श्रेयः किरन्तु विस्तारयन्तु, वर्धयन्त्वित्यर्थः। चरणारविन्दाना मत्यन्तभोग्यतया मधुसाम्य मिति मन्तव्यम्। मदीयशरण-वरणविषयाः रङ्गरमणचरणकिरणाः अतिमानुषावतारचरित्रस्तोत्रानुगुणां वाणीसमृद्धिं प्रदिश न्त्विति हार्दो भावः ॥ २ ॥

*श्रीमत्पराङ्कुशमुनीन्द्रमनोनिवासा-*
*त्तज्जानुरागरसमजनमञ्जसाऽऽप्य ।*
*अद्याप्यनारततदुत्थितरागयोगं*
*श्रीरङ्गराजचरणाम्बुज मुन्नयामः ॥ ३ ॥*

श्रीमदिति। श्रीमत्पराङ्कुशमुनीन्द्रमनसि निवासात् निरन्तरवासात् तज्जे पराङ्कुशमूनीन्द्रमनोजनिते अनुरागरसे मज्जन मवगाहनम्, अञ्जसा द्रुतम् आप्य अधिगम्य अद्याऽपि अनारतः अविश्रान्तः तदुत्थितः अनुरागरसमज्जनजनितः रागयोगः रक्तिमसम्पर्कों यस्य तत् श्रीरङ्गराजचरणाम्बुजं उन्नयामः उन्नतं कुर्मः प्रणता भवाम इत्यर्थः। श्रीपराङ्कुशान्तरङ्गस्य श्ररङ्गनाथचरणविषयकानुरागभरितत्वात् तस्मि न्निवसत स्तस्य तदीयानुरागवर्ण सम्पर्को जात इत्युत्प्रेक्ष्यते ॥ ३ ॥

*वज्रध्वजाङ्कुश सुधाकलशातपत्र*
*पङ्केरुहाङ्कपरिकर्मपरीत मन्तः।*
*आपादपङ्कज विशृङ्खलदीप्रमौलेः*
*श्रीरङ्गिणश्चरणो र्युग माश्रयामः ॥ ४ ॥*

वज्रेति। अन्तः अन्तःप्रदेशे वज्रं वज्रायुधं सुधाकलशः अमृतकलशः वज्रध्वजाङ्कुशसुधाकलशातपत्रपङ्केरुहाणां अङ्काः चिह्नान्येव परिकर्म अलङ्कारः तेन परीतमावृतम्, आपादपङ्कजं पादपङ्कजपर्यन्तं विशृङ्खलम् अनर्गलं यथातथा दीप्रः उज्ज्वलः मौलिः किरीटं यस्य तस्य श्रीरङ्गिणःचरणयो र्युग माश्रयामः। सर्वेश्वरत्वसूचकसमुज्ज्वलमौलेः श्रीरङ्गराजस्य अत्यन्तभोग्यवज्रादिचिह्नसमग्रतलमङ्घ्रियुग्मं शरणं भजाम इत्यर्थः ॥ ४ ॥

*श्रीरङ्गराजचरणौ प्रणुमो ययोः ख -*
*ल्वेक स्त्रिविक्रम विधौ वसुधा मशेषाम्।*
*व्यक्रंस्त साचलकुला मपि विप्रकीर्ण -*
*स्थूलावलग्नसिकता मिव निर्णतोच्चम् ॥ ५ ॥*

श्रीरङ्गेति। श्रीरङ्गराजचरणौ प्रणुमः स्तुम इत्यर्थः। णु स्तुता विति धातुः। ययो र्मध्ये एकः त्रिविक्रमविधौ त्रिविक्रमणविधाने साचलकुलां अचलकुलसहितां, कुलाचलसहिता मिति वा। आहिताग्न्यादित्वा त्साधुः।

अशेषा मपि वसुधां, विप्रकीर्णस्थूलावलग्नसिकतामिव स्थिताम्, विप्रकीर्णाः स्थूलाः पादतलावलग्नाः सिकताः यस्या स्सा इति विग्रहः। तदानीं कुलाचलाः पादतललग्न स्थूल सिकता इव स्थिता इति भावः। निर्णतोच्चं -निर्गताः नतोच्चाः नीचोन्नता यस्मिन्कर्मणि तद्यथा भवति तथा, उच्चनीचरहित मिति यावत्। अनेन कृत्स्नपदार्थाना मविशेषेण पादस्पर्शो विवक्षितः। व्यक्रंस्त खलु अक्रान्तवा न्किल। 'क्रमु पादविक्षेपे' इत्य स्मा द्धातोः कर्तरिलुङ् ॥ ५ ॥

**ज्ञानं बलं विपुल मीशनवीर्यशक्ति -**
**तेजांसि च त्रियुग भूय मुपागतानि।**
**पूर्णानि षट् च परिगृह्यभवंश्चतुर्धा**
**भक्तं जनं त्व मनुजग्रहिथाऽनुरागात् ॥ ६ ॥**

ज्ञानमिति। विपुलमिति विशेषणं वचनव्यत्यासेन सर्वत्र योज्यम्। ज्ञानबले ऐश्वर्यवीर्ये शक्तितेजसी इति त्रियुगभूयं युगलत्रयत्वं उपागतानि प्राप्तानि पूर्णानि समस्तानि - षट् च परिगृह्य स्वीकृत्य चतुर्धा भवन् वासुदेव सङ्कर्षणप्रद्युम्नानिरुद्ध रूपेण चतुःप्रकारस्सन् त्वं अनुरागात् प्रेम्णः अनुग्रहावह प्रसादा दित्यर्थः। भक्तंजनं अनुजग्रहिथ अनुगृहीतवान्। भवतश्चतुर्विधविग्रहपरिग्रहः आश्रितानुग्रहायेति भावः। "षाड्गुण्याद्वासुदेवः पर इति स भवान्मुक्तभोग्यो, बलाढ्यात् बोधात्सङ्कर्षण स्त्वं हरसि वितनुषे शास्त्र, मैश्वर्यवीर्यात्। प्रद्युम्न स्सर्गधर्मौ नयसि च, भगवन्! शक्तितेजोऽनिरुद्धो बिभ्राणः पासि तत्त्वं गमयसि च तथाव्यूह रङ्गाधिराज!" इति श्लोकोऽत्र अनुसन्धेयः ॥ ६ ॥

***एकान्तमङ्गलगुणास्पद मस्तहेयं***
***नित्यं पदं तव यत स्तत एव देव।***
***आम्नायते तदिह विश्वविरूपरूपं***
***तेनैव नन्विद मशब्द मरूप माहुः ॥ ७ ॥***

एकान्तेति। हे देव ! तव पदं पद्यते प्राप्यते उपास्यते इति पदं स्वरूपं यतः नित्यं सदा एकान्ताना मसाधारणानां मङ्गलगुणाना मास्पदं आधारभूतं अस्तहेयं निरस्तावद्यञ्च, भवतीति शेषः। ततः कारणादेव तत्पदम् इह विश्वविरूपरूपं सकल विलक्षणाकारं आम्नायते आम्नायैः प्रतिपाद्यते। तेनैव हेतुना इदं स्वरूपं अरूपं रूपहितम्, अशब्दं नाम रहितञ्च आहुः, आम्नाया इति शेषः। लौकिकसकल विसजातीय हेयप्रत्यनीक कल्याणैकतान त्वोभयलिङ्गविशिष्टं भवत्स्वरूपं "य ऐषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते तस्योदिति नाम" इति रूपनामवत्त्वेऽपि नामरूपरहित माम्नायते इति भावः ॥ ७॥

उक्तमर्थ मेव विवृणोति -

*शब्दादिहेय इह गोचर इन्द्रियाणां*
*तत्प्रत्यनीक विभव स्त्वमतीन्द्रियोऽसि।*
*तेनैव ते न बत ! दर्शन मस्ति किञ्चि-*
*द्वाचो धियश्च तत एव न गोचरोऽसि॥ ८॥*

शब्दादीति। शब्दादिश्चाऽसौ हेयश्च तथोक्तः हेयशब्दादिविषय इत्यर्थः। इन्द्रियाणां गोचरः विषयः श्रोत्रादीन्द्रियग्राह्य इत्यर्थः। तत्प्रत्यनीकः, अन्धकारस्याऽऽतप इव सहावस्थानासह इति भावः। विभवः कल्याणगुणसम्पत् यस्य स तथोक्तः, त्व मतीन्द्रियोऽसि इन्द्रियाविषयोऽसि। तेनैव हेतुना ते दर्शनं साक्षात्कारः नाऽस्ति। "न मांसचक्षु रभिवीक्षते तम्"। तत एव हेतोः वाचो धियश्च न गोचरोऽसि। "न चक्षुषा गृह्यते नाऽपि वा चा", "मतं यस्य न वेद सः"। बतेति खेदे। एतादृशस्य भवतो दर्शनं मम कदाऽपि न सम्भवतीति भावः॥ ८॥

*एवं स्थिते त्वदुपसंश्रयणाभ्युपायो*
*मानेन केन चि दलप्स्यत नोपलब्धुम्।*
*नोचे दमर्त्यमनुजादिषु योनिषु त्व-*
*मिच्छाविहारविधिना समवातरिष्यः॥ ९॥*

एव मिति । एवं स्थिते, भवतोऽतीन्द्रियत्वे स्थिते सति त्व मिच्छा विहार विधिना । स्वैरसञ्चारविधानेन हेतुना अमर्त्यमनुजादिषु योनिषु, आदिशब्देन तिर्यक्स्थावरौ गृह्येते, नो समवारतिष्यश्चेत्, अवतारं नाऽकरिष्यो यदि त्वदुपसंश्रयणाभ्युपायः भवत्समाश्रयरूप उपायः उपलब्धुं ज्ञातुं केन चिन्मानेन अवताराविषयकेन केनाऽपि प्रमाणेन नाऽलप्स्यत, ल भेरात्मनेपदे लृङ्, दुर्लभोऽभविष्य दित्यर्थः । अवतारेण सकलमनुज नयन विषयतां गतत्वात् त्वत्समाश्रयणीयत्वज्ञानं सुलभं बभूवेतिभावः । "तमेव शरणं गतः" "मा मेकं शरणं व्रज", "नमश्चक्रुर्जनार्दनम्" इत्युक्त प्रकारेण शरणागतिज्ञान मवतारविषयक श्रीरामायणाद्यधीन मिति हृदयम् ॥ ९ ॥

उक्तमेव विवृणोति -

*शीलः क एष तव हन्त ! दयैकसिन्धो*
*क्षुद्रे पृथग्जनपदे जगदण्डमध्ये ।*
*क्षोदीयसोऽपि हि जनस्य कृते कृती त्व*
*मत्राऽवतीर्य ननु लोचन गोचरोऽभूः ॥ १० ॥*

शील इति । हे दयैकसिन्धो ! कृती कृतकृत्य स्त्वं जगदण्ड मध्ये क्षुद्रे अत्यल्पे पृथग्जनपदे निहीनजनानां वासस्थाने, "प्राकृतश्च पृथग्जनः, निहीनोऽपशदो जाल्म" इत्यमरः । क्षोदीयसः अतिक्षुद्रस्य जनस्य कृते जनायेत्यर्थः । अत्राऽवतीर्य लोचनगोचरोऽभूः । नन्विति प्रसिद्धौ । तव क एष शीलः ? महतो मन्दै स्सह संश्लेषः इया निति परिच्छेत्तु मशक्य इत्यर्थः। हन्तेति हर्षे । शेषशेषाशानादि सूरिपरिषत्सेव्यस्य उभयविभूत्यधिपतेः तव एकस्मिन्नण्डे अतिक्षुद्रे निहीनावासे अतिक्षुद्रजन-निमित्तावतारप्रयुक्त श्शीलः परमपरिच्छेद्य इति भावः ॥ १० ॥

इदानीं सौशील्यप्रयुक्तं स्वतन्त्र्य माह -

**यं पातकात्सुमहतोऽप्युदधारयस्त्वं**
**त्वत्पादवारिपरिपूतशिराश्च योऽभूत् ।**

**तं वन्दसे किल ततश्च वरं वृणीषे**
**क्रीडाविधिर्बत! विलक्षणलक्षण स्ते ॥ ११ ॥**

यमिति । त्वं यं रुद्रं सुमहतोऽपि पातकात् स्वपितृचतुरानन शिरश्छेद्प्रयुक्तपातकात् उदधारयः उद्धृतं कृतवान् कपालमोचनेनेति भावः । यः त्वत्पादवारिणा गङ्गाजलेन परिपूतशिराश्च अभूत् तं रुद्रं वन्दसे प्रणमसि । ततः रुद्रात् 'वरञ्च पुत्रोत्पत्तिरूपं कैलासयात्राया मिति भावः । वृणीषे याचसे । ते तव क्रीडाविधिः लीलाव्यापारः, विलक्षणं लोकविसदृशं लक्षणं यस्य तथोक्तो भवति । बतेत्याश्चर्ये । स्वरक्ष्यविषये प्रणमनवरप्रार्थने अत्याश्चर्यकरे इति भावः ॥ ११ ॥

कृष्णेन प्रणामादिके कृतेऽपि कथं रुद्र स्तन्महिमान मजान न्निव स्थितवा नित्याशङ्काया माह -

***क्रीडाविधेः परिकर स्तव या तु माया***
***सा मोहिनी न कतमस्य तु हन्त जन्तोः ।***
***है मर्त्यसिंहवपुष स्तव तेजसोंऽशे***
***शम्भु र्भवन्हि शरभ श्शलभो बभूव ॥ १२ ॥***

क्रीडा विधेरिति । या तु माया परिदृष्टविचित्रवस्तुस्वभाव वैषम्यवती या प्रकृतिः तव क्रीडाविधेः परिकरः उपकरणं भवति, सा कर्त्री कतमस्य जन्तोः न मोहिनी ज्ञानाधिकानां जीवाना मपि मोहिन्येवेत्यर्थः । तु शब्दोऽवधारणे "तु स्याद्भेदेऽवधारणे" इत्यमरः । हि यस्मा त्कारणात् शरभो भवन् सिंहहिंसक शरभाख्य मृगाकारः शम्भुः मर्त्यसिंहवपुषः नरसिंहविग्रहस्य तव तेजसः अंशे एकदेशे शलभो बभूव दग्धो बभूवेत्यर्थः । "हम्तु मभ्यागतं रौद्रं शरभं नरकेसरी । नखै र्विदारयामास हिरण्यकशिपुं यथा । नमोऽस्तु नरसिंहाय लक्ष्मीस्थिति जितक्रुधे । यत्क्रोधाग्नौ पुरा रौद्र श्शरभ श्शलभायितः" इत्यादिपौराणिकवचन मत्रानुसन्धेयम् । "भगवत्स्वरूप तिरोधानकरीं स्वविषयायाश्च भोग्य बुद्धे र्जननीम्",

"दैवीगुणमयी माया" "मायया मोहितं जगत्", "अनीशया शोचति मह्यमानः" इत्युक्तप्रकारेण मायामोहितत्वात् युद्धोन्मुखस्य प्रणामादि स्वीकारः उचित एवेति भावः ॥ १२ ॥

भगवतः पारतन्त्र्यमपि स्वातन्त्र्य काष्ठेत्याह -

***यस्याऽऽत्मतां त्रिपुरभङ्गविधा वधा स्त्वं***
***त्वच्छक्तितेजितशरो विजयी च योऽभूत्।***
***दक्षक्रतौ तु किल तेन विनिर्जित स्त्वं***
***युक्तो विधेयविषयेषु हि कामचारः ॥ १३ ॥***

यस्येति। त्रिपुरभङ्गविधौ यस्य रुद्रस्य आत्मतां अन्तरात्मतां त्वं अधाः अधारयः। यः त्वच्छक्तितेजितशर स्सन् आहित तैक्ष्ण्यबाण स्सन् शराग्रे त्वच्छक्त्याहिततेजास्सन् विजयी चाऽभूत्। [1]तेजृ शातने इति धातुः। "विष्णुरात्मा भगवतो भवस्यामिततेजसः। त स्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः। पुरा पराजयं प्राप्य समरे त्रिपुरासुरात्॥" दक्षक्रतौ तु तेन त्वं तु विनिर्जितः किल; अन्यथा क्रतुध्वंसा सम्भवादिति भावः। विधेयविषयेषु वश्येष्वपि कामचारः पराजयरूप स्वैरचारः युक्तो हि, स्वाधीनजनपारतन्त्र्य मतिशयावह मेवेति भावः॥ १३ ॥

***मुग्ध शिशु र्वटदले शयितोऽतितन्वा***
***तन्वाजगन्ति बिभृषे सविकास मेव।***
***ऐशी मिमान्तु तव शक्ति मतर्कितव्या -***
***मव्याजतः प्रथयसे कि मिहाऽवतीर्णः ॥ १४ ॥***

मुग्ध इति। वटदले शयितः। प्रलयार्णवे इति शेषः। मुग्धः शिशुः अतिबालः त्वं अतितन्वा अतिसूक्ष्मया तन्वा मूर्त्या जगन्ति सकल भुवनानि सविकास मेव असम्बाध मेवेत्यर्थः। बिभृषे दधासि। अत्यन्त

---

1. तिज निशाने इति धातु पाठः

बालस्य स्वविग्रहोदरान्तरे प्रलयकालिक सकल भुवनानि धृत्वा महार्णवोद्भूतातिकोमल वटदल शयनं स्वकीयपरत्वसूचक मिति भावः। अतर्कितव्याम् अचिन्तनीयाम् अपरिच्छेद्या मित्यर्थः। इमां तव शक्तिन्तु शक्ति मेव। "तु स्या द्भेदेऽवधारणे" इत्यमरः। इहावतीर्ण स्सन् अव्याजतः अहेतुकं अकृत्रिम मिति वा। किं प्रथयसे, प्रथितां ख्यातां करोषि। यशोदावश्यशैशवरूपसौलभ्येऽपि परत्वाविष्कार अत्याश्चर्यकर इति भावः ॥ १४ ॥

"स उ श्रेयान् भवति जायमानः" इत्युक्तप्रकारेण अवतार सौलभ्य मपि परत्व मित्याह -

*ब्रह्मेशमध्यगणना गणनाऽर्कपङ्क्ता -*
*विन्द्रानुजत्व मदिते स्तनयत्वयोगात्।*
*इक्ष्वाकुवंशयदुवंशजनिश्च हन्त!*
*श्लाघ्या न्यमून्यनुपमस्य परस्य धाम्नः ॥ १५ ॥*

ब्रह्मेति। अनुपमस्य, "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्युक्तस्येत्यर्थः। परस्य धाम्नः, "नारायण परो ज्योतिः" इत्युक्तस्य ब्रह्मेशमध्यगणना "मध्येविरिञ्चगिरिशं प्रथमावतारः" विधीशयो र्मध्ये तु विष्णु रिति यः प्रथमावतारः इत्युक्तावतार इत्यर्थः। अर्कपङ्क्तौ द्वादशादित्याना म्मध्ये गणना "आदित्याना महं विष्णु र्ज्योतिषां रवि रंशुमान्" इत्युक्तावस्थान मित्यर्थः। अदिते स्तनयत्वयोगात् इन्द्रानुजत्व मुपेन्द्रावतारः, इक्ष्वाकुवंशयदुवंशजनिश्च रामकृष्णावतारौ च अमूनि, सामान्ये नपुंसकं प्रयोक्तव्यमित्यनुशासनात् नपुंसकलिङ्ग प्रयोगः। श्लाघ्यानि अतिशयावहानि। हन्तेति हर्षे ॥ १५ ॥

सम्प्रति त्रिविक्रमावतार सौलभ्य मनुसन्धत्ते -

*त्वन्निर्मिता जठरगा च तव त्रिलोकी*
*किं भिक्षणा दिय मृते भवता दुरापा।*

***मध्ये कदा तु न विचक्रमिषे जगच्चे-***
***त्वद्विक्रमैः कथ मिव श्रुति रञ्चिता स्यात् ॥ १६ ॥***

त्वदिति। त्वन्निर्मिता, ''अप एव ससर्जादौ'' इत्यादि क्रमेण अण्ड सृष्टिपर्यन्तं स्वय मेव कृत्वा ततः स्वसृष्ट स्वांशभूत चतर्मुखेन सृष्टेत्यर्थः। तव जठरं कुक्षिं गच्छतीति तथोक्ता च, प्रलये इति भावः। इयं त्रिलोकी भिक्षणा दृते याचनां विना ''अन्यारादितर्ते'' इति पञ्चमी। भवता दुरापा अलभ्या किम्? लभ्यैवेत्यर्थः। तर्हि त्रिविक्रमावतारः किमर्थ इत्यत आह- मध्ये इति। कदा तु कदाचित् मध्ये सृष्टिप्रलयो रन्तराले जगत् न विचक्रमिषे चेत् विक्रान्तं कृतवान्नाऽसि यदि। क्रमु पाद वक्षेपे इत्यस्माद्धातोः आत्मनेपदलिण्मध्यमपुरुषैकवचनम्। कथमिव कथं वा श्रुतिः त्वद्विक्रमैः अञ्चिता पूजिता स्यात्? ''इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम्'' ''त्रीणि पदा विचक्रमे'', ''विचक्रमाणस्त्रेधोरुगायः'', ''उरुक्रमस्य सहिबन्धु रित्था, विष्णोः पदे परमे मघ्व उत्सः'' इत्यादिना त्रिविक्रमापदानेनैव श्रुतिः परिष्कृते ति भावः। सृष्टि प्रलय विषयक प्रमाणै स्त्रिलोक्यां त्वदीयायां सत्यामपि श्रुति स्तुति विषयापदान सम्पादनार्थं सुमनोयाचनां रचितवा निति पिण्डितार्थः ॥ १६ ॥

अनन्तरं श्रीरामावतारातिमानुषचरित्रविशेषान्सप्तदशभिः श्लोकैः सङ्गृह्य विवक्षुः प्रथमतो गृध्रराजाय मुक्ति प्रदान वैचित्र्यं वदन् परिहारस्य स्वयमूहितु मशक्यत्वात् तमेव पृच्छति -

***पृच्छामि किञ्चन यदा किल राघवत्वे***
***मायामृगस्य वशगो मनुजत्वमौग्ध्यात्।***
***सीतावियोग विवशो न च तद्गतिज्ञः***
***प्रादास्तदा परगतिं हि कथं खगाय? ॥ १७ ॥***

पृच्छामीति। किञ्चन किम प्याश्चर्यकरं चरित्रं पृच्छामि। यदा राघवत्वे मनुजत्व मौग्ध्यात्, ''आत्मानं मानुषं मन्ये रामं दशरथात्मजम्'' इत्युक्त

मनुष्यत्वप्रयुक्तमोहात्, मृगस्य मारीचस्य वशगः सीताया वियोगेन विश्लेषेण विवशः मूर्छित इत्यर्थः। तस्या स्सीताया गतिं गमनं जानातीति तद्गतिज्ञश्च न, भवसीति शेषः। तदा खगाय पक्षिणे परगतिं कथं प्रादाः प्रदत्तवानसि? मनुष्यभावनया अज्ञत्व मारोपितञ्चेत्, "मया त्वं समनुज्ञातो गच्छ लोका ननुत्तमान्" इति जटायवे परमपदप्रदानस्य परिहार स्त्वयैव वक्तव्य इति भावः॥ १७॥

उक्तमेव मुखभेदेन विवृणोति -

*अक्षुण्णयोगपथ मग्र्यहतं जठायुं*
*तिर्यञ्च मेव बत! मोक्षपथे नियोक्तुम्।*
*शक्नोषि वेत्सि च यदा स तदा कथं त्वं*
*देवी मवाप्तु मनलं व्यथितो विचिन्वन्॥ १८॥*

अक्षुण्णेति। अक्षुण्णः अनभ्यस्तः योगपथः योगमार्गो येन तम् अननुष्ठित साधन मित्यर्थः। तिर्यञ्चं साधनानुष्ठानानुगुण जन्मविहीन मित्यर्थः। अग्र्यहतं ब्राह्मणेन हतम्। "नाऽग्र्यहतस्य लोकोऽस्ति" इत्युक्तपरगति प्रतिबन्धक शरीर विश्लेषहेतु मित्यर्थः। जटायुं मोक्षपथे नियोक्तुं यदा वेत्सि शक्नोषि च ज्ञानशक्ति युक्तो भवसि तदा स त्वं देवीं विचिन्वन् मार्गमाणः अज्ञइवेत्यर्थः अवाप्तुं अनलं अशक्तश्च सन् कथं व्यथितो भवसि। बतेत्याश्चर्ये॥ १८॥

उक्तमेव शक्त्यभावभावना मनुभवति -

*साला न्हि सप्त सगिरी न्सरसातलान्या -*
*नेकेषुमन्दजवतो निरपत्रय स्त्वम्।*
*तेष्वेक विव्यथन खिन्न कपि प्रणुन्नं*
*शाखामृगं मृगयसे स्म कथं सहायम्॥ १९॥*

सालानिति। सगिरीन् सरसातलान् यान् एकस्य इषोः बाणस्य

मन्दजवतः अल्पवेगात्। अतिवेगतित्वे अण्डभित्तिभेदएव स्या दिति भावः। निरपत्रयः, निष्पत्रं कृतवान्, भिनत्सिस्मेत्यर्थः। "बिभेद च पुन स्साला न्सप्तैकेन महेषुणा। गिरी न्रसातलञ्चैव" इति संक्षेपे। "इमे च विपुला स्साला स्सप्तशाखावलम्बिनः। यत्रैकं घटते वाली निष्पत्रयितु मोजसा" इति किष्किन्धाकाण्डोक्त्यनुगुणः 'निरपत्रय' इति प्रयोगः। तेषु सालेषु एकस्य विव्यथने विदारणे खिन्नेन कपिना वालिना प्रणुन्नं निरस्तं शाखामृगं वानरं सुग्रीवं, कथं सहायं मृगयसे स्म, मार्गितवानसि। स्वापेक्षयाऽतिशयितशक्तिः किल सहायतयाऽपेक्षणीय इति भावः॥ १९।

सप्त सालादिविदारण मपि सुग्रीवविषयक सौशील्य कृत्य मित्याह-

*दास स्सखा समभवत्तव यः कपीन्द्र -*
*स्तद्विद्विषं कपि ममर्षवशा ज्जिघांसुः।*
*त्वत्स्नेह विक्लब धियं तमिमं कपीन्द्रं*
*विस्रम्भयन्सपदि सालगिरी नविध्यः॥ २०॥*

दास इति। यः कपीन्द्रः सुग्रीवः तव दास स्सखा च समभवत् सम्भूतः। तस्य विद्विषं शत्रुं कपिं वालिनं अमर्षवशात् रोषपारवश्यात् जिघांसुः हन्तु मिच्छुः त्वं त्वत्स्नेहेन भवद्विषयभक्त्या विक्लबधियं विह्वलबुद्धिं प्रेमान्धबुद्धि मित्यर्थः। तमिमं कपीन्द्रं सुग्रीवं सपदि विस्रम्भयन् सन् विश्वस्तं कुर्वन् सन् सालगिरीन् अविध्यः विद्धा नकरोः, तादृशं तव सौशील्य मितिभावः॥ १०॥

*यद्वा मृगं मुगयुवन्मृगयापथेन -*
*च्छन्नो जघन्थ नतु शत्रुव दाभिमुख्यात्।*
*तद्युक्तमेव तव राघववंशजस्य*
*तिर्यक्षु नैव हि विपक्षतयोपचारः॥ २१॥*

यद्वेति। यद्वेति। पक्षान्तरे। अथथा यत् वा इति पदद्वयम्।

वाशब्दोऽवधारणवाचकः। मृगयुवत् व्याध इव, मृगं वालिनं मृगयापथेन आखेटपरिपाट्या, छन्नो वा निगूढ एव जघन्थ हतवा नसि। हन्ते र्लिण्मध्यमपुरुषैकवचनम्। शत्रुवत् आभिमुख्यात् न जघन्थ इति यत्, तत् राघववंशजस्य तव युक्त मेव। राघवाणां तादृशपराक्रमशालि सार्वभौमत्वा दिति भावः। हि यस्मा त्कारणात् तिर्यक्षु तिर्यग्जातिषु विपक्षतया शत्रुत्वेन उपचारः सत्कारः, तुल्यबलत्व प्रतिपत्ति रिति यावत्। नैव न भवत्येव; यतो राघवाणां तिर्यक्षु न तुल्यबलत्वप्रतिपत्तिः, ततः आभिमुख्यं विनाऽपि शाखामृग हननमुचित मिति भावः॥ १२॥

अनन्तरं सेतुनिर्माण रूपातिमानुषकर्माऽनुसन्धत्ते -

*मानुष्यकं चरित माचरितुं प्रवृत्तो-*
*देवातिगं चरित मङ्ग किं मङ्ग्यकार्षीः।*
*यत्सागरे बत! बबन्धिथ नाथ सेतुं*
*शैलैः प्लवङ्गम समिङ्गित सम्प्रणुन्नैः॥ २२॥*

मानुष्यकमिति। अङ्गेति सम्बोधने। अङ्ग नाथ, हे स्वामिन्, मानुष्यकं मनुष्यसम्बन्धिचरित माचरितुं प्रवृत्त स्त्वं देवातिगं देवा न प्यतिक्रान्तं चरितं किं मङ्ग्यकार्षीः अङ्गीकृतवा नसि? यत् यस्मा त्कारणात् प्लवङ्गमै र्वानरैः समिङ्गितै राहूतैः, सम्प्रणुन्नैः प्रक्षिप्तैश्च शैलै : सागरे सेतुं बबन्धिथ बद्धवानसि। लिण्मध्यमपुरुषैक वचनम्। बते त्याश्चर्ये। मनुष्य भावनोद्युक्तस्य भवतः देवै रप्यशक्यः सेतुबन्धः अत्याश्चर्यकर इति भावः॥ २२॥

*यो विक्रमेण मनुजत्व विभूषणेन*
*देवं वरं वरुणराज मज व्यजेष्ठाः।*
*कृत्वोपदां दशरथं विधिरुद्रमुख्यै*
*र्देवैः स्तुतश्च स किलेन्द्र जिता जितोऽसि॥ २३॥*

य इति। हे अज, यस्त्वं मनुजत्व मेव विभूषणं यस्य तेन विक्रमेण विक्रमस्य मनुजत्वविभूषणत्वं नाम - "समुद्रं राघवो राजा शरणं गन्तु

मर्हति'' इत्युक्तप्रकारेण समुद्र मुद्दिश्य शरणागतिपूर्वकत्वम् । वरं देवं देवश्रेष्ठं वरुणराजं वरुण एव राजेति कर्मधारयः । व्यजेष्ठाः विजितवानसि । विपूर्वा ज्जयतेः ''विपराभ्यां जेः'' इत्यात्मनेपदि लुङ्मध्यमपुरुषैकवचनम् । दशरथ मुपदाम् उपहारं कृत्वा पुरस्कृत्येर्थः । दशरथ प्रदानस्य रामप्रसादार्थत्वा दुपदात्वोक्तिः । देवैः स्तुतश्च सीता लक्ष्मी र्भवा न्विष्णुः'' इत्यादिनेति भावः । स किल स एव त्वं इन्द्रजिता जितोऽसि । समुद्राधिदैवत वरुणराज विजेतुः ब्रह्मरुद्रादिभि र्दशरथ प्रदान पूर्वकं परत्वेन स्तुतस्य भवतः इन्द्रजिता पराजयो मनुष्यभावनानुगुण इति भावः ॥ २३ ॥

मनुष्यभावनाया मपि परत्वाविष्कारं पदान्तरेणाऽऽह -

***अब्धिं न तेरिथ न जिग्यिथ राक्षसेन्द्रं***
***नैवाऽस्य जज्ञिथ यदा च बलाबलं त्वम्***
***निस्संशय स्सपदि तस्य पदेऽभ्यषिञ्च -***
***स्तस्यानुजं कथमिदं हि, विभीषण ञ्च ॥ २४ ॥***

अब्धि मिति । यदा अब्धिं न तेरिथ न तरितवानसि, राक्षसेन्द्रं रावणं न जिग्यिथ न जितवानसि, अस्य रावणस्य बलाबलञ्च न जज्ञिथ न ज्ञातवानसि । तदेत्यघ्याहार्यम् । निस्संशय स्सन् तस्य रावणस्य अनुजं विभीषणञ्च तस्य पदेस्थाने सपदि सहसा अभ्यषिञ्चः अभिषिक्तवा नसि । हीति प्रसिद्धौ । इदं कथम् ? सागरतरण राक्षसेन्द्रबलाबल परीक्षण तज्जयानां पूर्वमेव विभीषणस्य राक्षसेन्द्रत्वेन पट्टाभिषेकः स्वकीयसत्य सङ्कल्पत्वाविष्कारं विना कथं घटत इति भावः ॥ २४ ॥

समुद्र मुद्दिश्य संहितेन सायकेन अत्यन्तदूरतदन्तरीपनिवासिदस्यु निरास रूपाति मानुषशीलविशेष मनुभवन्नाह -

***त्वं दक्षिणस्य निवसन्नुदधे स्तटेऽपि***
***दूरान्तरोत्तरपयोधिमहान्तरीपे ।***
***दैत्या न्निजैकशर पारणयन् किमेतां***
***लङ्कां स्थितोऽत्र कुरुषे किल न स्म भस्म ॥ २५ ॥***

त्वमिति। दक्षिणस्य उदधे स्तटे निवसन्नपि दूर मन्तर मवकाशो यस्य तस्य उत्तरपयोधे र्महान्तरीपे अतिविशाले द्वीपे दैत्यान् निजस्य एक शरस्य पारणयन् पारणां कुर्वन् लक्ष्यं कुर्व न्नित्यर्थः। त्वं अत्र स्थितस्सन् दक्षिणोदधितटे निवसन् लङ्कां भस्म न कुरुषे किल, किं न कृतवा नसि। अतिदूरोत्तर सागर द्वीपस्थानेक बलवत्तरदैत्यान् एकेन सायकेन संहृतवत स्तव सन्निहितलङ्कानिलय राक्षस संहारोऽत्र स्थित्वैव शक्य इति भावः॥ २५॥

समुद्रमथनकालीनाश्चर्या ण्यपि प्रसङ्गा दाह -

*एकैत्कथं कथय यन्मथित स्त्वयाऽसौ*
*हित्वा स्वभाव नियमं प्रथितं त्रिलोक्याम्।*
*अश्वाप्सरोविष सुधा विधु पारिजात -*
*लक्ष्म्यात्मना परिणतो जलधि र्बभूव॥ २६॥*

एतदिति। त्वया मथितः असौ जलधिः त्रिलोक्यां प्रथितं प्रसिद्धं स्वभावनियमं, इद मेतदाकारेण परिणमतीति स्वभावनियतिं हित्वा त्यक्त्वा अश्वः उच्चैःश्रवाः विषं हालाहलम्, अमृतचन्द्रकल्पकलक्ष्मी स्वरूपेणेत्यर्थः। परिणतोबभूव, परिपाकं प्रापेत्यर्थः, इति यत् एतत्कथं, कथय। दुष्परिहरस्याऽस्य परिहार स्त्वयैव व्याहर्तव्य इत्यर्थः। त्वया मथितस्य सागर सलिलस्य अश्वाद्यात्मना परिणामो जगत्त्रयनियत तत्तद्वस्तुस्वभाव विसदृशः त्वदीयाघटितघटनाशक्ति घटित इति भावः॥ २६॥

अनवधिकापराध विधायि विरोधिष्वपि निर्निरोध स्सञ्चारां करुणा मनुभवन्नाह -

*यत्तादृशागस मरिं रघुवीर वीक्ष्य*
*विश्रम्यता मिति मुमोचिथ मुग्ध माजौ।*
*कोऽयं गुणः कतरकोटिगतः कियान्वा*
*कस्य स्तुतेः पद महो वद कस्य भूमिः॥ २७॥*

यदिति। हे रघुवीर, तादृशागासं इयत्तानवच्छिन्नापराधमित्यर्थः आजौ युद्धे मुग्धं मेहं प्राप्तम्, अरिं शत्रुभूतं रावणं वीक्ष्य विश्रम्यतामिति मुमोचिथ मुक्तवानसि - "गच्छाऽनुजानामि रणार्दित स्त्वं प्रविश्य-रात्रिञ्चरराज, लङ्काम् आश्वास्य निर्याहिं इत्युक्तप्रकारेणेति भावः। इति यत् अयं गुणः कः ? अस्य गुणस्य नाम किमित्यर्थः। कतरकोटिगतः, आश्रयणसौकर्यापादकत्वं, आश्रितकार्यापादकत्व मिति गुणानां कोटिद्वय मस्ति। तत्र सौशील्य सौलभ्यादयः आश्रयणसौकर्यापादकाः, ज्ञानशक्त्यादयः आश्रित कार्यापादकाः।अस्य गुणस्य कुत्र कोटौ निवेश इति भावः। कियान्वा कि यत्परिमाणो वा? कस्य स्तुतेः पदम्? अवाङ्गनसगोचरवैभव इत्यर्थः। कस्य भूमिः? केन वा साक्षात्कर्तव्यः ? वद। दयायाः परदुःखासहिष्णुत्वरूपत्वेऽपि ईदृशमहापराधिषु तस्याः प्रवृत्त्यसम्भवात्। अस्य गुणस्य स्वरूप स्वभाव परिमाणनिर्णयः, स्तुति साक्षात्कारौ च न सम्भवन्तीति भावः॥ २७॥

एवं रावणप्रमापणनिपुण निज भुज बलस्य रामचन्द्रस्य इन्द्रजिदस्त्र बन्धनमूर्छा कथं सङ्गच्छते-इत्याशङ्काया माह -

*यल्लक्ष्मण स्त्वदनुजो रिपुशक्तिमुग्ध -*
*श्शत्रो र्गुरु र्हनुमतश्च लघु र्बभूव।*
*ऐतन वै सुविदितोऽभव दिन्द्रशत्रो -*
*र्मायास्त्रबन्धन निबन्धनजो विमोहः॥ २८॥*

यदिति। रिपोः शक्त्या आयुधविशेषण मुग्धः मूर्छितः त्वदनुजोलक्ष्मणः शत्रो र्गुरुर्बभूव। हनुमतस्तु लघुर्बभूव, पुष्पमालिकावदुद्धरणार्हो बभूवेत्यर्थः। "हिमवान्मन्दरो मेरु स्त्रैलोक्यं वा सहाऽमरैः। शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः। शत्रूणा मप्रकम्प्योऽपि लघुत्व मगमत्कपेः" इति युद्धकाण्डे। इति यत्, ऐतेन कर्मणा इन्द्रशत्रोः इन्द्रजितः मायास्त्रबन्धन मेव निबन्धनं हेतुः, तज्जो

*विमोहः मूर्छा सुविदितः सुतरां ज्ञातोऽभवत् । वै प्रसिद्धौ ।* रिपुशक्तिमुग्धत्वेऽपि लक्ष्मणस्य रक्षःपतिनोद्धर्तुमशक्यत्वात् इन्द्रजिदस्त्रबन्धनं मनुष्यभावना - इति विदित मिति भावः ॥ २८ ॥

इदानीं चराचरमुक्ति प्रदान वैचित्र्य मनुभवन् तदानीं स्वस्य निःश्रेयसलाभाभावेन विषीदति।

***हा हन्त हन्त ! श्चरणारविन्द***
***द्वन्द्वं कदा नु भविता विषयो ममाऽक्ष्णोः ।***
***योऽहं निरर्गल विनिर्गलदन्धकारै -***
***र्वृक्षै स्तृणैश्च सुलभं समयं व्यतीतः ॥ २९ ॥***

हा हन्तेति। योऽहं निरर्गलं निष्प्रतिद्वन्द्वं, निष्प्रतिबन्धं यथा तथा विशेषेण निर्गलन् निर्गच्छन् अन्धकारः अज्ञानं येषां तैः, वृक्षत्वादिप्रयुक्ताज्ञत्वशून्यै रित्यर्थः। वृक्षैः तृणैश्च सुलभं सुखेन लब्धुं योग्यं समयं कालं व्यतीतः अतिरिक्तोऽस्मि अतिक्रान्तोऽस्मि। तदानीन्तनेषु वृक्षतृणेषु अन्यतमो न जातोऽस्मीति भावः। तस्य मम अक्ष्णोः नयनयोः भवतश्चरणारविन्दद्वन्द्वं कदानु कदा वा विषयो भविता लक्ष्यं भविष्यति? न कदापीत्यर्थः। भवितेति लुट्। हा हन्त हन्तेति निपातसमुदाय श्शोकातिशयवाचकः। भूरिदानेऽप्यलब्धधनस्य परीक्षादाने का वा प्रसक्ति रिति भावः॥ २९ ॥

भक्ति प्रपत्त्यो रेव मुक्त्युपायत्वात् कथं वृक्षेभ्योऽपि मोक्षप्रदान मित्याशङ्काया माह -

***वंशं रघोरनुजिघृक्षु रिहावतीर्णो***
***दिव्यै र्ववर्षिथ तथाऽत्र भवद्गुणोघैः ।***
***त्वत्सन्निधिप्रभव शैत्यजुषो यथा हि***
***वृक्षाश्च तान्तिं मलभन्त भवद्वियोगे ॥ ३० ॥***

वंशमिति। रघोर्वंश मनुजिघृक्षुः अनुग्रहीतु मिच्छु स्सन् इहाऽवतीर्णः अवतारं कृतवां स्त्वं अत्रभूतले दिव्यैः अप्राकृतै र्भवद्गुणौघैः । भवदीय कल्याणगुणगणैः तथा ववर्षिथ वृष्टवा नसि। कथ मित्याशङ्कायामाह - त्वदिति। त्वत्सन्निधिना त्वदीय सन्निधानेन प्रभवं जातं शैत्यं जुषन्ते सेवन्ते इति तथोक्ताः। यद्वा त्वत्सन्निधेः प्रभवः उत्पत्तिः यस्य तत् इति वा विग्रहः। वृक्षाश्च भवद्विश्लेषानभिज्ञा अपीत्यर्थः। यद्वा, सलिलमात्रधारका अपीत्यर्थः। यथा भवद्वियोगे कानन यात्रा रूप त्वदीय विश्लेषे तान्तिं म्लानिं अलभन्त लब्धवन्तः, तथेति पूर्वेणान्वयः। रामविरहकालिकया ग्लान्या परमाभक्ति स्सूचिता। अलभन्तेति क्रियाप्रयोगेण रघुवंशजानां स्वकीय कल्याण गुणवर्षैः वृक्षाणा मपि "पुनर्विश्लेषभीरुत्वं परमा भक्ति रुच्यते" इत्युक्तलक्षणां परमभक्तिं सम्पाद्य मुक्तिं प्रादा दिति साम्प्रदायिको भाव स्सूच्यते ॥ ३० ॥

"देशोऽयं सर्वकामधुक्" "ते वयं भवता रक्ष्या भवद्विषय वासिनः" इत्युक्तप्रकारेण भगवद्भागवताभिमत देशवास स्याऽपि प्रपत्त्यन्तर्भावेन साधनत्वात् स एव तृणादिमुक्तिहेतु रित्याह -

*ये धर्म माचरितु मभ्यसितु ञ्च योगं*
*बोद्धुञ्च किञ्चन न जात्वधिकार भाजः ।*
*तेऽपि त्वदाचरित भूतलबन्धगन्धा -*
*द्बन्धातिगाः परगतिं गमिता स्तृणाद्याः ॥ ३१ ॥*

य इति। तृणाद्याः ये जीवाः धर्म माचरितुं कर्मयोग मनुष्ठातुं, किञ्चन ईषदपि बोद्धु ञ्च ज्ञानयोग मनुष्ठातु मपि, योगं ध्यानम् अभ्यसितुञ्च भक्तियोग मनुष्ठातुमपि, जातुकदाचिदपि अधिकारभाजो न भवन्ति, तेऽपि त्वादाचरितेन भवता कृतपदविन्यासेन भूतलेन बन्धस्सम्बन्ध एव, गन्ध स्सौरभं, पुण्य मिति यावत्। तस्माद्धेतोः बन्धातिगाः, अतिक्रान्त-कर्मबन्धा स्सन्तः परगतिं उत्कृष्टां गतिं, मोक्षं गमिताः प्रापिताः त्वयेति

शेषः । देशवासं व्याजीकृत्य तृणादिभ्यो मुक्तिं दत्तवा नसीत्यर्थः । तृणादीनाम् ''उभयपरिकर्मितस्वान्तस्य ऐकान्तिकात्यन्तिक परभक्तियोगलभ्यः'' इति भगवल्लाभसाधनतयोक्त सपरिकर भक्तियोगाभाव मुक्त्वा देशवासे नैव परगति प्राप्त्युक्तेः देशवासस्य प्रपत्ति मुखभेदत्वं सिद्धमिति सम्प्रदायः ॥ ३१ ॥

किं बहुना । परमपदनाथा दपि काकुत्स्थे एव कल्याणगुणाधिक्य मिति सोपपत्तिक माह -

*तादृग्गुणो ननु बभूविथ राघव, त्वं*
*य स्तावकं चरित मन्वह मन्वभुङ्क्त ।*
*सोऽत्रैव हन्त ! हनुमान्परमां विमुक्तिं*
*बुद्ध्याऽवधूय चरितं तव सेवतेऽसौ ॥ ३२ ॥*

तादृगिति । हे राघव, यो हनुमान् तावकं त्वदीयं चरितं, चरितमिति स्वरूपरूपादीना मुपलक्षणम् । अन्वहं निरन्तरं अन्वभुङ्क्त अनुभूतवान् । ''भुजोऽनवने'' इत्यात्मनेपदम् । सोऽसौ हनुमान् परमा मुत्कृष्टां विमुक्तिं परिपूर्णब्रह्मानुभवपर्यन्ता मित्यर्थः । अवधूय अनपेक्ष्येत्यर्थः । अत्रैव लीलाविभूत्या मेव तव चरितं बुद्ध्या सेवते मनसाऽनुभवतीत्यर्थः । त्वं तादृग्गुणः परमपदनाथादपि अधिककल्याणगुणः बभूविथ अभूः (भूसत्ताया मितिधातोः) लिट् । नन्विति प्रसिद्धौ । हन्तेति हर्षे । परमपदनाथे गुणानां सद्भावमात्रं विषयलाभनिबन्धन विनियोगोऽत्रैवेति आधिक्यं द्रष्टव्यम् । ''बहवो दुर्लभा श्चैव ये त्वया कीर्तिता गुणाः । मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तःश्रूयतां नरः'' इति मानुषत्वे परत्व मुक्तम् । ''स्नेहो मे परमो राजं स्त्वयिनित्यं प्रतिष्ठितः । भक्तिश्च नियता वीर, भावो नाऽन्यत्र गच्छति'' इति हनुमदुक्तिः । अत्र ''स्नेहः परम'' इत्यनेन परभक्तिः, 'नित्यं प्रतिष्ठितः' इत्यनेन तदनुवृत्तिरूपं परज्ञानम्, नियता भक्तिरित्येनन परभक्तिश्चोक्तेति रहस्यम् । नाऽन्यत्र गच्छति परमपदनाथेऽपि न गच्छतीत्यर्थः ॥ ३२ ॥

"धातूना मिव शैलेन्द्रो गुणाना माकरो महान्" इत्युक्त प्रकारेण काकुत्स्थस्य सकल कल्याणगुणाकरत्वेऽपि "वधार्ह मपि काकुत्स्थः कृपया पर्यपालयत्" इत्युक्ता कृपैव महापराधिनां शरण मित्युपसंहरति।

*यत्त्वं कृतागस मपि प्रणति प्रसक्तं*
*तं वायसं परमया दयया क्षमिष्ठाः।*
*तेनैव मादृशजनस्य महागसोऽपि*
*युक्तं समाश्वसन मित्युपधारयामि॥ ३३॥*

यदिति। कृतागस मपि विहितापराधमपि प्रणतौ प्रणामे प्रसक्तं उद्युक्तं "स तं निपतितं भूमौ" इत्युक्तत्वात् प्रणामोद्योग एव कृत इति भावः। "त्रीन्लोका न्सम्परिक्रम्य तमेव शरणं गतः" इत्यस्यापि लोकत्रयं सम्यक्परिक्रम्य तमेव रामाश्रमं प्राप्येत्यर्थ इति भावः। तं बलवदपराध-भूयस्तया पित्रादिभि रपि परित्यक्त मित्यर्थः। वायसं परमया निरवधिकया दयया अक्षमिष्टाः क्षमाविषयं कृतवानसि - इति यत् तेनैव हेतुना महागसोऽपि मादृशजनस्य समाश्वसनं रक्षिष्यतीति विश्वसनं युक्त मित्युपधारयामि निश्चिनोमि। अन्तःपुरापराधविधायिनि वायसेऽपि निर्निरोधां कृपा प्रवृत्ति मनुसन्धाय महापराधिना मपि महाविश्वासो भवतीति भावः॥ ३३॥

अथ पञ्चविंशत्या श्लोकैः श्रीकृष्णावतारातिमानुषचरित्र वैचित्र्यमनुबुभूषुः प्रथमतः परिस्पन्दनानर्हातिबाल्यलीलया प्रबलपूतना शकट यमलाऽर्जुनादीन् निर्जितवत स्तव कथं कंसभयान्नन्दव्रजगमन मित्याह -

*सा पूतना शकट मर्जुनयोश्च युग्मं*
*बाल्योचितेऽन्यपरचेष्टितविस्फुलिङ्गैः।*
*यस्याऽलभन्त शलभत्व महो निगूढ-*
*स्स त्वं व्रजे ववृधिषे किल कंसभीत्या॥ ३४॥*

सेति। यस्य तव बाल्योचिते अन्यपरे लीलानुगुणे न तु हिंसानुगुणे इत्यर्थः। चेष्टितविस्फुलिङ्गे व्यापार रूपाग्निकणे सा शिशुनिधने प्रसिद्धा पूतना, शकटं असुराविष्टञ्च, अर्जुनयो र्युग्मं यमलार्जुनौ च शलभत्वमलभन्त दग्धा अभिवन्नित्यर्थः। विस्फुलिङ्गसादृश्येन चेष्टितस्य अल्पत्वं द्योत्यते। स त्वं कंसभीत्या, निगूढ स्तिरोहित स्सन् व्रजे ववृधिषे वृद्धिं प्राप्तोऽसि किल। अहो पूतनादि निरसनवत् कंसनिरसनेऽपि बाल्यलील यैव कर्तुं शक्ये तद्भयेनाऽन्यत्र तिरोधान माश्चर्यकर मिति भावः ॥ ३४ ॥

श्रियःपते र्नित्यसूरिसेव्यस्य विभूतिद्वयनायकस्य योगिजन परि मृग्यमाणस्य तव कथं नवनीतचौर्यं सङ्गच्छत इत्याह -

***पश्यत्सु सूरिषु सदा परमं पदन्ते***
***देव्या श्रिया सह वसन्परया विभूत्या***
***योगेन योगनिरतैः परिमृग्यमाणः***
***किं त्वं व्रजेषु नवनीत महो व्यमुष्णाः ॥ ३५ ॥***

पश्यत्स्विति। ते परमंपदं सूरिषु सदा पश्यत्सु सत्सु "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इत्युक्त प्रकारेणेति भावः। परया विभूत्या उभयविभूति निर्वाहरूपया सम्पदा उपलक्षितः, श्रिया देव्या सह वसन् शेषपर्यङ्क इति शेषः। योगे निरतैः निरन्तराभ्यस्तयोगै रित्यर्थः। योगेन ध्यानेन परिमृग्यमाणः, न तु साक्षात्कृत इत्यर्थः। त्वं व्रजेषु नवनीतं किं व्यमुष्णाः? किमित्यचूचुरः। 'अहो सूरिसेव्यत्वं योगिध्येयत्व ञ्च व्रजजन साक्षात्कार्यत्वेन विरुद्धम्। उभयविभूतिनायकत्वश्रियःपतित्वे नवनीत चौर्येण विरुद्धे इति भावः ॥ ३५ ॥

"दाम्ना चैवोदरे बद्ध्वा प्रत्यबध्ना दुलूखले। यदि शक्नोषि गच्छत्व मतिचञ्चलचेष्टित" इत्युक्तं नवनीतचौर्य निबन्धनबन्धन मनुभवन्नाह -

*यं दुर्ग्रहं सुमनसो मनसाऽपि नित्यं*
*बन्धच्छिदं परममीश मुदाहरन्ति।*
*दाम्ना निबद्धइति शुश्रुम तं भवन्तं*
*नाऽलं बभूविथ बत! श्लथनाय तस्य॥ ३६॥*

यमिति। यं भवन्तं सुमनसः 'उभयपरिकर्मित स्वान्तस्य' इत्युक्त कर्मज्ञान परिष्कृतान्तःकरणस्य मनसाऽपि दुर्ग्रहं परिच्छिद्य ज्ञातुमशक्यं, बन्धच्छिदं 'यस्याऽमतं तस्य मतं, मतं यस्य न वेद सः' इति श्रुत्युक्त प्रकारेणापरिच्छिन्न स्वरूपादिमत्त्वेन उपासकानां संसार सम्बन्धनिवर्तकं परम मीशम्, "तमीश्वराणां परमं महेश्वरम्" इत्युक्तप्रकारेण ईश्वरत्वाभि-मानिना मपि ईश्वर मुदाहरन्ति। तं भवन्तं दाम्ना निबद्ध इति शुश्रुम, श्रुतवन्तःस्म। (श्रुश्रवणे इति धातोः) लिट्। तस्य बन्धनस्य श्लथनाय अलं न बभूविथ, समर्थो नाऽभवः। बतेति विस्मये। 'विस्मयामन्त्रणे बत" इत्यमरः। योगिमनोदुर्ग्रहस्य संसारबन्धमोचक स्य दामबन्धन-मोचनासामर्थ्य श्चाऽऽश्चर्यकर मिति भावः॥ ३६॥

"सा पूतना शकटम्" इत्यादिश्लोक त्रयोक्त मर्थ मेव "ऐशं हि शैशवम्" इत्यादिना श्लोकपञ्चकेन विवृणोति -

*ऐशं हि शैशव मपि व्यतिवेलखेलं*
*यत्पूतना शकट मर्जुनयोश्च युग्मम्।*
*बाल्योचितान्यपर साचिविचेष्टितेन*
*हन्ताऽलभन्त शलभायित मोजस स्ते॥ ३७॥*

ऐश मिति। ऐशं ईशसम्बन्धि शैशव मपि बाल्य मपि, विशेषेण अतिक्रान्ता वेला यया सा व्यतिवेला खेला यस्मिन् तत्तथोक्तम्। अपरिच्छेद्यलील मित्यर्थः। भवतीति शेषः। यत् यस्मात्कारणात् पूतना शकटमर्जुनयो र्युग्म ञ्च ते तव बाल्योचितान्यपरेण बाल्यानु कूल लीलापरेण न तु प्रतिकूल निरसनपरेण, साचिना तिरश्चा यादृच्छिकेन वा न तु विमृश्य प्रयुक्तेन विचेष्टितेन व्यापारेण, बाल्योचितान्यपरसाचि विचेष्टितेन ते

ओजसः भवदीय तेजसः शलभायितं, शलभव दाचरितं, शलभ्भतामित्यर्थः। अलभन्त प्रापुः। हन्तेति हर्षे ॥ ३७ ॥

*सत्येव गव्यनिवहे निजधाम्नि भूम्ना*
*पर्यन्त सद्मसु किमर्थ मचूचुर स्त्वम्।*
*मुष्णं श्च किं व्यजघटो घटशेष मग्रे*
*गोपीजनस्य परिहासपदं कि मासीः? ॥ ३८ ॥*

सत्येवेति। निजधाम्नि स्वगृहे भूम्ना बहुशः गव्यनिवहे गोसम्बन्धि नवनीतादि द्रव्यराशौ सत्येव विद्यमान एव " सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्" इत्यमरः। पर्यन्तसद्मसु आसन्नगृहेषु किमर्थं कस्मै प्रयोजनाय अचूचुरः अमुष्णाः, अपहृतवा नसि। मुष्णंश्च अपहरंश्च घटशेषं घटे विद्यामान मवशिष्टं किं व्यजघटः किं विघटितवा नसि। किं गोपीजनस्य परिहासपदं परिहासास्पदं आसीः अभवः कृत्स्नस्याऽपि लीलैव प्रयोजन मित्यर्थः ॥ ३८ ॥

*यन्नाम नाथ नवनीत मचूचुर स्त्वं*
*तच्छादनाय यदि ते मति रावि रासीत्।*
*किं मुग्ध, दिग्ध ममुना करपल्लवं ते*
*गात्रे प्रमुज्य निरगाः किल निर्विशङ्कः ॥ ३९ ॥*

यदिति। हे नाथ स्वामिन्, त्वं नवनीत मचूचुरः अपहृतवान्। नाम प्रसिद्धौ। इति यत् तच्छादनाय चौर्यगोपनाय ते तव मति रावि रासी द्यदि बुद्धिः प्रादुर्भूता चेत्, हे मुग्ध, गोपनप्रकारानभिज्ञ, अमुना नवनीतेन दिग्धं लिप्तं करपल्लवं ते गात्रे प्रमृज्य मार्जयित्वा निर्विशङ्कस्सन् निरगाः निर्गतवान् किल। इदं नवनीत चौर्य च्छादनानुगुणं वा स्वाङ्गे नवनीतदिग्धकर पल्लव प्रमार्जन मिति भावः। निर् पूर्वात् इण् गतौ इति धातोः "इणो गा लुङि" इति गादेशेकृते निरगा इति लुङ्ध्यमैक वचने रूपम् ॥ ३९ ॥

*त्वा मन्यगोप गृहगव्यमुषं यशोदा*
*गुर्वी त्वदीय मवमान ममृष्यमाणा।*

*प्रेम्णाऽथ दामपरिणामजुषा बबन्ध*
*तादृङ्नते चरित मार्यजना स्सहन्ते ॥ ४० ॥*

त्वामिति । गुर्वी अतिशयाभिमानवती यशोदा त्वदीय मवमानं "यशोदानन्दनेन अस्मद्गृहे क्षीर मपहृतम्, अस्मद्गृहे नवनीत मपहृतम्" इत्येवं रूपं परिवादं अमृष्यमाणा असहमाना सती अन्यगोपगृहगव्य मुषं इतरगोपालभवनभवक्षीरनवनीताद्यपहारिणं त्वाम्, अथ अनन्तरं दामपरिणामजुषा दामात्मना प्राप्त परिणामेन प्रेम्णा बबन्ध बद्धवती, दाम बन्धनस्य प्रेमनिबन्धन कार्यत्वात् दामपरिणामजुषा प्रेम्णेत्युक्तिः । आर्यजनाः शुकपराशरादयः भट्टनाथ पराङ्कुशपरकालादयश्च, ते तादृक्चरितं यशोदा प्रेम परिणाम दामबद्धत्वरूपं अद्भुतं व्यापारं न सहन्ते । "दाम्ना चैवोदरे बद्ध्वा प्रत्यबध्ना दुलूखले । यदि शक्नोषि गच्छत्व मतिचञ्चलचेष्टित" इत्यत्र "यदि शक्नोषि गच्छ त्वम्" इति सर्वशक्तिं प्रत्युक्ति रसहन सूचिके ति भावः ॥ ४० ॥

"तादृङ्नते चरित मार्यजना स्सहन्ते" इत्युक्त मेव विवृणोति -

*मात्रा यदि त्वमसि दामनि सन्निबद्ध -*
*स्तच्छ्राविणा मुदित चाक्षुष निर्झराणाम् ।*
*बध्नासि हन्त हृदयं भगवन्कुत स्तत्*
*सर्वो हि वश्यविषये विवृणोति वीर्यम् ॥ ४१ ॥*

मात्रेति । हे भगवन् त्वं मात्रा दामनि सन्निबद्धोऽसि यदि तच्छ्राविणां तद्बन्धनं शृण्वताम् अत एव उदितचाक्षुषनिर्झराणां प्रदुर्भूताश्रुप्रवाहाणाम्, आर्यजनाना मिति पूर्वश्लोकात्, विभक्तिव्यत्यासे नाऽनुषङ्गः हृदयं कुतो हेतोः बध्नासि, तादृश सौशील्यैकासक्तचित्तान् करोषीत्यर्थः । हन्तेत्याश्चर्ये । अर्थान्तरन्यासेन समाधत्ते - सर्वो हीति । सर्वो जनः वश्यविषये वीर्यं विवृणोति हि । मातु र्भवान् वश्यः भवत स्त्वार्यजना वश्या इति भावः ॥ ४१ ॥

*कान्तालकान्त ममलं कमलायताक्ष*
*मुद्भ्रूविलास मुदितस्मित मुन्नसञ्च।*
*वक्त्रं वहन्परम, गोपगृहेषु किं त्वं*
*गोपीमनांसि नवनीत मुताऽभ्यमोषीः ॥ ४२ ॥*

कान्तेति। हे परम, परो मा यस्मा दिति परमः सर्वेश्वर इत्यर्थः। कान्तालकान्तं मञ्जुलचूर्णकुन्तलपर्यन्तम्, अमलं हेयप्रतिभटशोभं कमलायताक्षं कर्णान्तविश्रान्तकमलतुलितलोचन मित्यर्थः। उद्भ्रूविलासम् उत्तुङ्ग भ्रूभङ्ग सौभाग्यम् उंदितस्मितम्, उन्नस मुन्नतनासिकम्। "उपसर्गा" च्चेति नासिकाशब्दस्य नसादेशः। वक्त्रं वहन् त्वं गोपीमनांसि अभ्यमोषीः अचूचुरः, उत नवनीतं अभ्यमोषीः। उभयमप्यपहृतवा नसीत्यर्थः नवनीत हरो मनोहरश्चाऽभव इति भावः ॥ ४२ ॥

*सर्वं गुणाय गुणिना मिति सत्य मेतत्*
*यत्खल्विहेतरजने मलिनत्वहेतुः।*
*यद्गोपवेषविनिषेवणमुत्तमं ते*
*गोपालन ञ्च गणयन्ति गुणं गुणेषु ॥ ४३ ॥*

सर्वमिति। यत्कृत्यं इतरजने गुणहीनजने मलिनत्वहेतुः दोष निदानं भवति, तत्सर्वं मकृत्यत्वावच्छिन्नं कृत्स्न मपि गुणिनां गुणवतां गुणाय गुणावहं भवति। खल्विति प्रसिद्धौ। यत् यस्मात्कारणात् ते गोपवेष विनिषेवणं गोपाल विग्रहपरिग्रहं, गोपालन ञ्च गोरक्षणञ्च गुणेषु उत्तमं गुणं गणयन्ति परिगणयन्ति, मुख्यं गुणं व्यवहरन्तीत्यर्थः। सन्त इति शेषः। सर्वस्मात्परस्य तव अत्यन्त सौलभ्यम प्यतिशयावह मिति भावः ॥ ४३ ॥

**गोपालपोतकतया निभृतं धरित्री -**
**मावस्तु काम इव सन्नपि बाल्यलौल्यात्।**

**ऐन्द्रं निहत्य मख मद्रि मयो दधानः**
**किं तस्थिषे सुरगणाय स वासवाय ।। ४४ ।।**

गोपाल इति । निभृतं निगूढं यथा तथा गोपालपोतकतया नन्दगोपकुमारतयां धरित्री मावस्तुकाम इव सन्नपि पृथिव्या मावस्तु मिवेच्छु र्भवन्नपि इवशब्दप्रयोगेण निभृत मावासः भावनेति भावः । "उपान्वध्याङ्वसः" इति सप्तम्यर्थे द्वितीया । बाल्यलौल्यात् बाल्योचितचाञ्चल्यात्, अथो अनन्तरम् ऐन्द्रं इन्द्रदेवताकं मखं निहत्य यज्ञं विनिहतं विघ्नितं कृत्वा मह मिति पाठेऽपि मह मुत्सव माराधन मित्यर्थः । अद्रिं गोवर्धनमहीध्रम् दधानः बिभ्राण स्सन् सवासवाय सुरगणाय देवबृन्दाय किं तस्थिषे किमर्थं प्रत्यवतिष्ठसे ! "श्लाघह्नुङ् स्था शपां ज्ञीप्स्यमानः" इति सम्प्रदाने चतुर्थी । स्वाराधनविघ्न हेतु कोपोद्रिक्त सुत्राम प्रयुक्तपुष्कलावर्तकादि सप्त कालमेघयुक्तं महावर्ष मपि सप्तरात्रं गोवर्धन मुद्धृत्य व्यर्थं कृत्वा इति निष्कृष्टार्थः । गोपशिशुभाव मनुभवितु मनाः भवान् कथ मित्थ मनुष्ठितवानिति भावः ।। ४४ ।।

***वेणुक्वणप्रणयिनि त्वयि लोकनाथ***
***बृन्दावनं चरण सञ्चरणैः पुनाने***
***भावा स्तदा वनभुवः किल कीदृश स्ते***
***त्वद्गीतसिक्त सिकतासु वसुन्धरासु ।। ४५ ।।***

वेण्विति । हे लोकनाथ, वेणुक्वण प्रणयिनि मुरलीगीति प्रीतिमतित्वयि बृन्दावनं चरणसञ्चरणैः पादसञ्चारैः पुनाने पूत मातन्वाने सति तदा वसुन्धरासु त्वद्गीतसिक्तसिकतासु सतीषु । सिक्तेत्युक्ते गीते रमृत धारा साम्यं गर्भितं, वेणुगीतिरूपामृतधारया बृन्दावनप्रान्त कालिन्दी सिकता श्शीतीकृता इत्यर्थः । वसुन्धरा स्विति बहुवचनं यमुनातीर्थ भेदाभिप्रायात् । तदा वनभुवः बृन्दावनजाः ते तादृश सौभाग्यवन्तः

भावाःजन्तवः, "भाव स्सत्ता स्वभावभिप्रायचेष्टात्मजन्तुषु" इत्यमरः। कीदृशः किल कीदृग्भूताः खलु! वेणुगानानुभवेन नियतस्वभावं परित्यज्य, "शैलोऽग्निश्च जलाम्ब भूव मुनयो मूढाम्बभूवुर्जडाः प्राज्ञामासु रगा स्सगोप ममृतामासु र्महाशीविषाः। गोव्याघ्रा स्सहजाम्बभूवुरपरेत्वन्याम्बभूवुः प्रभो, त्वन्तेष्वन्यतमाम्बभूविथ भवद्वेणु क्वणोन्मादने" इत्येवं प्रकारेण स्वभावान्तर मवापु रित्यर्थः ॥ ४५ ॥

उक्त मेव विवृणोति -

*धन्यैःश्रुतं तदिह तावक रास काले*
*गीतेन येन हि शिला स्सलिला म्बभूवुः।*
*पञ्चापि किञ्च परिवृत्त गुणानि भूता-*
*न्युर्वीकृशानु मरुदम्बर शम्बराणि ॥ ४६ ॥*

धन्यै रिति। इह जगति तावक रासकाले त्वदीयरासक्रीडासमये येन गीतेन वेणुगानेन शिलाः हृषदः सलिलाम्बभूवुः जलान्यासन्। क्लीबान्तस्य सलिल शब्दस्य "सनाद्यन्ता धातवः" इति धातुसंज्ञायां लिटिकास् प्रत्यया दिति आमि, "कृञ्चाऽनुप्रयुज्यते" इत्यनुप्रयोगे रूपम्। किञ्च उर्वीकृशानु मरुदम्बरशम्बराणि, कृशानु रग्निः, सूर्यस्याप्युपलक्षणम्। अम्बरमाकाशः शम्बरं जलम् - एतानि पञ्चभूतान्यापि परिवृत्तगुणानि व्यत्यस्तस्वभावान्यासन्। तद्गीतं धन्यैः भाग्याधिकैः श्रुतम्। पृथिव्या गुणव्यत्यासो मार्दवं तेजस श्शैत्यम्, अम्बुनो वेगपरित्यागः, अन्तरिक्षस्य प्रत्यक्षमूर्तित्वम् इति द्रष्टव्यम् ॥ ४६ ॥

उक्तं व्यत्यस्त गुणत्वं भुजङ्गमेष्वपि सङ्गमयति -

*तेभ्यःकृती न किल कश्चि दिहाऽस्ति ये वै*
*रासोत्सवोत्सुकधिय स्तव काननान्ते।*

*वेणुस्वनस्नुत रसौघपरिप्लुतान्ते*
*स्वे सृक्किणी रसनया लिलिहु र्भुजङ्गाः ॥ ४७ ॥*

तेभ्यइति। ये भुजङ्गाः काननान्ते बृन्दावनान्ते रासोत्सवोत्सुकधियः रासक्रीडोत्कण्ठित बुद्धयः, ते तव वेणु स्वनेन हेतुना स्नुतेन क्षरितेन रसौघेन अमृतरसप्रवाहेण परिप्लुतः सिक्तः अन्तःप्रान्तो ययो स्ते तथोक्ते स्वे सृक्किणी ओष्ठप्रान्तौ रसनया जिह्वया लिलिहुः आस्वादयामासुः। तेभ्यो भुजङ्गेभ्यः इह जगति कश्चित्कृती सुकृती नास्ति किल न भवति ननु वै प्रसिद्धौ। अय मर्थः प्रसिद्ध इत्यर्थः। "प्रान्ता वोष्ठस्य सृक्किणी" इत्यमरः। वेणुगानश्रवणेन विषधरस्यान्तर्गतं विषमेव अमृततया परिणतम् - अतस्तेभ्यो भाग्याधिका भुवने न भवन्तीति भावः ॥ ४७ ॥

*अम्भोदनील मरविन्द दलायताक्षं*
*पिञ्छावतंस मुररीकृतवेणुपाणिम्।*
*त्वां गोपवेषपरिकर्मितकायकान्तिं*
*धन्या स्तदा ददृशु रुन्मथितान्यभावाः ॥ ४८ ॥*

अम्भोदेति। तदा रासक्रीडाकाले अम्भोदनीलं कालमेघश्यामं अरविन्द दलायताक्षं तामरसकुसुम पलाशसदृश कर्णान्त विश्रान्तलोचनं, पिञ्छावतंसं बर्हिबर्हशेखरं "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे" इत्यमरः। उररीकृतवेणुः अङ्गीकृतकीचकः पाणि र्यस्य तं तथोक्तं, "वेणवः कीचका स्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः। गोपवेषेण गोपालालङ्कारेण परिकर्मिता अलङ्कृता या कायकान्ति र्विग्रहशोभा यस्य तं तथोक्तं त्वां धन्याः भाग्याधिकजनाः उन्मथितान्यभावाः, अन्यविषयको भावः अन्यभावः। उन्मथित भोग्यवस्त्वन्तरविषयकाभिप्राया स्सन्तः ददृशुः साक्षात्कृतवन्तः। विषयान्तर विमुखतया भगवद्विग्रहसौन्दर्यानुभवो भाग्याधिकानामेव भवतीति भावः ॥ ४८ ॥

*गोवर्धनो गिरिवरो यमुना नदी सा*
*बृन्दावनञ्च मधुरा च पुरी पुराणी*
*अद्याऽपि हन्त सुलभाः कृतिनां जनाना -*
*मेते भवच्चरणचारजुषः प्रदेशाः ॥ ४९ ॥*

गोवर्धन इति। गिरिवरः कृष्णकरस्पर्श श्रैष्ठ्यविशिष्टः गोवर्धन-महीध्रः सा प्रसिद्धा यमुनानदी, बृन्दावनञ्च पुराणी पुरातनी, कृष्णावतारात्पूर्वमेव शत्रुघ्नधिष्ठिता मधुरा पुरीच भावच्चरणचारजुषः भवदीयपाद सञ्चारभाजः एते प्रदेशाः, कृतिनां सुकृतिनां जनानां अद्याऽपि भवदवतारकाल विप्रकर्षे सत्यपि सुलभाः साक्षात्कारार्हाः भगवत्साक्षात्कार इव भगवदधिष्ठितदेशसाक्षात्कारोऽपि सुकृतिना मेव लभत इति भावः। अस्मिन् श्लोके भगवत्सम्बन्धवतो देशस्यैव परमप्राप्यत्व मुक्तमिति मन्तव्यम् ॥ ४९ ॥

अनन्तरं "ते वयं भवता रक्ष्या भवद्विषयवासिनः" इत्युक्तप्रकारेण देशस्य भगवल्लाभप्रापकत्वं मुखान्तरेणोच्यते -

*बृन्दावने स्थिर चरात्मक कीटदूर्वा -*
*पर्यन्तजन्तुनिचये बत! ये तदानीम्।*
*नैवाऽलभामहि जनिं हतका स्त एते*
*पापाः पदं तव कदा पुन राश्रयामः ॥ ५० ॥*

बृन्दावने इति। तदानीं कृष्णसञ्चारकाले स्थिरचरात्मकः स्थावरजङ्गमस्वभावः कीटदूर्वापर्यन्तः कीटदूर्वावधिकः जन्तुनिचयो जीवसमूहो यस्मिं स्तथोक्ते बृन्दावने कीटः क्रिमिविशेषः जङ्गमनिकर्षावधिः, दूर्वातृणविशेषः स्थावरनिकर्षावधिः। तृणादीना मपि क्षयवृद्धियोगेन अन्तस्संज्ञावत्त्वात् जन्तुशब्दोक्ति स्सङ्गता। ये वयं जनिं जन्म नैवाऽलभामहि न लब्धवन्त एव भवामः। आत्मनेपदि लङ् बहुवचनम्।

हतकाः प्रणष्टाः। त एते पापाःपापिष्ठाः, कदा पुनः तव पदं आश्रयामः, न कदापीत्यर्थः। बतेति खेदे॥ ५० ॥

भगवत्सम्बन्धि सम्बन्धिषु केषुचि दपि जन्म उत्तारक मित्याह -

*हा जन्म तासु सिकतासु मया न लब्धं*
*रासे त्वया विरहिताः किल गोपकन्याः।*
*या स्तावकीनपदपङ्क्तिजुषोऽजुषन्त*
*निक्षिप्य तत्र निज मङ्ग मनङ्गतप्तम्॥ ५१ ॥*

हेति। अन्योन्यसंवलितकरानेकपात्रः अनेकतालप्रबद्धो मण्डलाकारनृत्तविशेषो रासः। रासे त्वया विरहिताः विश्लेषिताः या गोपकन्याः, तत्र विरहे अनङ्गतप्तं मन्मथदग्धं, निज मङ्गं स्वकीयमेवाऽवयवं निक्षिप्य, तावकीनपदपङ्क्तिजुषः भवदीयपद विन्यास क्रमभाजः, याः सिकताः अजुषन्त अप्रीणन्। जुषी प्रीतिसेवनयोः इति धातो र्लङ् प्रथमपुरुष बहुवचनम्। कृष्णविश्लेषकाले तत्पदमुद्राचिह्निता स्सिकता एव विरहिणीनां गोप कन्याना मालिङ्गनमङ्गलप्रदानेन अनङ्गतापापहा अभवन्निति भावः। तासु मया जन्म न लब्धं किल, मया सिकतात्वेन न जातं ननु। हा इति खेदे॥ ५१ ॥

**आचिन्वतः कुसुम मङ्घ्रिसरोरुहं ते**
**ये भेजिरे बत! वनस्पतयो लता वा।**
**अद्याऽपि तत्कुलभुवः कुलदैवतं मे**
**बृन्दावनं मम धिय ञ्च सनाथयन्ति॥ ५२ ॥**

आचिन्वत इति। ये वनस्पतयः, लता वा वृक्षा वीरुधो वा कुसुममा चिन्वतः आहरतः ते तव अङ्घ्रिसरोरुहं भेजिरे आरोहणावरोहण इति भावः। बतेति विस्मये। तत्कुलभुवः भवत्पदपङ्कजस्पर्शिवनस्पतिलताकुलजाः

वनस्पतयो लताश्च । अद्याऽपि बृन्दावनं मम धिय श्च सनाथन्ति सनाथीकुर्वन्ति, परिष्कुर्वन्तीत्यर्थः । बृन्दावनालङ्कारभूता स्तत्कुलभुव एव मम बुद्ध्या भोग्यतयाऽनुसन्धीयन्ते इत्यर्थः । पूर्वस्मिन् श्लोके परम्परया भगवत्सम्बन्ध्यचेतनत्वप्राप्तिरेव परमप्राप्ये ब्रह्मानन्दे हेतु रित्युक्तम् । अस्मिन् श्लोके परम्परासम्बन्धिनो वनस्पत्यादय स्स्वयं परमप्राप्या इत्युक्तम् । अतः परम्परासम्बन्धिनाम प्युपायोपेयत्वे भवत इति सम्प्रदायः ॥ ५२ ॥

अनन्तरं भगवच्चेष्टितस्य कृत्स्न स्याऽपि पावनत्वमनुभवति -

**य त्त्वत्प्रियं तदिहपुण्य मपुण्य मन्यत्**
**नाऽन्यत्तयो र्भवति लक्षण मत्र जातु ।**
**धूर्तायितं तव हि यत्किल रासगोष्ठ्यां**
**तत्कीर्तनं परमपावन मामनन्ति ॥ ५३ ॥**

यदिति । इह यत् त्वत्प्रियं भवत्प्रीतिकरं तत् पुण्यम्, अन्यत् त्वदप्रियं अपुण्यम् । अत्र पुण्यापुण्ययोः लक्षणं कि मित्यत्राऽऽह - नेत्यादि । अन्यत् त्वत्प्रियत्वाप्रियत्वाभ्या मन्यत् तयोः पुण्यापुण्ययोर्लक्षणं जातु न, कदाऽपि न सम्भवति । सामान्यत उक्तं विशेषेण द्रढयति । रासगोष्ठ्यां रासक्रीडागोष्ठ्यां तव यद्धूर्तायितम् - "अङ्गना मङ्गना मन्तरे माधवो माधवं माधव श्चान्तरेणाऽङ्गनाः" इत्युक्तप्रकारेण यद्धूर्तव दाचरितं, तत्कीर्तनं तद्धूर्तायितसङ्कीर्तनं परमपावन मत्यन्तपरिशुद्धिकरम् आमनन्ति हि शुकपराशरादयः स्मरन्तीत्यर्थः । त्वद्धूर्तायितस्य पापत्वे "अघवादी हरेत्पापम्" इति तत्कीर्तयितु रपि पाप मेव स्यात् । शुकपराशरादिभिस्तु भवद्धूर्तायितकीर्तनस्य पुण्यत्व मुक्तम् । अत स्त्वदाज्ञारूपश्रुति स्मृति विहित-निषिद्धेष्वपि त्वत्प्रियत्वाप्रियत्वे एव अनुगते लक्षणे इति भावः ॥ ५३ ॥

**या कंसमुख्यनृपकीटनिबर्हणोत्था**
**सा निर्जितत्रिजगत स्तव नैव कीर्तिः ।**

**गोपालनादि यदिदं भवदीय कर्मे-**
**त्यार्द्रीकरोति विदुषां हृदयं तदेतत् ॥ ५४ ॥**

येति । कंसमुख्यनृपकीटनिबर्हणोत्था कीटप्रायकंसप्रभृति नरेन्द्र प्रमापणभवा या कीर्तिः सा निर्जितत्रिजगतः त्रिजगदपहारिहिरण्य महाबलि प्रभृतीन् जितवत स्तव कीर्तिः नैव, अतिशयित प्रतीतिकरी न भव त्येवेत्यर्थः । हिरण्यादीन् जितवतः कंसादिजयो नाऽतिशयावह इति भावः । य दिदं गोपालनादि, कृत्य मिति शेषः । तदेत द्भवदीयकर्मेति उभयविभूतिनिर्वाहकभवच्चेष्टित मिति, विदुषां हृदयं आर्द्री करोति शिशिरीकरोति । कंसादिजयानुसन्धाना दपि गोपालनाद्यनुसन्धान मेव तत्त्वविदां चित्तव्यामोहकरं भवतीत्यर्थः ॥ ५४ ॥

***गोपालवेष परिकर्म परावरेशं***
***यन्नाम धाम परमं तमसः परस्तात् ।***
***तत्पिञ्छलाञ्छन सुदामकृतोपवीतं***
***गोधूलिधूसरितकुन्तल मन्तरास्ताम् ॥ ५५ ॥***

गोपालेति । परा उत्कृष्टाः अनन्तगरुडविष्वक्सेनादयः अवराःनिकृष्टाः ब्रह्मरुद्रादयः उभयेषामपि ईशं परावरेशम्, उभयविभूति निर्वाहक मिति यावत् । परम मुत्कृष्टं यत् धाम तेजः तमसः पर स्तात् तम श्शब्दवाच्यात् प्रकृतेः परस्तात्, वर्तत इति शेषः । नाम "अदित्यवर्णं तमसः परस्ता" दिति श्रुतिप्रसिद्ध मित्यर्थः । गोपालवेषः परिकर्म अलङ्कारो यस्य तत् पिञ्छलाञ्छनेन बर्हचिह्नेन शोभमानेन दाम्ना मालया कृतोपवीतम् उपवीताकारमाल मित्यर्थः । गोधूलिधूसरितकुन्तलं गोखुरोत्क्षिप्त परागपरिमिलित केशपाशं तत् धाम अन्त रास्ताम्, मम मनसि वर्तताम् । भगवत्पारम्यादपि अवतार सौशील्य मेव भोग्यतया निरन्तरानुभाव्य मिति भावः ॥ ५५ ॥

*यद्वै जरासुत भयाद्विपलयथा स्त्वं*
*तच्चेन्मनुष्य चरितानु विधानजन्ते।*
*तर्हित्रिलोक गुरु मीश्वर मीश्वराणां*
*बणाहवे किमिति शम्भु मजृम्भय स्त्वम् ॥ ५६ ॥*

यदिति। जरासुतभयात् जरासन्धनिमित्ताद्भयात् त्वमपि विपला यथा पलयितवा निति यत्। वै प्रसिद्धम्। तत् पलायनं ते तव मनुष्य चरितानुविधानजञ्चेत् मर्त्य चरितानुवर्तनजन्यं यदि तर्हि त्रिलोकगुरुं अत एव ईश्वराणां लोकपालाना मिन्द्रादीना मपीश्वरम्, शम्भुं रुद्रं बाणाहवे बाणासुर युद्धे किमिति अजृम्भयः जृम्भित मकरोः? तदुक्तं भारते - "जृम्भणास्त्रप्रयोगेण जृम्भयामास शङ्करम्। जृम्भाभिभूत स्तु हरो रथोपस्थ उपाविशत्। न शशाक तथा योद्धुं कृष्णेनाऽक्लिष्टकर्मणा ॥ " इति। जरासन्धभयात् पलायितस्य शम्भुजृम्भणं कथं घटते इति परिचोदनात्, मनुष्यभावनाया मपि भवतः पारम्यं दुरपह्नव मिति भावः। विपलायथा इति विपरापूर्वात्, अय गतौ इति धातोर्लङ् मध्यमैकवचनम्। "उप सर्गस्यायतौ" इति रेफस्य लत्वम् ॥ ५६ ॥

*जातं कुत स्त दकृतज्ञ विचेष्टितं ते*
*पुत्रीयया किल वरं ववृषे वृषाङ्कात्।*
*अक्षेषु सक्तमतिना च निरादरेण*
*वाराणसी हरपुरी भवता विदग्धा ॥ ५७ ॥*

जातमिति। पुत्री यया आत्मनः पुत्त्रेच्छया "सुपः आत्मनः क्यच्" इति आत्मनः पुत्त्रेच्छायां पुत्त्रशब्दात् क्यच् प्रत्यये विहिते, "क्यचि च" इति ईत्वे च कृते पुत्रीयेति रूपं सिध्यति। वृषाङ्कात् वृषभध्वजात् वरं ववृषे अक्षेषु सक्तमतिना अक्षक्रीडाव्यासक्तबुद्धिना निरादरेण आदररहितेन

अभिनिवेशशून्येन भवता, हरपुरी वाराणसी काशी विदग्धा। पौण्ड्रकवासुदेवसहायभूतस्वपितृवधामर्षितेन काशीराजेन रुद्रवर-प्रसादोत्पादितया कृत्यया द्वारकादहने प्रसक्ते, रुक्मिण्या साक मक्षक्रीडासक्तेन कृष्णेन प्रेषितो हेतिराजः, काशीराज प्रहितां कृत्यां, काशीं, तं राजान ञ्च भस्मीचकारेति भागवते प्रसिद्धम्। तत् प्रसिद्धं अकृतज्ञविचेष्टितं कृतघ्नव्यापारः, ते तव कुतो हेतो र्जातम्। यस्मा त्पशुपतेः पुत्रार्थवरलाभः तत्पुरवाराणसीदहनं सर्वात्मना अनुचित मिति भावः। सर्वेश्वरस्य तव पुत्त्रार्थनादिकं मनुष्यत्वविडम्बनानुगुण मिति निष्कृष्ट तात्पर्यम्॥ ५७॥

*सञ्जीवयन्नपि मृतं सुत मुत्तराया -*
*स्सान्दीपिने श्चिरमृतं सुतं मानयं श्च।*
*धाम्नो निजा द्द्विजसुतान्पुन रानयन्वा*
*स्वा मेव तां तनुमहो कथ मानय स्त्वम्॥ ५८॥*

सञ्जीवय न्निति। मृत मुत्तराया स्सुतम् अश्वत्थाम प्रयुक्तापाण्ड-वस्त्रदग्ध मभिमन्युपत्न्या उत्तराया गर्भस्थं पुत्त्रं सञ्जीवयन्नपि "द्रौण्यस्त्र विप्लुष्ट मिदं शरीरं सन्तानबीजं कुरुपाण्डवानाम्। जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे य श्शरणं गतायाः। पादेन कमलाभेन ब्रह्मरुद्रार्चितेन च। पस्पर्श पुण्डरीकाक्षः आपादतलमस्तकम्। यदि मे ब्रह्मचर्यं स्यात्सत्यञ्च मयि तिष्ठति। आव्याहतं ममैश्वर्यं तेन जीवतु बालकः" इत्युक्त प्रकारेण रक्षन्नपि, मृतं सान्दीपिने स्सुत मानयंश्च; विद्याप्रदातुः सान्दीपिनेः कालान्तरे पञ्चजननाम्ना असुरेण भक्षितं सुतं गुरुदक्षिणात्वेन पञ्चजनोदरात्पुनः आनयन्नपि, निजधाम्नः श्रीवैकुण्ठात् द्विजसुतान्पुन रानयन्वा, जातमात्रे जातमात्रे एव मृतान् कस्यचित् द्वारकास्थस्य ब्राह्मणस्य सुतान् तत्प्रार्थनया पार्थेन साकं रथ मारुह्य, सप्तलोकान् अण्डावरणसप्तकम्

प्यतीत्य गत्वा पुन रानयन्वा त्वं स्वां स्वकीयां तां तनु मेव मरणकालीनं तत्तच्छरीर मेव कथ मानयः? उत्तरासुतस्य कालविप्रकर्षाभावेऽपि भस्मीभूतस्य तस्य शरीरस्य आनयन माश्चर्यावह मिति मन्तव्यम्। "पराऽस्य शक्ति र्विविधैव श्रूयते" इत्युक्तसर्वशक्ते रघटितघटनया सम्भवतीति भावः ॥ ५८ ॥

इत्थं "अतिमानुषशील वृत्तिवेषैः" इत्युपक्रमानु गुणं "आत्मानं मानुषं मन्ये रामं दशरथात्मजम्", "अहं वो बान्धवो जातः" इति मनुष्यत्व भावनाया मपि अतिमानुषं ज्ञानशक्त्यादि गुणगण मनुभूय प्रबन्धं परिसमापयितुकाम श्शरणागतिपूर्वकं स्वाभिमतं प्रार्थयते श्लोकत्रयेण।

*अद्याऽपि नाऽस्त्युपरति स्त्रिविधापचारा -*
*त्पापः परे निपतितोऽस्मि तम स्यपारे।*
*एतादृशोऽह मगति र्भवतो दयायाः*
*पात्रं त्वदीय चरणौ शरणं प्रपद्ये॥ ५९॥*

अद्यापीति। पापः पापिष्ठः अहं परे महति अतएव अपारे दुस्तरे तमस्यज्ञाने निपतितोऽस्मि। पाप इत्यनेन कर्मयोगाभाव उक्तः। तदभावा देव "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" इत्युक्त ज्ञानयोगाभावश्च तमसि निपतितोऽस्मीत्यनेनोक्तः। त्रिविधापचारात् भगवदपचार-भागवतापचारासह्यापचाररूपात् उपरति र्निवृत्तिः अद्याऽपि नाऽस्ति। ज्ञानकार्यत्वात् अपचारोपरते रितिभावः। भक्तियोगस्य तदुभय साध्यत्वात् तदभावश्च सिद्धः। एतादृशः अगतिः उपायान्तरशून्यः भवतो दयायाः पात्र महं त्वदीयचरणौ शरणं प्रपद्ये। यद्वा त्रिविधापचारात् उपरतिर्नाऽस्तीत्यनेन प्रातिकूल्यवर्जनाभावः उक्तः। पाप इत्यनेन आनुकूल्यसङ्कल्पाभाव उक्तः। तमसि निपतितोऽस्मीत्यनेन

महाविश्वासाभावः उक्तः। एतादृशः अगतिः अङ्ग सम्पत्तिरहितोऽहं भवतो दयायाः पात्रम्। अकिञ्चनानां कृपैव उत्तारिकेति भावः ॥ ५९ ॥

उक्तमेव विवृणोति -

*विस्रम्भणं त्वयि न यद्यपि मेऽस्ति नाऽपि*
*श्रद्धा यथोक्तवचनार्थगता तथाऽपि*
*वाच न्त्विमां सकृदथाऽप्यसकृन्मयोक्तां*
*सत्यां कुरुष्व दययैव दयैकसिन्धो ॥ ६० ॥*

विस्रम्भणमिति। हे दयैकसिन्धो, यद्यपि त्वयि विस्रम्भणं रक्षिष्यतीति विश्वासो नास्ति। यथोक्तवचनार्थगता "एतादृशोऽहमगति र्भवतो दयायाः पात्रं त्वदीयचरणौ शरणं प्रपद्ये" इत्युक्तवाक्यार्थगता श्रद्धा विश्वासत्वराऽपि नास्ति। उक्ति रनुष्ठानपर्यवसायिनी न भवतीति यावत्। तथाऽपि सकृदुक्ता मिमां वाचम्, अथाऽपि असकृदुक्तां निरन्तरमुच्चारितां वा, सत्यां करणत्रयेणाप्यनुष्ठितां मनःपूर्विकां वा दययैव कुरुष्व। एव कारेण दयैव साङ्ग साधन मिति भावः ॥ ६० ॥

*पापीयसोऽपि शरणागति शब्द भाजो*
*नोपेक्षणं मम तवोचित मीश्वरस्य।*
*त्वज्ज्ञानशक्ति करुणासु सतीषु नेह*
*पापं पराक्रमितु मर्हति मामकीनम् ॥ ६१ ॥*

इति श्रीवत्सचिह्नविरचिते पञ्चस्तवे अतिमानुष स्तवः परिसमाप्तः ॥

पापीयस इति। हे दयैकसिन्धो, पापीयसोऽपि अत्यन्तपापिनोऽपि शरणागति शब्दभाजः "त्वदीयचरणौ शरणं प्रपद्ये" इत्युक्तिमात्रं प्राप्तस्य मम उपेक्षणं उपेक्षा ईश्वरस्य शक्तिमतः तव नोचितम्। अस्तु वा, शरणागत इत्युक्तिरेव फलसाधनं, प्रतिबन्धकपापोपशमनं तु त्वदनुष्ठित

प्रायश्चित्तसाध्यम् इत्यत आह-त्वदिति। त्वज्ज्ञानशक्तिकरुणासु सतीषु विद्यमानासु मामकीनं पापं पराक्रमितुं प्रतिबन्धकीभवितुं नार्हति न क्षमते। यथातथावाऽपि शरणागत इत्युक्तिमतां प्रतिबन्धकपाप निरसनद्वारा भवच्चरणारविन्द निरन्तरदास्य प्रदान दीक्षितासु त्वज्ज्ञानशक्ति रुणासु सतीषु मदीयं पापं फलप्रतिबन्धनाय नाऽलमिति, भवताऽह मवश्यं रक्षणीय इति भावः। त्वज्ज्ञानशक्ति करुणास्वित्यत्र दयायाः पात्रं दययैवेति प्रकरणानुगुण्येन दयायाः प्रधान साधनत्वं ज्ञानशक्तयो स्तदङ्गत्व मिति सम्प्रदायः ॥ ६१ ॥

पञ्चस्तवव्याख्यायां अतिमानुषस्तवव्याख्या परिसमाप्ता ॥

पञ्चस्तवे

# सुन्दरबाहुस्तवः

अथ भगवद्भाष्यकार परमकृपालब्धपरावरतत्त्वयाथात्म्याः तदीयपदारविन्दद्वन्द्व सेवैकधारकाः श्रीवत्साङ्कमिश्राः पाषण्डप्रभुविवासित तद्विश्लेष मसहमानाः विभवावतारस्तवानन्तर मर्चावतारस्तुतेः प्रस्तुतत्वाच्च, समाश्रितजन सर्वाभीष्ट प्रद वन गिरिमन्दिर सुन्दरबाहु-महिमस्तव प्रवृत्ताःप्रस्तावे एव भाष्यकारचरणनलिनावलोकनमेव फलत्वेन सङ्कल्प्य सकलश्रुत्यन्ततत्त्वार्थराशिं प्रकाशयितुं प्रारभन्ते —

*श्रीमन्तौ हरिचरणौ समाश्रितोऽहं*
*श्रीरामावरज मुनीन्द्रलब्धबोधः ।*
*निर्भीक स्तत इह सुन्दरोरुबाहुं*
*स्तोष्ये तच्चरण विलोकनाभिलाषी ॥ १ ॥*

श्रीमन्ताविति । श्रीरामावरज मुनीन्द्रलब्धबोधः श्री रामानुजयोगीन्द्रसम्प्राप्त त्रय्यन्तज्ञानः, अत एव, श्रीमन्तौ हरिचरणौ समाश्रितः ततो हेतोः निर्भीकः भयशून्यः अहं भाष्यकार विश्लेषकाले तच्चरणविलोकनाभिलाषी सन्, सुन्दरोरुबाहुं सुन्दरः रुचिरः उरुः पीनश्च बाहुर्यस्य तं स्तोष्ये, - रामानुजचरणनलिन विलोकनकामः सुन्दरबाहुं स्तोष्यामीतिभावः । अयमर्थः "विज्ञापनां वनगिरीश्वर सत्युरूपा मङ्गीकुरुष्व करुणार्णव, मामकीनाम् । श्री रङ्गधामनि यथापुर मेष सोऽहं

रामानुजार्यवशगः परिवर्तिषीय'' इत्युपसंहारेऽपि स्पष्टः । आदौ श्रीशब्दप्रयोग एव प्रबन्धस्य मङ्गलाचार इति मन्तव्यम् । सुन्दरोरुबाहुं स्तोष्ये इति वस्तुनिर्देशो वा ॥ १ ॥

सुन्दरबाहो रिव वनाद्रिसम्भूत नूपरापगाया अपि अभीष्ट वरप्रदत्व माह -

*सुन्दरायत भुजं भजामहे*
*वृक्षषण्डमय मद्रिमाश्रितम् ।*
*यत्र सुप्रथित नूपुरापगा -*
*तीर्थ मर्थितफलप्रदं विदुः ॥ २ ॥*

सुन्दरायतेति । वृक्षषण्डमय मद्रिं आश्रितं सुन्दरायतभुजं भजामहे सेवामहे । सुन्दरश्च आयतश्च भुजो यस्येति विग्रहः । ''आयता श्च सुवृत्ता श्च'' इत्यादि । यत्र वृक्षषण्डमयाद्रौ सुप्रथिता सुतरां प्रसिद्धा या नूपुरापगा तस्या स्तीर्थं सलिलं अर्थितफलप्रदम् अभिलषित प्रयोजनदायि विदुः जानन्ति; सन्त इति शेषः । ''विदो लटो वा'' इति विदे र्लटि णलाद्यादेशः ॥ २ ॥

*क्वचिच्त्वरित गामिनी क्वचन मन्दमन्दालसा*
*क्वचित्स्खलित विह्वला क्वचन फेनिला सारवा ।*
*पतन्त्यपि किल क्वचि द्व्रजति नूपुराह्वा नदी*
*सुसुन्दरभुजाह्वयं मधु निपीय मत्ता यथा ॥ ३ ॥*

क्वचिदिति । क्वचित् प्रदेशे त्वरितगामिनी शीघ्रं गच्छन्ती क्वचन मन्दमन्दालसा अलसेव अत्यल्पवेगवती; यद्वा, मन्दमन्दा च सा अलसा चेति विशेषण समासः । क्वचित् स्खलितविह्वला स्खलन्ती भ्रमन्ती च क्वचन फेनिला सञ्जातफेना, क्वचन सारवा साट्टहासा, क्वचित्पतन्त्यपि उन्नता त्प्रदेशात् पतन्ती च नूपुराह्वा नदी, सुसुन्दरभुजाह्वयं सुन्दरबाहुनामकं मधु निपीय पीत्वा मत्ता यथा मत्तेव व्रजति, यत्र नूपुराह्वा नदी तं 'वृक्षषण्डमय मद्रि माश्रितम्' इति पूर्वेणान्वयः ॥ ३ ॥

*उदधिगमन्दराद्रिमथिमन्थनलब्धपयो-*
*मधुररसेन्दिराह्व सुधसुन्दरदोःपरिघम् ।*
*अशरण मादृशात्मशरणं शरणार्थिजन-*
*प्रवणधियं भजेम तरुषण्डमयाद्रिपतिम् ।। ४ ।।*

उदधीति । मन्दराद्रिरेव मन्थाः मथनसाधनदण्डः, उदधिगेन मन्दराद्रिमथा यन्मन्थनं उदधिगमन्दराद्रिमथिमन्थनं तेन लब्धे पयोमधुर रसेन्दिराह्वसुधे याभ्यां तथोक्तौ सुन्दरदोःपरिघौ रुचिरभुजार्गलदण्डौ यस्य तं तथोक्तम् । पयोमधुररसः अमृतं क्षीराब्धिपय स्सारभूतत्वादमृतस्य । इन्दिराह्वा लक्ष्मीनाम्नी सुधा इन्दिराह्वसुधा, पयोमधुररसश्च इन्दिराह्वसुधाचेति पयोमधुररसेन्दिराह्वसुधे यस्य दोःपरिघाभ्यां कर्तृभ्यां मन्थनेन करणेन पयोमधुर रसेन्दिराह्वसुधे लब्धे त मित्यर्थः । अशरणानां रक्षकान्तररहितानां मादृशां अस्मत्सदृशानां आत्मनां शरणं रक्षितारं रक्षणार्थिजने रक्षकापेक्षिजने प्रवणधियं आसक्तधियं आभिमुख्यमात्रतृप्त मित्यर्थः । तरुषण्ड मयाद्रिपतिं वनगिरिनाथं भजेम सेवेमहि ।। ४ ।।

*शशधर रिङ्खणाढ्यशिख मुच्छिखर प्रकरं*
*तिमिरनिभप्रभूत तरुषण्ड मयं भ्रमदम् ।*
*वनगिरि मावसन्त मुपयामि हरिं शरणं*
*भिदुरित सप्तलोक सुविशृङ्खलशङ्खरवम् ।। ५ ।।*

शशधरेति । शशधररिङ्खणेन शशाङ्कसञ्चारेण आढ्यासम्पन्ना शिखा चूडाभूभागो यस्य तम्, उच्छिखरप्रकरम् उन्नतशृङ्गसमूहं तिमिरनिभप्रभूत तरुषण्डमयम् अन्धकार सङ्काश बहुमहीरुहसमूहप्रचुरम् । प्राचुर्यार्थे मयट् । अत एव भ्रमदं तरुषण्ड (मय) एवाऽयं न पर्वतइति भ्रान्तिप्रदम्, एवम्भूतं वनगिरिं आवसन्तं, वनगिरौ वसन्त मित्यर्थः । "उपान्वध्याङ्वसः" इति सप्तम्यर्थे द्वितीया । भिदुराः पदार्था अस्य सञ्जाताः भिदुरिताः । "तदस्य सञ्जातं तारकादिभ्य इतच्" इतीतच् । यद्वा भिदुराः कृताः भिदुरिताः ।

"तत्करोति तदाचष्टे" इति णिचि विहिते निष्पन्नपदं वा। भिदुरितेषु सप्तलोकेषु सुविशृङ्खलः निरर्गलः शङ्खरवः शङ्खध्वनिर्यस्मिं स्तम्। हरिं शरण मुपयामि शरणत्वेनोपयामीत्यर्थः। प्रथमयोजनायां सुन्दरबाहु-पाणिस्थपाञ्चजन्यध्वनिना सप्तलोकस्थाः पदार्था भिन्ना भवन्तीत्यर्थः। द्वितीययोजनायां सप्तलोका एव भिन्ना भवन्तीति भेदः। पूर्वश्लोके 'उदधिगमन्दराद्री'त्यादि विशेषणानि, एत च्छलोकस्थ 'शशधर-रिङ्खणे'त्यादि विशेषणान्यपि दिव्यप्रबन्धानुसारेणेति द्रष्टव्यम्॥ ५॥

**यत्तुङ्गशृङ्गविनिषङ्गिसुराङ्गनानां**
**न्यस्तोर्ध्वपुण्ड्रमुखमण्डनमण्डितानाम्।**
**दर्पण्यभूद्धृतमपाङ्क शशाङ्कपृष्ठं**
**तद्धाम सुन्दरभुजस्य महान्वनाद्रिः॥ ६॥**

यत्तुङ्गेति। न्यस्तोर्ध्वपुण्ड्रमुखमण्डनमण्डितानां न्यस्तं धृतं यत् ऊर्ध्वपुण्ड्र मेव मुखालङ्कारः तेन अलङ्कृतानाम्, यत्तुङ्गशृङ्गविनिषङ्गिण्यः, यस्य वनाद्रेः समुन्नत सानुविनिषण्णाः, या स्सुराङ्गना स्तासाम्, धृत मनुत्तुङ्गशृङ्गधृतम्, अपाङ्क मपगतकलङ्कं यत् शशाङ्कपृष्ठं चन्द्र चरमभागः। "पृष्ठन्तु चरमं तनोः" इत्यमरः। कलङ्कत्वेनोक्तस्य शशस्य चन्द्रोत्सङ्ग-स्थत्वात् पृष्ठ मपाङ्कं भवतीति भावः। दर्पण्यभूत् दर्पणोऽभूत्। दर्पण्य-भूदित्येकं पदम्। अभूततद्भावे च्विः "च्वौच" इति दीर्घः। तत्सुन्दरभुजस्य धाम वासस्थानं वनाद्रिः महान् महावैभवः। वनगिरिनामकं सुन्दरबाहुवासस्थानं दिव्य मित्यर्थः। पूर्वश्लोके "शशधररिङ्खणाढ्यशिखम्" इत्युक्तम्। ततोऽप्युत्तुङ्गशृङ्गस्थानां सुराङ्गनानां निम्नशुङ्गसञ्चारात् चन्द्रपृष्ठं दर्पणीभवतीति भावः॥ ६॥

*यदीय शिखरागतां शशिकलान्तु शाखामृगा-*
*निरीक्ष्य हरशेखरीभवन मामृशन्त स्ततः।*
*स्पृशन्ति नहि देवतान्तरसमाश्रितेति स्फुटं*
*स एष सुमहातरु व्रजगिरि र्गृहं श्रीपतेः॥ ७॥*

यदीयेति । शाखामृगाः कपयस्तु यदीयशिखरागतां वनगिरिसम्बन्धिशृङ्गमायातां शशिकलां निरीक्ष्य, हरशेखरीभवनम् अशेखरस्य शेखरतया सम्पत्तिः शेखरीभवनं रुद्रशिरोऽलङ्कारत्वम् आमृशन्तः विचारयन्त स्सन्तः, ततो हेतोः देवतान्तरसमाश्रितेति न स्पृशन्ति हि। स एषः देवतान्तरसम्बन्धिसम्बन्धासहत्वं चपलानां कपीना मपि यत्सम्बन्धनिबन्धनं सोऽसौ सुमहातरुव्रजगिरिः श्रियःपतेः स्फुटं प्रसिद्धं गृहम्, इन्दिरेशमन्दिरत्वेन सर्वत्र प्रसिद्धेष्वपि प्रसिद्ध मित्यर्थः ॥ ७ ॥

***सुन्दरदोर्दिव्याज्ञालम्भनकातर वशानुयायिनि करिणि।***
***प्रणयज कलहसमाधि र्यत्र वनाद्रि स्स एष सुन्दर दोष्णः ॥ ८ ॥***

सुन्दरेति । यत्र वनाद्रौ करिणि श्रीवनगजे, सुन्दरदोर्दिव्याज्ञाया आलम्भनेन स्पर्शेन कातरा भीतिमती या वशा करिणी तदनुयायिनि तदनुसारिणि सति, वशाकरिणोः प्रणयकलहे करिण्या द्रुतगमने प्रस्तुते सति करिणा न गच्छेति सुन्दरदोर्दिव्याज्ञायां कृतायां करिणी कातरा सती मन्दं गच्छति। ततः करी तदनुसारी भवतीति भावः। "आलम्भः स्पर्श हिंसयोः" इत्यमरः[1]। एवं सति प्रणयजकलहस्य समाधि स्समाधानं भवति। स एष वनाद्रिः सुन्दरदोष्णः सुन्दरदोस्सम्बन्धिदिव्यस्थान मित्यर्थः । तत्रत्यतिरश्चामपि प्रणयकलहसमाधानसाधनं सुन्दरदोर्दिव्याज्ञैवेति दिव्यस्थानस्य सकलजन्तुजातसमीचीनज्ञानप्रदायित्व मुक्तं भवतीति मन्तव्यम् ॥ ८ ॥

***स एष सौन्दर्य निधे र्धृतश्रियो***
***वनाचलो नाम सुधाम यत्र हि।***
***भुजङ्गराजस्य कुलस्य गौरवा-***
***न्न खण्डिताः कुण्डलिन श्शिखण्डिभिः ॥ ९ ॥***

1.अमरकोशे नोपलभ्यते ।

स इति। यत्र वनाद्रौ कुण्डलिनः फणिनः भुजङ्गराजस्य कुलस्य शेषसन्तानस्य गौरवात् पूज्यतया हेतोः शिखण्डिभि र्मयूरैः न खण्डिताः न दष्टा हि। स एष वनाचलः सौन्दर्यनिधे र्धृतश्रियः आरूढश्रियः सुधाम नाम शोभनस्थानत्वेन प्रसिद्धं भुजङ्गराज कुलीनतारूपराज कुलमाहात्म्यात् कुण्डलिनः शिखण्डिभिः न खण्डिता हीत्यनेन वनाचलस्य निसर्गविरोधिना मपि निर्वैरत्वापादकत्वरूप शोभनता प्रसिद्धेति भावः। आरूढश्रीरिति सुन्दरबाहो र्नामान्तरम् ॥ ९ ॥

*वृषगिरि रय मच्युतस्य यस्मिन्*
*स्वमत मलङ्घयितुं परस्परेभ्यः।*
*खगपतिचरणौ खगा श्शपन्ते*
*भुजगपते र्भुजगाश्च सर्व एव॥ १०॥*

वृषगिरि रिति। यस्मिन् वृषगिरौ स्वमतं स्वस्वाभिमतं प्रतिज्ञातं अलङ्घयितुं अनतिक्रमितुं, सर्वे खगाः पक्षिणः खगपतिचरणावेव पक्षिराजपादावेव परस्परेभ्यः मिथः शपन्ते शापविषयौ कुर्वन्ति। चरणा वुद्दिश्यशपथं कुर्वन्तीत्यर्थः। सर्वे भुजङ्गाः भुजगपते श्शेषस्य चरणौ शपन्ते। "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इत्यनुशासनात् परस्परेभ्य इतिचतुर्थी। अयं वृषगिरिः वृषभाद्रिः अच्युतस्यधाम, "अत्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्। नहि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः" इति प्रतिज्ञाच्यवनहीनस्य भगवतो वासस्थान मित्यर्थः। अत्र तिरश्चा मपि स्तोमेन स्वस्वप्रति ज्ञाता नुल्लङ्घनाय स्वस्वस्वामिचरणा वुद्दिश्य शपथस्य क्रियमाणत्वात् सर्वस्वामिनः सुन्दरबाहो स्सत्यप्रतिज्ञत्व मेव अच्युतपदेन विवक्षित मिति सम्प्रदायः॥ १०॥

*हरिकुल मखिलं हनूमदङ्घ्रिं*
*स्वकुलपजाम्बवत स्तथैव भल्लाः।*
*निजकुलपजटायुषश्च गृध्रा-*
*स्स्वकुलपतेश्च गजा गजेन्द्रनाम्नः॥ ११॥*

हरिकुलमिति। "स्वमत मलङ्घयितुं परस्परेभ्यः" इति पूर्वश्लोका दनुषङ्गः कर्तव्यः। अत्र अखिलं हरिकुलं कपियूथं हनूमदङ्घ्रिं शपते। तथैव हरिकुलवदेव भल्लाः ऋक्षाः स्वकुलपजाम्बवतः निजयूथपस्य जाम्बवतः अङ्घ्रिं शपन्ते। गृध्राः निजकुलपजटायुषः अङ्घ्रिं शपन्ते। गजाश्च गजेन्द्रनाम्नः स्वकुलपतेः अङ्घ्रिं शपन्ते। अयं वृषगिरिः, "अच्युतस्य धाम इति पुर्वश्लोकेनाऽन्वयः। श्लोकद्वयेनाऽपि दिव्यस्थानस्य भागवत भक्तिसमृद्धिप्रदत्व मुक्तं भवति॥ ११॥

*वकुलधरसरस्वती विषक्त*
*स्वररसभावयुतासु किन्नरीषु*
*द्रवति दृषदपि प्रसक्तगाना*
*स्विह वनशैल तटीषु सुन्दरस्य॥ १२॥*

वकुलधरेति। वकुलधरसरस्वत्यः शठकोपमुनिप्रणीताः द्रमिडोपनिषदः तासु विषक्ताः आसक्ताः ये स्वररसभावाः - स्वराः निषादादयः, रसाः शृङ्गारादयः, भावाः स्थायिभावादयः, तै र्युतासु किन्नरीषु प्रसक्तगानासु प्रारब्धगीतिषु सतीषु किन्नरीषु स्वरसभावोन्मेष-पूर्वकं द्रामिडोपनिषद्गानप्रसक्तासु सतीष्विति पर्यवसितार्थः। सुन्दरस्य इह वनशैल तटीषु सुन्दरबाहु सम्बन्धिष्वेतेषु वनाद्रितटेषु दृष दपि शिलाऽपि द्रवति द्रवीभवति। तत्रत्यकिन्नराङ्गनाना मपि द्रमिडोपनिषदनुभव स्तादृश इति दिव्यस्थानस्य ज्ञानप्रदत्व मुक्तमिति मन्तव्यम्॥ १२॥

*भृङ्गी गायति हंसताल निभृतं तत्पुष्णती कोकिला -*
*ऽप्युद्गायत्यथवल्लितल्लजमुखा दाम्रं मधु स्यन्दते।*
*निष्पन्दस्तिमिताः कुरुङ्गततय श्शीतं शिलासैकतं*
*सायाह्ने किल यत्र सुन्दरभुज स्तस्मिन्वनक्ष्माधरे॥ १३॥*

भृङ्गीति। यत्र सुन्दरभुजः तिष्ठति, तस्मिन् वनक्ष्माधरे सायाह्ने हंसतालनिभृतं हंसानां पादतालैः परिपूर्णं यथा तथा भृङ्गी गायति।

भृङ्गाङ्गनागाने हंसगति स्तालत्वेन पर्यवस्यतीत्यर्थः। पूर्वश्लोके किन्नरीकृत द्रमिडोपनिषद्गानस्य प्रसक्तत्वा दत्रापि भृङ्गीभि र्द्रमिडोपनिष देव गीयते इति हार्दो भावः। हंस स्वनस्यापि ताल स्वनानुकारित्वं केचि दूचुः। तद्गानं पुष्णती वर्धयन्ती सती कोकिलाऽपि कोकिलाङ्गनाऽपि उद्गायति उच्चैर्गायति। अथ गानानन्तरं वल्लितल्लजमुखात् लतामतल्लिकाग्रात् मधु मकरन्द एव आस्रं अश्रु स्यन्दते क्षरति। कुरङ्गततयः मृगपङ्क्तयः निष्पन्दस्तिमिताः निश्चेष्टाः स्तब्धाश्च भवन्ति। गानानुभवेनात्यन्तं स्तिमिता भवन्तीत्यर्थः निष्पन्दशब्देन करचरणादिस्पन्दराहित्यं, स्तिमितशब्देन अक्ष्यादिस्पन्दराहित्यश्चोच्यते। शिला च सैकतञ्च शिलासैकतं द्वन्द्वौकवद्भावः। शीतं भवति। तादृशाचेतनाना मपि शैत्यावहं गान सौभाग्य मिति भावः॥ १३॥

इतः परं वेदान्तोदित प्रक्रियया स्तोतुकामः स्वरूपापेक्षया दिव्यमङ्गलविग्रहस्य शुभाश्रयतया तद्वैशिष्ट्य मनु सन्धत्ते।

*पीताम्बरं वरदशीतलदृष्टिपात -*
*माजानुलम्बिभुज मायत कर्णपाशम्।*
*श्रीमन्महावन गिरीन्द्रनिवासदीक्षं*
*लक्ष्मीधरं किमपि वस्तु ममाऽऽविरस्तु॥ १४॥*

पीताम्बर मिति। पीताम्बरं "माहारजनं वास" इति श्रुत्युक्त प्रकारेण कनकाम्बरं, वरदः आश्रिताना मभीष्टदः शीतलः दृष्टिपातः कटाक्षो यस्य तत् आजानुलम्बि भुजम्, " आयता श्च सुवृत्ता श्च बाहवः परिघोपमाः" इत्युक्तप्रकारेण सुवृत्तस्फीतायतबाहु, आयतकर्णपाशम् अंसप्रान्त प्रलम्बिकर्णपाशम् - प्रशस्तः कर्णः कर्णपाशः। श्रीमान् महांश्च यो वनगिरीन्द्रः तस्मि न्निवासे दीक्षा सङ्कल्पो यस्य तत्तथोक्तम्। श्रीमन्महच्छब्दाभ्यां "सुभगश्चित्र कूटोऽसौ गिरिराजोपमो गिरिः" इत्यत्र सुभगगिरिराजोपमशब्दौ सूच्येते। लक्ष्मीधरं वक्षःस्थलक्ष्मीकं, किमपि

वाङ्मनसापरिच्छेद्यलावण्य सौन्दर्यसौकुमार्यादिशेवधिविग्रहविशिष्टं वस्तु मम आविरस्तु। साक्षात्कार योग्यं भवतु। "न ते रूपं न चाऽऽकारो नाऽऽयुधानि न चाऽऽस्पदम्। तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे" इत्युक्तप्रकारेण प्रकाशता मित्यर्थः॥ १४॥

**जनिजीवनाप्यय विमुक्तयो यतो**
**जगता मिति श्रुति शिरस्सु गीयते।**
**तदिदं समस्त दुरितैकभेषजं**
**वनशैल सम्भव महं भेज महः ॥ १५॥**

जनीति। जगतां तिष्ठति गच्छतीति च व्युत्पत्त्या स्थावरजङ्गमानां जनिजीवनाप्ययविमुक्तयः सृष्टिस्थितिसंहार संसार विमोचनानि, यतः यस्मादिति श्रुतिशिरस्सु वेदान्तेषु गीयते, "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति श्रूयते इत्यर्थः। समस्तदुरितैकभेषजं "सर्वपापेभ्यो मोक्षयिष्या" मीति स्वसङ्कल्पेन सर्वदुष्कर्मनिवर्तकं वनशैलसम्भवं वनाद्रौ प्रादुर्भूतं तदिदं महः, "नारायण परो ज्योतिः" इत्युक्तं सन्निहितं तेजः अहं भजे जगज्जन्मादि कारणं परं ब्रह्मं सर्वसमाश्रयणीयत्वेन सकल कलुषनिवर्तकं सत् वनाद्रौ सुलभं भवतीति भावः॥ १५॥

***सद्ब्रह्मात्मपदै स्त्रयीशिरसि यो नारायणोक्त्या तथा***
***व्यख्यातो गति साम्यलब्ध विषयानन्यत्व बोधोज्ज्वलैः।***
***निस्तुल्याधिक मद्वितीय ममृतं तं पुण्डरीकेक्षणं***
***प्रारूढश्रिय माश्रये वनगिरेःकुञ्जोदितं सुन्दरम्॥ १६॥***

सद्ब्रह्मेति। त्रयीशिरसि वेदान्ते गति साम्येन "सदेव सोम्येद मग्र आसीत्", "ब्रह्म वा इद मेक मेवाऽग्र आसीत्", "आत्मा वा इदमेक एवाऽग्र आसीत्" इत्येवंरूपकारणवाक्यगतिसादृश्येन लब्धो यो विषयानन्यत्वबोधः एकविषयत्वज्ञानं तेन उज्ज्वलैः प्रकाशमानैः। सर्वेषां

कारणविषयत्वेऽपि सामान्यविशेषन्यायेन प्रकाशमानैकविषयत्वै रित्यर्थः। सद्ब्रह्मात्मपदैः कारणत्वेन प्रतिपादित इति शेषः। यः तथा देवता विशेषवाचितया नारायणोक्त्या व्याख्यातः। "एको ह वै नारायण आसीत्, न ब्रह्मा, नेशान" इत्यादि कारणवाक्यस्थनारायणशब्देन निर्णीत इत्यर्थः। एतदुक्तं भवति — "सदेव सोम्येद मग्र आसीत्" इत्यत्र सूक्ष्मविभुसाधारण्येन सन्मात्रवाचक स्सच्छब्दः, ब्रह्मवेत्यादि वाक्ये ब्रह्मशब्दः सूक्ष्मस्य कारणतां निरस्य चेतनाचेतन साधारण्येन विभुवस्तुनः कारणत्वं वक्ति। आत्मशब्दस्तु चेतनमात्र वाचित्वात् यस्य कस्याऽपि चेतनस्य कारणत्वं गृह्णाति। नारायणशब्दस्य भगवन्मात्रवाचित्वं सर्वप्रमाण शरणाविगीतम्। अतो नारायण शब्देनैव निर्णयो जात इति, निस्तुल्याधिकं "न तत्समश्चाभ्याधिकश्च दृश्यते" इति श्रुतिप्रतिपादितम्, अत एवाऽद्वितीय ममृतम् अमृतवद्भोग्यभूतं, "रसो वै सः" इति श्रुतेः। पुण्डरीकेक्षणं वनगिरेः कुञ्जोदितं वनाद्रे र्लतागृहे प्रादुर्भूतं, प्रारूढश्रियं, प्रारूढश्री रिति सुन्दरभुजस्य नामान्तरम्। तं सुन्दरं आश्रये शरणतया समाश्रयामि॥ १६॥

*पतिं विश्वस्यात्मेश्वर मिति परं ब्रह्म पुरुषः*
*परं ज्योति स्तत्त्वं पर मपि च नारायण इति।*
*श्रुति र्ब्रह्मेशादीं स्तदुदित विभूती स्तु गृणती*
*य माहाऽऽरूढश्री स्सवन गिरिधामा विजयते॥ १७॥*

पति मिति। ब्रह्मेशादीन् तदुदित विभूती स्तु तदुदितविभूती रेव गृणती, "नारायणाद् ब्रह्मा जायते, नारायणा द्रुद्रो जायते" इत्यादिना ब्रह्मादीन् भगवद्विभूतिभूता नेव वदन्ती श्रुतिः यं आरूढश्रियं "पतिं विश्वस्याऽऽत्मेश्व" मित्यादि, "नारायण परं ब्रह्म" "विश्वमेवेदं पुरुषः", "नारायण परो ज्योतिः", "तत्त्वं नारायणः परः" इति च आह ब्रूते। वनगिरिधामा वनाद्रिनिलयः सः आरूढ श्रीः विजयते सर्वदेवतोत्कर्षेण

वर्तते । परत्व शङ्कास्पदीभूतानां ब्रह्मरुद्रादीना मपि यद्विभूतित्वं यस्य च सर्वस्मात्परत्वं श्रुतिरेवाऽऽह स एव सर्वोत्कृष्ट इत्यर्थः ॥ १७ ॥

*पृथिव्याद्यात्मान्तं नियमयति य स्तत्त्वनिकरं*
*तदन्तर्यामी तद्वपु रविदित स्तेन भगवान्*
*स एष स्वैश्वर्यं नविजह दशेषं वनगिरिं*
*समध्यासीनो नो विशतु हृदयं सुन्दरभुजः ॥ १८ ॥*

पृथिव्यादीति ॥ "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवी मन्तरो यमयति", इत्यारभ्य य आत्मनि तिष्ठन् आत्मनोन्तरः यमात्मा न वेद, यस्याऽऽत्मा शरीरं य आत्मान मन्तरो यमयति" "इत्यन्तं अन्तर्यामिब्राह्मणोक्त प्रकारेण यः भगवान् पृथिव्यादिश्चाऽसौ आत्मान्तश्चेति तथोक्तम्। तत्त्वनिकरं तत्त्वसमूहं नियमयति प्रवृत्तिनिवृत्तिशक्तं करोति । तदन्तर्यामी पृथिव्याद्यात्म-पर्यन्ततत्त्वान्तर्यामी तद्वपुः तच्छरीरकः, तेन तत्त्वनिकरेण अविदित श्च भवति। अशेषं स्वैश्वर्यं न विजहत् श्लोकद्वयोक्तं निजं सर्वेश्वरत्वं अत्यजन् सन् वनगिरिं समध्यासीनः वनगिरावासीन इत्यर्थः "अधिशीङ्स्थाऽऽसां कर्म" इति सप्तम्यर्थे द्वितीया । सुन्दरभुजः नः अस्माकं हृदयं विशतु । सर्वान्तर्यामित्वे साधारणेऽपि आश्रितानुग्रहाय विग्रहविशिष्ट स्सन् सन्निधत्ता मिति भावः ॥ १८ ॥

*प्रत्यगात्मनि कदाऽप्यसम्भव -*
*द्भूमभूमि मभिवक्ति यं श्रुतिः ।*
*तं वनाद्रिनिलयं सुसुन्दरं*
*सुन्दरायत भुजं भजामहे ॥ १९ ॥*

प्रत्यगात्मनीति। श्रुतिः यं, प्रत्यगात्मनि कदाऽपि मोक्षदशायामपि असम्भवतो भूम्नः महिम्नः, भूमिं उत्पत्तिस्थानम्, अभिवक्ति अभितो-वदति, सर्वत्राऽपि प्रतिपादयतीत्यर्थः । वनाद्रिनिलयं सुन्दरा आयताश्च

भुजा यस्य तं सुसुन्दरं भजामहे। पूर्वस्मिन्श्लोके सर्वचेतनाचेतनान्तर्यामित्वमुक्तम्। अन्तर्यामित्वेऽपि तद्गतसर्वदोषै रसंस्पृष्टत्वरूप हेयप्रत्यनीकतां कल्याणैकतानत्वञ्च जीवात्मन्यसम्भाविततया "एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण इति श्रुति राहेति भावः ॥ १९ ॥

उक्तमेव विवृणोति-

*वन्देय सुन्दरभुजं भुजगेन्द्रभोग -*
*सक्तं महावनगिरि प्रणय प्रवीणम्।*
*यं तं विदु र्दहर मष्ट गुणोपजुष्ट -*
*माकाश मौपनिषदीषु सरस्वतीषु ॥ २० ॥*

वन्देयेति। भुजगेन्द्रभोगसक्तं शेषपर्यङ्कशायिनमित्यर्थः। महावनगिरौ यः प्रणयः प्रीतिः रस्यताबुद्धिः, तस्मिन् प्रवीणं निपुणं वनाद्रिभोग्यतारसिक मित्यर्थः। विशेषणद्वयेन - " एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः। नागपर्यङ्कमुत्सृज्य ह्यागतो मुधुरांपुरीम्" इत्युक्त प्रकारेण क्षीराब्धिनाथ एव वनाद्रिनाथो जात इति पर्यवसितम्। एवम्भूतं सुन्दरभुजं वन्देय सेवेय। यं तं यं सुन्दरभुजं ओपनिषदीषु सरस्वतीषु उपनिषत्सम्बन्धिषु वाक्येषु अष्टगुणोपजुष्टं अपहतपाप्मत्वा द्यष्टगुणविशिष्टं दहरं दहराभिधानं आकाशं दहराकाशं विदुःजानन्ति; ब्रह्मविद इति शेषः। विदो लटो वा' इति लडर्थे णलादयः। "यदिद मस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः। तस्मिन्यदन्त स्तदन्वेष्टव्यम्। तद्वा विजिज्ञासितव्यम् इत्यारभ्य, "तस्मिन् कामा स्समाहिताः। एष आत्मा अपहतपाप्मा विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपास स्सत्यकाम स्सत्यसङ्कल्प" इत्याद्याः उपनिषदः, "ब्रह्मपुराख्ये शरीरे दहरपुण्डरीकं दहरकमलं दहराकाशाभिधानस्य भगवतो वेश्म" इत्यभिधाय "तस्मि न्यदन्त स्तदन्वेष्टव्य" मिति "तद्वा व विजिज्ञासितव्यम्" इति च सामान्यतो विनिर्दिष्टस्य विशेषाकाङ्क्षायां

"तस्मिन्कामा स्समाहिता" इति, काम्यन्त इति कामा इति व्युत्पत्त्या गुणा नभिधाय, के ते कामा इत्याकाङ्क्षायां, अपहतपाप्मत्वादीन् सत्यसङ्कल्पत्वपर्यन्तान् गुणा नभिदधते । आ समन्तात् काशत इति व्युत्पत्त्या आकाश शब्दोऽपि आकाशाधिकरणन्यायेन भगवद्वाचकः ॥ २० ॥

**यत्स्वायत्त स्वरूपस्थिति कृतिक निजेच्छा नियाम्यस्व शेषा**
**ऽनन्ताशेषप्रपञ्च स्तत इह चिदिवाऽचिद्वपुर्वाचिशब्दैः ।**
**विश्वैश्शब्दैः प्रवाच्यो हतवृजिनतया नित्यमेवानवद्य -**
**स्तं वन्दे सुन्दराह्वं वनगिरिनिलयं पुण्डरीकायताक्षम् ॥२१॥**

यदिति । यत् यतो हेतोः स्वायत्ताः स्वाधीनाः स्वरूपस्थितिकृतयो यस्य सः, स्वायत्त स्वरूपस्थितिकृत्तिकः कृतिशब्देन प्रवृत्तिरुच्यते । निजेच्छया नियाम्यः नियन्तुं शक्यः निजेच्छा नियाम्यः स्वस्य शेषः स्वशेषः । "परगतातिशयाधानेच्छया उपादेयत्व मेव यस्य स्वरूपं स शेषः पर श्शेषी इति शेषशेषिभावलक्षणं भाष्यकारै रुक्तम् । स्वायत्तस्वरूपस्थितिकृतिकः निजेच्छानियाम्यश्च स्वशेषश्च, अनन्तः असङ्ख्यातश्च कृत्स्नप्रपञ्चो यस्य स तथोक्तः । ततो हेतोः इह जगति अचिद्वपुर्वाचिशब्दैः अचित्परिणामदेवमनुष्यादिशरीर वाचिशब्दैः चिदिव जीव इव विश्वै श्शब्दैः सर्वचेतनाचेतनवाचिशब्दैः प्रवाच्यः, यः मुख्यवृत्त्या अभिधेयो यः, हतवृजिनतया अपहतपाप्मतया नित्य मनवद्य एव, हेय प्रत्यनीक एव भवति । अय मर्थः - यथा प्रकृतिपरिणाम पाञ्चभौतिक देवमनुष्यादि शरीरवाचिशब्दैः — "पुमा न्न देवो न नरो न तिर्यक् स्थावरोऽपि वा । ज्ञानानन्दमय स्त्वात्मा शेषो हि परमात्मनः ॥" इत्युक्त आत्मा धारकत्व नियन्तृत्वशेषित्वादिभिः देवोऽयं मनुष्योऽय मित्यभिधीयते एवं स्वाधीन त्रिविधचेतनाचेतन स्वरूपास्थिति प्रवृत्तिभेदात् नियन्तृत्वा च्छेषित्वाच्च सकलचेतनाचेतन वाचिशब्दैः — "तदेवाऽनुप्राविशत् । तदनुप्रविश्य । सच्चत्यच्चाऽभवत् । तदेवाऽग्निस्तद्वायुः ।

तत्सूर्य स्त दु चन्द्रमाः।'' ''ज्योतींषि विष्णु र्भुवनानि विष्णु र्वनानि विष्णु र्गिरयो दिशश्च'' इत्युक्तप्रकारेण य एवाऽभिधीयते, जीवस्य शरीरानुप्रवेशकृत स्वभावान्यथाभावरूप ज्ञानसङ्कोचविकासादि दोष सम्भवेऽपि चेतनाचेतनानुप्रवेशप्रसक्त तद्गतदोषासंस्पृष्टतया नि त्यनिर्दोषश्च भवतीति। वनगिरिनिलयं पुण्डरीकायताक्षं, सुन्दराह्व सुन्दर इत्याह्वा यस्येति विग्रहः। तं वन्दे, कृत्स्नचिदचिच्छरीरकत्वं, तन्निर्वाहकत्वं, तद्गतदोषासंस्पृष्टत्वं कल्याणगुणाकरत्वञ्च वनाद्रिनाथ दिव्यविग्रह एव स्फुरन्तीति हार्दो भावः॥ २१॥

*गुणजं गुणिनो हि मङ्गलत्वं*
*प्रमितं प्रत्युत यत्स्वरूप मेत्य।*
*त मनन्तसुखावबोधरूपं*
*विमलं सुन्दरबाहु माश्रयामः॥ २२॥*

गुणजमिति। गुणिनः मणि द्युमणि चन्द्र चन्दन चम्पकारविन्दादेः प्रभाप्रसाद सौरभादिगुणवतो वस्तुनः मङ्गलत्वं शोभनत्वं श्रैष्ठ्यं गुणजं हि गुण श्रैष्ठ्यनिबन्धन मिति प्रसिद्ध मित्यर्थः। यत्स्वरूपमेत्य प्रत्युत प्रमितम्। यस्य भगवतः स्वरूपं स्वभावत एव हेयप्रत्यनीक कल्याणैकतानं स्वरूपं प्राप्य 'गुणानां मङ्गलत्वं गुण्यायत्त' मिति वैपरीत्येन प्रमाणतो निर्णीतम्। तादृशं स्वरूपं कीदृश मित्याकाङ्क्षाया माह— अनन्तसुखावबोधरूपं - अनन्तं देशकालवस्तुपरिच्छेदरहितम्। क्वाचित्कता देशपरिच्छेदः। कादाचित्कता कालपरिच्छेदः। असर्वात्मकता वस्तुपरिच्छेदः। सुखं आनन्दः। अवबोधः ज्ञानम्, अनन्तं सुख मवबोध श्च रूपं यस्य तं तथोक्तम्। विमलं हेयप्रत्यनीकं सुन्दरबाहुम् आश्रयामः शरणं भजामः। ''सत्यस्य सत्यम्, ज्योतिषां ज्योतिः'' ''पवित्राणां पवित्रं यो मङ्गलानाञ्च मङ्गलम्'' इत्यादि श्रुतिस्मृति प्रतिपादितं गुण्यायत्तं गुणानां मङ्गलत्वम्। ''सत्यं ज्ञान मनन्तं ब्रह्म'', ''विज्ञान मानन्दं ब्रह्म, अपहतपाप्मा विजरः'' इत्याद्याश्च श्रुचोऽत्रानुसन्धेयाः॥ २२॥

*अतिपतितावधिस्वमहिमानुभव प्रभव*
*त्सुख कृतनिस्तरङ्गजलधीयित नित्य दशम् ।*
*प्रतिभटमेव हेयनिकरस्य सदाऽप्रतिमं*
*हरि मिह सुन्दराह्व मुपयामि वनाद्रि तटे ॥ २३ ॥*

अतीति । भगवतः नित्योदित दशा, शान्तोदितदशाचेति दशाद्वय मस्ति । तयोः प्रथमा स्ववैभवानुभव दशा । इतरातु विभूत्यनुभवदशा । अत्र नित्यदशाविशिष्टतयाऽनुसन्धत्ते । अतिपतितावधिः अतिक्रान्तावधिः निरवधिः, स्वमहिमा स्वकीयवैभवं तस्य अनुभवः, "आत्मानं वासुदेवा ख्यं चिन्तयन्" इत्येवंरूपानुसन्धानात्मकः, तेन प्रभवत् जायमानं यत् सुखं तेन कृता जनिता निस्तरङ्गजलधीयिता निस्तरङ्गजलधिवदाचरिता निस्तरङ्गमहोदधिसदृशीति यावत् । "उपमाना दाचारे" इति क्यच् प्रत्यये विहिते निष्ठान्तं पदम् । तादृशी नित्यदशा यस्य तम् । सदा हेयनिकरस्य अवद्यस्तोमस्य प्रतिभटं तमस स्तेज इव सामानाधिकरण्यासहम् । सदेत्यनेन भगवत्सङ्कल्पायत्तापहतपाप्मत्वादिका नित्यमुक्ता व्यावृत्ताः । अत एव अप्रतिमं सुन्दराह्वं हरिम् , इह वनाद्रितटे उपयामि समाश्रयामि ॥ २३ ॥

*सदा षाड्गुण्याख्यैः पृथुलबलविज्ञान शकन -*
*प्रभावीर्यैश्वर्यै रवधिविधुरै रेधितदशम् ।*
*द्रुम स्तोमक्ष्माभृत्परिसर महोद्यानमुदितं*
*प्रपद्येऽध्यारूढ श्रिय मिम महं सुन्दर भुजम् ॥ २४ ॥*

सदेति । षड्गुणा एव षाड्गुण्यम् । स्वार्थिकष्यञ् प्रत्ययः । चातु राश्रम्य मित्यादिवत् । षाड्गुण्याख्यैः षड्गुणनामकैः अवधिविधुरैः इयत्तारहितैः, पृथुलैश्च तैः बलविज्ञानशकनप्रभावीर्यैश्वर्यैः बलज्ञानशक्तितेजो वीर्यैश्वर्यैः । पृथुलपदेन चेतननिष्ठपरिमित-ज्ञानशक्त्यादयो व्यावर्त्यन्ते । अवधिविधुरै रित्यनेन आनन्दवल्ल्या निष्कृष्ट मानन्द गुणेयत्ता राहित्य मेव स्थाली पुलाकन्यायेन सकलगुणसमुदायस्य

समान मिति सूचितम्। सङ्कर्षणप्रद्युम्ननिरुद्धनिष्ठगुणयुगक्रमेण बलविज्ञाने त्यादि क्रमोक्तिः । एतादृशै र्गुणैः एधितदशं वर्धितावस्थं, अतिशयितस्ववैभव मित्यर्थः । द्रुमस्तोमक्ष्माभृत्परिसर महोद्यान मुदितं वनाद्रिसमीप विपुलोपवने प्रीतिमन्तं तत्र नित्यवासे प्रीतिमन्त मित्यर्थः । तादृशी तदुद्यान भोग्यतेति भावः । अध्यारूढश्रिय मिमं सुन्दरभुजम् अहं प्रपद्ये शरणत्वेन अध्यवस्या मीत्यर्थः ॥ २४ ॥

उक्तषाड्गुण्य परिणाम वितति रूपा स्सौशील्यादयः स्वरूपगुणाः विग्रहगुणा स्सौन्दर्यादयश्च अत्रोच्यन्ते —

**सौशील्याश्रितवत्सलत्व मृदुता सौहार्द साम्यार्जवै -**
**र्धैर्यस्थैर्य सुवीर्यशौर्यकृतितागाम्भीर्यचातुर्यकैः ।**
**सौन्दर्यान्वित सौकुमार्य समतालावण्य मुख्यै र्गुणै-**
**र्देवः श्रीतरुषण्डशैल निलयो नित्यं स्थित स्सुन्दरः ॥ २५ ॥**

सौशील्येति। सौशील्यं महतो मन्दैस्सह नीरन्ध्रेण संश्लेषः, वात्सल्यं दोषानादरहेतुः स्नेहविशेषः मृदुता आश्रितविश्लेषासहत्वम्, सौहार्दम् आश्रितानाश्रितविभागाभावेन सकलहितैषित्वं, साम्यम् अभिजन-विद्यावृत्तानादरेण सर्वसमाश्रयणीत्वम्, आर्जवं करणत्रयस्याप्यैकरूप्यं, धैर्यम् अत्यन्तानिष्ट प्रसङ्गेऽपि अप्रतिहतचित्तवृत्तित्वं स्थैर्यं शरणागतविषये पुरषकारभूतलक्ष्म्या दोषोद्घाटने कृतेऽपि अभग्नप्रतिज्ञत्वं, वीर्यम् अतिदुष्करसमरकरणेऽपि अश्रमत्वं, शौर्यम् असहायस्यापि अतिभयङ्कर परिपन्थिबृन्दनिश्शङ्कप्रवेशशक्तिः, कृता कृतकृत्यता, गाम्भीर्यं दुर्विज्ञेय स्वहृदयत्वं, चातुर्यम् इतरदुश्शक कृत्स्नकार्यनिर्माण कुशलता, सौन्दर्यं दृष्टिचित्तापहारिणी अवयवशोभा, सौकुमार्यं पुष्पाद प्यतिमृदुत्वं, समता सामुद्रिकोक्त समपरिमाणावयवत्वम्, लावण्यं समुदायशोभा, सौशील्यादिभिः स्वरूप गुणैः सौन्दर्यादिभिः दिव्यविग्रहगुणैश्च स्पष्टं स्फुरतीति भावः ॥ २५ ॥

**येष्वेकस्य गुणस्य विप्रुडपि वै लोकोत्तरं स्वाश्रयं**
**कुर्यात्तादृश वैभवै रगणितै र्निस्सीमभूमान्वितैः।**
**नित्यै र्दिव्यगुणै स्ततोऽधिकशुभत्वैकास्पदा त्माश्रयै-**
**रिद्धं सुन्दरबाहु मस्मि शरणं यातो वनाद्रीश्वरम्॥ २६॥**

येष्विति। येषु गुणेषु एकस्य गुणस्य विप्रुडपि बिन्दुरपि "पृषन्ति विन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्" इत्यमरः। स्वाश्रयं स्वाधिकरणं गुणिनं लोकोत्तरं सर्वाधिकं कुर्यात्, तादृशवैभवैः स्वाश्रयस्य लोकोत्तर त्वापादकवैभवविशिष्टैः, अगणितै रसङ्ख्यातैः, निस्सीमभूमान्वितैः अपरिच्छेद्य वैभवयुतैः नित्यैः, ततोऽधिकशुभत्वस्य स्वाश्रयस्य लोकोत्तरत्वापादकत्वरूपशुभत्वादप्यधिक शुभत्वस्य एकास्पदात्माश्रयैः मुख्याधारदिव्यात्म स्वरूपाधारैः "गुणजं गुणिनो हि मङ्गलत्वं प्रमितं प्रत्युत यत्स्वरूप मेत्य" इत्युक्त स्वरूपाश्रितै रित्यर्थः। दिव्यगुणैः ज्ञानशक्तया-दिभिः पूर्वोक्तैः, अनुक्तैश्च दिव्यगुणैः इद्धं समृद्धं वनाद्रीश्वरं सुन्दरबाहुं शरणं यातोऽस्मि। एतादृशकल्याणगुण विशिष्टस्य सुन्दरबाहो र्लोकोत्तरत्वस्य किम्पुनर्न्यायसिद्धत्वा त्स एव शरणवरण विषय इति भावः॥ २६॥

**सदा समस्तं जगदीक्षते हि यः।**
**प्रत्यक्षदृष्ट्या युगपद्भुवा स्वतः।**
**स ईदृशज्ञान निधि र्निधिस्तु न**
**स्सिंहाद्रिकुञ्जेषु चकास्ति सुन्दरः॥ २७॥**

सदेति। यः सदा स्वतो युगपद्भुवा युगपद्भवतीति युगपद्भूः तया, प्रत्यक्षदृष्ट्या प्रत्यक्षज्ञानेन समस्तं जगदीक्षते प्रत्यक्षयति हि। अत्र युगपद्भुवेत्यनेन क्रमेण सर्वसाक्षात्कारक्षमा श्चेतन विशेषा व्यावृत्ताः। स्वत इत्यनेन योगिनो व्यावृत्ताः। सदेत्यनेन मुक्ता व्यावृत्ताः। यद्वा, सदेत्यनेनैव योगिमुक्तव्यावृत्ते स्सिद्धत्वात् स्वत इत्यनेन भगवत्सङ्कल्पायत्तसर्वज्ञाना नित्या व्यावृत्ताः। स्वतो युगपद्भुवेति पदाभ्यां "नयनश्रवणो दृशा शृणोषि"

इत्युक्तप्रकारेण तत्तद्विषयग्रहणं प्रति नियतकरणनियमाभावः, करणानपेक्ष साक्षात्कारश्च गर्भितौ। ततश्च "युगपदनिश मक्षै स्स्वै स्स्वतो वाक्षकार्ये नियम मनियमं वा प्राप्य रङ्गाधिराज। करतलव दशेषं पश्यसि स्वप्रकाशं तदवरण ममोघं ज्ञान माम्नासिषु स्ते" इति श्रीरङ्गराजस्तवोक्तं ज्ञानस्य वक्तव्यं कृत्स्नं सिध्यति। ईदृशज्ञाननिधिः, नः अस्माकं निधिस्तु निधिवत् स्पृहणीयः। स सुन्दरः सिंहाद्रिकुञ्जेषु चकास्ति शोभते। सिंहाद्रि रिति वनाद्रे र्नामान्तरम्॥ २७॥

एवं भगवज्ज्ञानस्य त्रिविधचेतनवैलक्षण्यं प्रदर्श्य ऐश्वर्यादीना मपि पञ्चानां गुणानां जगत्कारणत्वा द्युपयुक्ततया वैलक्षण्यं दिङ्मात्रेण प्रदर्शयति—

**ऐश्वर्यतेजो बलवीर्यशक्तयः**
**कीदृग्विधा स्सुन्दरबाहुसंश्रयाः।**
**योऽसौ जगज्जन्मलयस्थिति क्रिया**
**स्सङ्कल्पतोऽल्पा दुपकल्पयत्यजः॥ २८॥**

ऐश्वर्येति। योऽसौ सुन्दरबाहुः अल्पात्सङ्कल्पतः अन्यपरादपि सङ्कल्पा दित्यर्थः। जगतः जन्मलयस्थिति क्रियाः सृष्टिसंहाररक्षणप्रवृत्तयः। प्रवृत्ति रिति निवृत्तेरप्युपलक्षणम्। उपकल्पयति कलयति। सुन्दरबाहुसंश्रयाः सुन्दरबाहुनिष्ठाः ऐश्वर्यतेजोबलवीर्यशक्तयः कीदृग्विधाः अनीदृशाः अपरिच्छेद्य वैभवा इत्यर्थः। सकलजगत्सृष्टि स्थिति प्रवृत्तिसंहाराः यत्सङ्कल्पलवात् प्रवर्तन्ते तादृशसङ्कल्प सुन्दरबाहु समाश्रिता ऐश्वर्याद्याः अपरिच्छेद्य वैभवा इति भावः॥ २८॥

**य त्कल्पायुत भोगतोऽपि कृशतां यायान्न तावत्फलं**
**ये ष्वेकस्य तथाविधै स्सततजै रंहोभि रुत्सीमभिः।**
**अस्तादा विह संसृता वुपचितै श्छन्नं सुसन्नं जनं**
**सन्नत्या क्षमते क्षणा द्वनगिरि प्रस्थप्रिय स्सुन्दरः॥ २९॥**

यदिति । यत् अंहः फलं कल्पायुतभोगतोऽपि दशसहस्र-कल्पानुभवा दपि कृशतां कार्श्यम्, ईषदपि याया द्वा न वा, अल्पं क्षयमपि न गच्छे दिति निर्णयः तावत्फलं ये ष्वंहस्सु एकस्य अंहसः सम्बन्धी, तथाविधैः तादृशैः कल्पायुतभोगतोऽपि प्रत्येक मक्षय्यफलै रित्यर्थः । सततजैः निरन्तरानुष्ठितैः उत्सीमभिः असंख्यातैः इयत्तारहितै र्वा, अस्तः निरस्तः आदि र्यस्यास्सा, तस्यां संसृतौ अनादिसंसारे, इह कर्मभूमौ उपचितैर्वर्धितैः, अंहोभिः पापैः छन्नं तिरोहितं दुर्विवेचात्मस्वरूपं, अत एव सुसन्नं सुतरा मवसादं प्राप्तं जनं जन्मगुणादि तारतम्यापर्यालोचनया यं कञ्चित् सन्नत्या प्रणाममात्रेण क्षणात् तदानी मेव, वनगिरिप्रस्थप्रियः, "स्नुःप्रस्थ स्सानु रस्त्रियाम्" इत्यमरः । वनाद्रिसानुवासे प्रीतिमान् नित्यप्रियः सुन्दरः क्षमते। "स तं निपतितं भूमौ" इत्यत्र भूमौ निपतित मेव शरणागत इति मत्वा अत्यन्तापराधिन मपि काकं यथा क्षान्तिपूर्वकं ररक्ष, तथा रक्षतीत्यर्थः ॥ २९ ॥

*यज्जातीयो यादृशो यत्स्वभावः*
*पादच्छायां संश्रितो योऽपि कोऽपि ।*
*तज्जातीय स्तादृश स्तत्स्वभावः*
*श्लिष्यत्येनं सुन्दरो वत्सलत्वात् ॥ ३० ॥*

यदिति। यज्जातीयः देवमनुष्यादिजातिषु यादृशजातीयः, यादृशः यादृशाचारः, यत्स्वभावः यादृशज्ञानमयो योऽपि कोऽपि अभिजन-विद्यावृत्ततारतम्यं नापेक्षित मिति भावः । पादच्छायां संश्रितो भवति, पादसन्निधान समाश्रयणमात्रं पर्याप्त मिति भावः । एनं जनं सुन्दरः वत्सलत्वात्, वत्सं लालयतीति वत्सल इति निर्वचनानुगुण्येन - "दोषो यद्यपि तस्य स्या त्सता मेत दगर्हितम्" इति सदोषेष्वपि समाश्रितेषु प्रीतिमत्वात् तज्जातीय स्तादृश स्तत्स्वभाव स्सन् "अहं वो बान्धवो जातः", "आत्मानं मानुषं मन्ये रामं दशरथात्मजम्" इत्युक्त प्रकारेण

तत्तदाश्रितानुगुणाभिजात्य विद्यावृत्तादि विशिष्ट स्सन् । श्लिष्यति तत्संश्लेषैक भोगो भवतीत्यर्थः । पूर्वस्मिन् श्लोके अपराधसहिष्णुता क्षान्तिरिति पर्यवसितम् । अस्मिन् श्लोके दोषेष्वपि भोग्यताबुद्धिर्वात्सल्य मिति पर्यवसितम् ॥ ३० ॥

महतो मन्दैस्सह नीरन्ध्रेण संश्लेशरूपं सौशील्यमपि सुन्दरभुजोऽत्यन्ता सदृशमिति, मन्दस्य मम स एव शरण मित्यनुसन्धत्ते—

*निहीनो जात्या वा भृश मकुशलै र्वा स्वचरितैः*
*पुमान्वै यः कश्चि द्बहुतृण मपि स्या दगुणतः ।*
*भजन्तं तं पश्येद्भुजगपतिना तुल्य मपि यो*
*वनाद्रिप्रस्थस्थ स्स मम शरणं सुन्दरभुजः ॥ ३१ ॥*

निहीन इति । भृशं जात्या वा निहीनः अकुशलै रशुभैः स्वचरितै र्वा निहीनः यः कश्चित्पुमान् नामग्रहणायोग्योऽपि अगुणतोऽपि निहीनः । जातिवृत्तहान्योः पूर्वमुक्तत्वात् तृणदृष्टान्ताच्च पारिशेष्यात् चैतन्यहीनोऽपीत्यर्थः । सार्वविभक्तिक स्तसिः । बहुतृणं वै स्यात्, ईषदसमाप्तं तृण मेव स्यात् । अल्पौपम्यार्थे बहुच्प्रत्ययः । पूर्ववृत्ते एतादृशेऽपि , भजन्तं तं "मा मेकं शरणं व्रज" इत्युक्त प्रकारेण शरणं व्रजन्तं तं पुमांसं यः भुजगपतिनाऽपि 'निवासशय्यासन पादुकांशुके.." त्यारभ्य यथोचितं शेषइतीरिते जनै" रिति शेषत्व सीमाभूमितयोक्त-शेषेणाऽपि तुल्यं पश्येत् । 'त्व मस्माकं चतुर्णां वै भ्राता सुग्रीव, पञ्चमः" इति शेषावतारतया प्रतीतलक्ष्मणतुल्ययोगत्वेन सुग्रीवानुग्रहोऽत्राभिप्रेतः। सुग्रीवेच "वानराणां नाराणाञ्च कथ मासीत्समागमः" इति शङ्कनीयं शाखामृगजातीयत्वं भ्रातृभार्यागमन वृत्तहानिः तद्धेतुभूता ज्ञानञ्च द्रष्टव्यम् । वनाद्रि पस्थस्थः वनगिरिसानुवासी सः सुन्दरभुजः मम शरणं भवत्विति शेषः ॥ ३१ ॥

**एकैकमङ्गलगुणानुभवाभिनन्द -**
**मीदृक्त्वया निति च सुन्दरदोष्णि कृष्णे**
**ते ये शत न्त्विति नियन्तुमनाः श्रुति र्है**
**नैवैष वाङ्मनस गोचर इत्युदाह ॥ ३२ ॥**

एकैकेति। अभिनन्द आनन्दः, एव मसङ्ख्येय कल्याणगुण विशिष्टे सुन्दरदोष्णि सुन्दरभुजे कृष्णे एकैकमङ्गलगुणानुभवज मभिनन्दं, इदृगेवम्प्रकार एव, इयान् इयत्परिमाण इति च नियन्तुमनाः परिच्छेत्तुं प्रवृत्तचित्ता ते ये शत'' मिति श्रुति स्तु, एषः एकैकमङ्गल गुणानुभवानन्दः वाङ्मनसगोचरो नैवेत्युदाह - उदाह उच्चै र्वदति , सर्वजनश्रवणार्ह माहेत्यर्थः। है आश्चर्ये । ''सैषाऽऽनन्दस्य मीमांसा भवति - युवास्यात्साधुयुवाऽध्यायकः आशिष्ठो द्रढिष्ठो बलिष्ठः तस्ये यं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् - स एको मानुष आनन्दः - ते ये शतं मानुषा आनन्दाः- स एको मनुष्यगन्धर्वाणा मानन्दः - श्रोत्रियस्य चाऽकाम हतस्य ते ये शतं मनुष्यगन्धर्वाणा मानन्दाः'' - इत्युक्तक्रमेण देवगन्धर्व पितृ चिर लोक लोक देवाजानजदेव कर्मदेवेन्द्र बृहस्पति पर्यन्तमभिधाय, ''ते ये शतं प्रजापते रानन्दाः - स एको ब्रह्मण आनन्दः'' - इत्यनन्तरं ते ये शतं ब्रह्मण आनन्दाः इत्यनभिधाय ''यतो वाचो निवर्तन्ते - आप्राप्य मनसा सह - आनन्दं ब्रह्मणो विद्वान्'' इति श्रुतौ ''स एको ब्रह्मण आनन्दः'' इत्येकशब्द प्रयोगा देकैक गुणानुभवजनितानन्द एवाऽ परिच्छिन्न इति, श्रुते र्हृदय मिति भावः ॥ ३२ ॥

*अब्जपाद मरविन्दलोचनं*
*पद्मपाणितल मञ्जनप्रभम् ।*
*सुन्दरोरुभुज मिन्दिरापतिं*
*वन्दिषीय वरदं वनाद्रिगम् ॥ ३३ ॥*

अब्जेति । अब्ज मिव पादो यस्य तम् । एव मरविन्दलोचनं

पद्मपाणितलम् अञ्जनस्य प्रभेव प्रभा यस्य तम् वनाद्रिगम् वरदं, वनाद्रिवास एव वरदतायां हेतुरिति भावः । सुन्दराः उरवः पीना आयताश्च बाहवो यस्य तम्, इन्दिरापतिं वन्दिषीय वन्दनविषयं कुर्याम्, अत्यन्त भोग्यविग्रहो वनाद्रिनाथ एव वरप्रेप्सुभि रुपास्य इतिभावः ॥ ३३ ॥

दिव्यविग्रहलावण्य मेव वर्णयति -

*कनक मरतकाञ्जन द्रवाणा*
*मथन समुत्थित सारमेलनोत्थम् ।*
*जयति किमपि रूप मस्य तेजो*
*वनगिरि नन्दन सुन्दरोरुबाहोः ॥ ३४ ॥*

कनकेति । अस्य वनगिरिनन्दन सुन्दरोरुबाहोः, वनगिरिशब्देन वनगिरिवासिनो जनाः उच्यन्ते, मञ्चाः क्रोशन्तीतिवत् । नन्दनः आनन्दकरः वनगिरिनन्दनश्चाऽसौ सुन्दरोरुबाहु श्चेति विग्रहः । कनक मरतकाञ्जनद्रवाणा मित्यत्र द्वन्द्वान्ते श्रूयमाण श्शब्दः प्रत्येक मभिसम्बध्यते इतिन्यायात् द्रवशब्द स्सर्वत्राऽन्वेति । प्रत्येक भिन्नरुचिवर्णानां मथनेन समुत्थित स्समुत्पन्नो य स्सार स्सारांशः तस्य मेलनेन मिश्रीभावेन उत्थ मुत्पन्नं, किमपि अनिर्वचनीयं रूपं यस्य तत् किमपि रूपम् । किमपीत्यव्ययम्, 'अनव्यय मव्ययेने' त्यनुशासनात् किमपिरूप मित्ये कं पदम् । तेजः शोभा जयति । सर्वोत्कर्षेण वर्तते । कनकद्रवं मरतक द्रवं, अञ्जनद्रव ञ्च प्रत्येकं स्थालीषु निधाय मथने कृते सति दधिमथने कृते तत्सारभूतनवनीत वत्समुत्थित तत्तत्सारांशानां त्रयाणां मेलने कृते सति मिलित सारांशत्रयस्य रूपं पीतहरितनीलवर्णेषु इद मिति यथा परिच्छिद्य ज्ञातु मशक्यं भवति, तथा सुन्दरबाहुदिव्यविग्रह समुदाय शोभापि एवंरूपेति परिच्छिद्य ज्ञातु मशक्या सती सर्वोत्तरा भवतीत्यर्थः ॥ ३४ ॥

*किन्नुस्वयं स्वात्मविभूषणं भव -*
*न्नसावलङ्कार इतीरितो जनैः ।*

*वर्धिष्णुबालद्रुमषण्डमण्डितं*
*वनाचलं वा परितः प्रसाधयन् ॥ ३५ ॥*

किन्विति। असौ सुन्दरबाहुः स्वयं स्वात्मविभूषणं भवन् स्वयमेव स्वदिव्यविग्रहालङ्कार स्सन्, जनैः दिव्यविग्रहं प्रत्यक्षयदखिलजनैः अलङ्कार इतीरितः किन्नु? वर्धिष्णुना वृद्धिशीलेन प्रत्यह मभिवृद्धिभाजाबाल द्रुमषण्डेन तरुणतरुषण्डेन मण्डित मलङ्कृतं वनाचलं वा परितः प्रसाधयन् अलङ्कुर्वन्वा अलङ्कार इतिरितः किन्नु? अलङ्कार इति सुन्दरबाहो र्नामान्तरम्। स्वस्यैव भूषणनिरपेक्षं स्वविग्रहालङ्कारत्वेन वा, वनाचलालङ्कारत्वेन वेति द्वेधोत्प्रेक्ष्यते ॥ ३५ ॥

*सुखस्पर्शै र्नित्यैः कुसुमसुकुमाराङ्ग सुखदै -*
*स्सुसौगन्ध्यै र्दिव्याभरणगण दिव्यायुधगणैः ।*
*अलङ्कार्यै स्सर्वै र्निगदित मलङ्कार इति य -*
*स्समाख्यानं धत्ते स वनगिरिनाथोऽस्तु शरणम् ॥ ३६ ॥*

सुखेति। सुखः सुखकरः स्पर्शो येषां तैः अतिसुकुमारै रित्यर्थः। सुसौगन्ध्यैः शोभन सौरभैः । अत एव कुसुमवत्सुकुमाराणां अङ्गाना मुत्तमाङ्गादिपादारविन्दपर्यन्तानां दिव्यावयवानां सुखदैः मालतीमाला सदृशै रित्यर्थः। नित्यैः भगवद्विग्रहव त्स्वयमपि नित्यैः दिव्याभरणगण दिव्यायुधगणैः सर्वै रलङ्कार्यैः किरीटमकुटादि दिव्याभरणगणरूपैः सुदर्शनपाञ्चजन्यादि दिव्यायुधगणैश्च स्वकीयदिव्यमङ्गलविग्रहेणालङ्कारार्है स्सर्वैरित्यर्थः। एतादृशै रेतै र्निगदितं निरुक्तम् अलङ्कार इति समाख्यानं नामधेयं धत्ते, स वनगिरिनाथः शरणमस्तु। श्रीविष्णुपुराणे सकलतत्त्वानां अस्त्रभूषणत्व मुक्त मस्त्रभूषणाध्याये। "सर्वज्ञा स्मुचितशक्तय स्सदैव त्वत्सेवानियमजुष स्त्वदेकभोगाः । हेतीना मधिपतय स्सदा किमेतान् शोभार्थं वरद बिभर्षि हर्षतो वा" इति वरदराजस्तवोक्तरीत्या सुदर्शनादीना मपि भूषणत्वं सर्वपूर्वाचार्य सम्मतम् । अतस्स्वविग्रहालङ्कारतया प्रतीताना

माभरणाना मायुधाना मपि अतिशयाधायकतया विविधशोभासमग्र-स्वविग्रहतः एतेषामलङ्कार्यत्वं, स्वस्य अलङ्कारत्वञ्च सिध्यतीति भावः॥ ३६॥

"दिव्याभरणगण दिव्यायुधगणै" रित्युक्तवर्गद्वयस्याऽप्याभरणत्वं श्लोकद्वयेनाऽऽह—

*मकुट मकुट मालोत्तंस चूडाललाम -*
*स्वलकतिलकमालाकुण्डलै स्सोर्ध्वपुण्ड्रैः।*
*मणिवरवनमाला हारकेयुरकण्ठ्यै -*
*स्तुलसि कटककाञ्ची नूपुराद्यैश्च भूषैः॥ ३७॥*

*असिजलजरथाङ्गै श्शार्ङ्गकौमोदकीभ्या -*
*मगणित गुणजालै रायुधैर प्यथाऽन्यैः।*
*सततविततशोभं पद्मनाभं वनाद्रे -*
*रुपवन सुखलीलं सुन्दरं वन्दिषीय॥ ३८॥*

मकटेति। [1]कुलकमिदम्। मकुटं किरीटम्, मकुटमाला किरीटवेष्टनरत्नमाला, पुष्पमाला वा। उत्तंसः किरीटशिरोरत्नं, प्रशस्ताचूडा चूडाललाम, शोभना अलका स्स्वलकाः। " अलका श्चूर्णकुन्तलाः " इत्यमरः। तिलकानां माला तिलकमाला, मौक्तिकनद्धाग्राणां सौवर्णतिलकानां ललाटालङ्कारभूतानां माला, कुण्डलं कर्णाभरणम्। मकुट ञ्च मकुटमाला च इत्यादि द्वन्द्व समासः। सोर्ध्वपुण्ड्रैः ऊर्ध्वपुण्ड्रसहितैः। मणिवरः कौस्तुभः कण्ठ्यं कण्ठाभरण विशेषः। कटकं हस्ताभरणम्। भूषैः भूषणैः। भूषाशब्दस्य [2]नपुंसकत्वं (पुंस्त्वम्) व्याकरण निपुणविचार णीयम्। असिजलजरथाङ्गैः खड्गशङ्खचक्रैः नन्दकपाञ्चजन्यसुदर्शनैः, अगणित गुणजालैः, असङ्ख्यात गुणगणैः सर्वज्ञत्व सर्वशक्तित्वाद्यनन्त गुणगणै रित्यर्थः। अगणित गुणजालपदं विभक्ति विपरिणामेनाऽस्याऽपि विशेषणमिति बोध्यम्। शार्ङ्गकौमदकीभ्यां धनुर्वरगदावराभ्याम् अन्यैः

1. युग्मकमित्यर्थः। 2. घञन्तत्वात् पुंस्त्वम्। स्तोत्रार्णवाधो ज्ञापिका।

हलमुसलपरशुप्रभृतिभिः आयुधैश्च सततं विततशोभं निरन्तरं संवर्धित सौन्दर्यं वनाद्रे रुपवने उद्याने, सुखा सुखकरी लीला यस्य तं तथोक्तं, सुन्दरं पद्मनाभं भगवन्तं वन्दिषीय वन्दनविषयं कुर्याम्, दिव्याभरणवत् दिव्यायुधधारणमपि तत्तद्दिव्यावयवातिशयाधायक मिति भावः ॥ ३७,३८॥

इतःपरं केशादिपादपर्यन्तान् सुन्दरबाहु दिव्यावयवान् एकत्रिंशता श्लोकै र्वर्णयति —

*आजानजस्वगत बन्धुरगन्थ लुब्ध -*
*भ्राम्यद्विदग्धमधुपालि सदेशकेशाम् ।*
*विश्वाधिराज्य परिबर्ह किरीट राजं*
*है! सुन्दरस्य बत ! सुन्दरमुत्तमाङ्गम् ॥ ३९ ॥*

आजानेति । आजानजः आजन्मजः सहजः स्वगतः केशगतः बन्धुरस्सान्द्रः समृद्धो वा यो गन्धः तस्मिन् लुब्धाः वाञ्छावन्तः अतएव भ्राम्यन्तः भ्रमणशीलाः विदग्धा रसिकाश्च ये मधुपाः मधुकराः तेषा माल्या पङ्क्त्या सदेशकेशं समानकेशं सदृशकेशपाश मित्यर्थः । विश्वाधिराज्यस्य सर्वेश्वरत्वस्य परिबर्हः परिकरः किरीटराजो मकुट श्रेष्ठो यस्य तम्, उभयविभूति निर्वाहकत्वलक्षणाति विलक्षण किरीट मित्यर्थः । सुन्दर स्योत्तमाङ्गं सुन्दरम् । है ! आश्चर्ये; उत्तमाङ्ग सौन्दर्यवर्णन मशक्य मिति भावः ॥ ३९ ॥

*अन्धं तम स्तिमिरनिर्मित मेव य त्स्या -*
*त्तत्सारसाधित सुतन्त्वति वृत्तवार्तम् ।*
*ईशस्य केशवगिरे रलकालिजालं*
*तत्तुल्यकुल्य मधुपाढ्यमहावनस्य ॥ ४० ॥*

अन्ध मिति । तत्तुल्यकुल्यमधुपाढ्यमहावनस्य - तच्छब्दः अलकजालं परामृशति । तेन अलकजालेन तुल्यकुल्याः सदृशवंश्याः तुल्याकारा ये मधुपाः मधुकराः तै राढ्यं सम्पन्नं महावनं महत् विस्तृतं

वनं यस्मिं स्तस्य, सुन्दर बाहुचूर्णकुन्तलपङ्क्तिसदृश सुषम मधुकर प्रचुर विपुलविपिनस्येत्यर्थः । केशवगिरेः वनाद्रेः केशव इति सुन्दरबाहो र्नामान्तरं, तत्सम्बन्धी गिरिः केशवगिरिः तस्य ईशस्य नाथस्य सुन्दरबाहोः अलकालिजालं अलिसदृशालकनिकरः, यत् अन्धं तमः गाढोऽन्धकारः, तिमिरनिर्मित मेव स्यात् तिमिरोपादान कारण कमेव भूयात् । तत्सारेण तिमिरनिर्मितान्धतम स्सारांशेन साधिता निर्मिताः ये सुतन्तवः ता न प्यतिवृत्ता अतिक्रान्ता वार्ता वृत्तान्तो यस्य तत् । तत्सार साधित सुतन्त्वतिवृत्त वार्तं, भवतीति शेषः । कविभिः स्वभावत एव अन्धकार समानाकारा अलका इति उपमानोपादानेऽपि तमोनिर्मित गाढान्धकार सारांशसन्तन्यमानसुतन्तुवृत्तान्तातिक्रान्तिमन्त स्सुन्दर बाहुचूर्ण कुन्तला इत्युक्तेः तदलका अतीव काला इति भावः ॥ ४० ॥

*जुष्टाष्टमीकज्वल दिन्दु सन्निभं*
*धृतोर्ध्वपुण्ड्रं विलस द्विशेषकम् ।*
*भूम्ना ललाटं विमलं विराजते*
*वनाद्रिनाथस्य समुच्छ्रितश्रियः ॥ ४१ ॥*

जुष्टेति । समुच्छ्रितश्रियः आरूढश्रियः वनाद्रिनाथस्य जुष्टा सेविता अष्टमी तिथि र्येन सः जुष्टाष्टमीकः ज्वलन् प्रकाशमानश्च यः इन्दुः तस्य सन्निभम्, अमन्दप्रकाशार्ध चन्द्रसदृश मित्यर्थः । धृतोर्ध्वपुण्ड्रं विलसन् प्रकाशमानो विशेषकः श्री चूर्णतिलकः कस्तूरिका वा यस्मिन् तत् विमलं ललाटं अलिकं भूम्ना तेजसा विराजते अतिशयेन प्रकाशते इत्यर्थः ॥ ४१ ॥

*सुचारुचापद्वय विभ्रमं भ्रुवो -*
*र्युगं सुनेत्राह्व सहस्रपत्रयोः ।*
*उपान्तगं वा मधुपावली युगं*
*विरजते सुन्दरबाहु संश्रयम् ॥ ४२ ॥*

सुचार्विति । सुन्दरबाहु स्संश्रयः आश्रयो यस्य तत्सुन्दर बुाहुसंश्रयं

सुन्दरबाहु सम्बन्धीत्यर्थः। सुचारु चाप द्वय विभ्रमं अति सुन्दरधनुर्द्वन्द्वस्य विलास इव विलासो यस्य तत्तथोक्तम्। भ्रुवो र्युगं सुनेत्राद्वे शोभननेत्राभिधाने ये सहस्रपत्रे कमले तयोः उपान्तगं समीपगामि मधुपावलीयुगं वा भृङ्गपङ्क्तिद्वन्द्व मिव विराजते। इवार्थो वा शब्दः। "यद्वा (व वा) यथा तथैवैवं साम्ये" इत्यमरः। नेत्रयो स्सहस्रपत्रभान्त्या प्रान्तगतभृङ्गपङ्क्तिद्वन्द्व मिव सुन्दरबाहु भ्रूयुगं शोभते इत्यर्थः॥ ४२॥

*अदीर्घ मप्रेमदुघं क्षणोज्ज्वलं*
*नचोर मन्तःकरणस्य पश्यताम्।*
*अनुब्ज मब्जं नु कथं निदर्शनं*
*वनाद्रिनाथस्य विशालयो र्दृशोः॥ ४३॥*

अदीर्घमिति। अदीर्घं वर्तुलम्, अप्रेमदुघं प्रेम स्नेहं दोग्धि पूरयति, क्षरतीति वा प्रेमदुघं,तन्नभवती त्यप्रेमदुघम्। "दुहः कप् घश्च' इति कप्प्रत्ययः। क्षणोज्ज्वलं क्रमेण ग्लानिभागित्यर्थः। पश्यता मन्तःकरणस्य नचोर ममनोहरम्, अनुब्जम्, उब्ज आर्जवे आर्जवरहितम्, चन्द्रोदयासह विकासत्वा दिति भावः। एव म्भूत मब्जं वनाद्रिनाथस्य विशालयो र्दृशोः कथं नु निदर्शनम्? न कथञ्चिदपीत्यर्थः। अदीर्घमित्यादिविशेषणविशिष्टं अब्जं कर्णान्तविश्रान्तयोः, आश्रितविषय प्रणयक्षरणशीलयोः एकरूपविकासयोः पश्यता मतिमनोहरयोः अव्याजेन सर्वजन सन्तोष प्रदयोः सुन्दरबाहुदृशोः न दृष्टान्तभूत मित्यर्थः॥ ४३॥

*प्रश्च्योत त्प्रेमसारामृतरस चुलुकप्रक्रम प्रक्रियाभ्यां*
*विक्षिप्तालोकितोर्मिप्रसरणमुषित स्वान्त कान्ता जनाभ्याम्।*
*विश्वोत्पत्तिप्रवृत्ति स्थितिलयकरणौ कान्तशान्तक्रियाभ्यां*
*देवोऽलङ्कारनामा वनगिरिनिलयो वीक्षता मीक्षणाभ्याम्॥ ४४॥*

प्रश्च्योत दिति। वनगिरिनिलयः, अलङ्कार नामा देवः प्रश्च्योतन् प्रकर्षेण क्षरन् प्रेमसारः सारभूत स्नेहः, स एवामृतरसः ययोः, तौ च तौ

चुलुकौ च प्रश्च्योतत्प्रेमसारामृत रस चुलुकौ तयोः प्रक्रमः प्रकारः इव प्रक्रिया प्रकारो ययो स्ताभ्याम्। चुलुकः प्रसृतिः एककरोदरपरिमाणम्। चुलुकदृष्टान्तोक्तिः मन्दं मन्द मनुभव सौकर्याय। अमृतरसपरिपूर्ण प्रसृति सदृशता प्रेमरसनिष्यन्दिसुन्दरबाहुलोचनयोः फलिता। विक्षिप्तानि विशेषेण प्रेरितानि आलोकितानि विलोकनान्येव ऊर्मय स्त रङ्गा स्तेषां प्रसरणेन सञ्चारेण मुषितस्वान्तः अपहृतहृदयः कान्ताजनः सुन्दरी समूहो याभ्यां ताभ्यां युवतिजनमनोविलास शालि विलोकिताभ्या मित्यर्थः। विश्वस्य कृत्स्नस्य चेतनाचेतनसमुदायस्य उत्पत्तिप्रवृत्तिस्थितिलयानां करणे विधाने एकान्तशान्ता नितान्त मव्यग्रा क्रियाव्यापारो ययो स्ताभ्यां तथोक्ताभ्यां, सकलजगत्सृष्टिस्थितिप्रलयविधानेऽप्यनत्यन्त प्रवृत्तिकाभ्यामित्यर्थः। ईक्षणाभ्यां वीक्षताम्। अनन्यलक्ष्य समग्रानुग्रह कटाक्षलक्ष्यं करो त्वित्यर्थः ॥ ४४ ॥

*प्रेमामृतौघ परिवाहिमहाक्षिसिन्धु -*
*मध्ये प्रबद्ध समुदञ्चित सेतुकल्पा।*
*ऋज्वी सुसुन्दरभुजस्य विभाति नासा*
*कल्पद्रुमाङ्कुर निभा वनशैलभर्तुः ॥ ४५ ॥*

प्रेमेति। वनशैलभर्तुः सुसुन्दरभुजस्य ऋज्वी निरन्तरानुभवेऽपि अभिनवी भवदेकरूपशोभेत्यर्थः। कल्पद्रुमाङ्कुरनिभा कल्पतरुपल्लवतुल्या नासा प्रेमैवाऽमृतौघः तं परिवहति प्रवहतीति प्रेमामृतौघपरिवाहि महच्च यदक्षि चक्षुः तदेव सिन्धुः समुद्रः तस्य मध्ये प्रबद्ध स्समुदञ्चितः अत्यन्तसम्भावितश्चय[1]स्सेतु स्तेन कल्पा तुल्या भवति। अक्ष्ण स्सुन्धित्वनिरूपणा देकवचनेनैव अक्षिद्वयस्य क्रोडीकारः, इतरथा मध्यशब्द विरोधश्च। सुन्दरबाहो रक्षिशोभानु भवाया वतीर्णानां तत्रत्य

1. यः ईषदसमाप्तः सेतुः सेतुकल्पा, सेतुतुल्या भवति - इत्युचितम्।

प्रेमरस मज्जनेन अवयवान्तर शोभानु भव गमनाशक्तानाम् अनुभवितृचक्षुषां नासा सेतु रिव पारगमन साधन मित्यभिप्रायः ॥ ४५ ॥

*व्याभाषिताभ्यधिक नन्दन भन्दनर्धि*
*मन्दस्मितामृतपरिस्रवसंस्तवाढ्यम् ।*
*आभाति विद्रुम समाधर मास्य मस्य*
*देवस्य सुन्दरभुजस्य वनाद्रिभर्तुः ॥ ४६ ॥*

व्याभाषितेति। वनाद्रिभर्तुः सुन्दरभुजस्य अस्य देवस्य व्याभाषिते व्याभाषणे अभ्यधिकनन्दना अत्यन्तानन्दकरी भन्दना शुभा च ऋद्धिः समृद्धिः यस्य तत्तथोक्तम्, यत् मन्दस्मितं तदेवामृतपरिस्रवः अमृतनिष्यन्दः तस्य संस्तवेन परिचयेन आढ्यं सम्पन्नम् । भदि कल्याणे इति धातुः ॥ "स्मितपूर्वाभिभाषिणम्" इत्युक्तरीत्या आभाषणकालीना-त्यन्तानन्द कल्याण स्वोन्मेष मन्द स्मितामृत निष्यन्द परिचयोपचितशोभ मित्यर्थः। आभाषणकालीनात्यन्तभोग्य मन्दस्मित सम्पन्न मिति यावत् । विद्रुमसदृशाधरं प्रवालसदृशाधरम् आस्यं मुखं विभाति; आभाषण कालीनातिपाटलाधरासङ्गिमन्दस्मित मास्यशोभाहेतु रिति भावः ॥ ४६ ॥

*यशोदाङ्गुल्य ग्रोन्नमित चुबुकाघ्राणमुदितौ*
*कपोला वद्याऽपि ह्यनुपरतत द्धर्षगमकौ ।*
*विराजेते विष्वग्वितत सहकारासवरस*
*प्रमाद्य द्भृङ्गाढ्य द्रुमवनगिरे स्सुन्दरहरेः ॥ ४७ ॥*

यशोदेति । विष्व ग्विततानां सर्वतोविस्तृतानां सहकारवृक्षाणां आसवरसेन मत्तभ्रमर सम्पूर्ण द्रुमः वनगिरि र्यस्य तस्य सुन्दरहरेः सुन्दराख्यस्य भगवतः यशोदाङ्गुल्यग्रेण उन्नमित मुन्नतीकृतं यच्चुबुक मधराधःप्रदेशः तस्य आघ्राणेन मुदितौ स्फीतौ । यशोदया वात्सल्यातिशयेन कृष्णचुबुकं स्वाङ्गुल्यग्रेण उन्नमय्य आघ्राणे कृते सति कपोलयोः कश्चि द्विकासो जात इत्यर्थः । अद्याऽपि कालविप्रकर्षेऽपि

सुन्दरबाहुतयाऽवतारेऽपि अनुपरत तद्धर्षगमकौ अनुवर्तमान तदानीन्तन प्रफुल्लता सूचकौ तथैव विकसितौ कपोलौ विराजेते हि। हि शब्द प्रयोगात् अयं कपोलयो र्विकासः सुन्दरबाहुसेवा समागत सर्वजनानुभाव्य इत्यर्थः॥ ४७॥

*व्यालम्बिकुण्डलमुदग्रसुवर्णपुष्प*
*निष्पन्नकल्पलतिका यमलानुकारम्।*
*यत्कर्णपाशयुगलं निगलं धियां न-*
*स्सोऽयं सुसुन्दरभुजो वनशैलभूषा॥ ४८॥*

व्यालम्बीति। व्यालम्बिकुण्डल मंसप्रान्त प्रलम्बि स्वर्णकुण्डलम्। "कुण्डलं कर्णवेष्टनम्" इत्यमरः॥ अत एव उदग्रसुवर्णपुष्पनिष्पन्नस्य उच्छ्रितच्छविचामीकरकुसुमसम्पन्नस्य कल्पलतिका यमलस्य कल्पलतायुगलस्य अनुकारः सारूप्यं यस्य त त्तथोक्तं य त्कर्णपाशयुगलं नः अस्माकं धियां मतीनां निगलं भवति अतिसुन्दरत्वात् दिव्याव-यवान्तरानुभवगमनप्रतिबन्धकं विषयान्तर सञ्चारनिरोधकं वा भवतीत्यर्थः। सोऽयं सुन्दरभुजः वनशैलभूषा वनशैल मलङ्करोतीत्यर्थः॥ ४८॥

*सदंससंसञ्जित कुन्तलान्तिका -*
*ऽवतीर्णकर्णाभरणाढ्यकन्धरः।*
*सुबन्धुर स्कन्ध निबन्धनो युवा*
*सुसुन्दर स्सुन्दरदो र्विजृम्भते॥ ४९॥*

सदंसेति। सन्तौ सुन्दरौ या वंसौ भुजशिरसी, तयो स्संसञ्जितानां संसक्तानां कुन्तलानां चूर्णकुन्तलानां अन्तिके समीपे अवतीर्णेन प्रलम्बमानेन कर्णाभरणेन आढ्या सम्पन्ना शोभिता कन्धरा ग्रीवा यस्य स तथोक्तः, असांनुषक्तचूर्णकुन्तलपर्यन्तप्रलम्बिकुण्डलमण्डितकन्धर इत्यर्थः। सुबन्धुरं सुदृढं स्कन्धस्य कण्ठापरभागस्य निबन्धनं सन्धिबन्धो यस्य स तथोक्तः। युवा - अनेन बाल्य यौवन सन्धि र्लक्ष्यते - "युवा कुमार" इत्यभिधानात्। सुन्दरदोः - सुन्दरौ दोषौ यस्येति विग्रहः, सुन्दरबाहुः, सुसुन्दरो विजृम्भते, अत्यन्त सुन्दरत्वेन भुवने प्रथितो भवतीत्यर्थः॥ ४९॥

*व्यूढगूढभूज जत्रु मुल्लस -*
*त्कम्बुकन्धरधरं धराधरम् ।*
*वृक्षषण्डमयभूभृत स्तटे*
*सुन्दरायत भुजं भजामहे ।। ५० ।।*

व्यूढेति । व्यूढे भारसहे गूढे मांसलतया तिरोहिते च भुजजत्रुणी भुजशिर स्सन्धिबन्धास्थिविशेषौ यस्य तं तथोक्तम् । उल्लसन् कान्तः कम्बुश्शङ्खस्स इव कन्धरा ग्रीवा यस्य सः उल्लसत्कम्बुकन्धरः, धरः निर्वाहकः, उल्लसत्कम्बुकन्धरश्चाऽसौ धरश्चेति विग्रहः; इतरथा कन्धर-शब्दस्य स्त्रीलिङ्गत्वविरोधः । वृक्षषण्डमयभूभृतः वन प्रचुरगिरेः; प्राचुर्यार्थे मयट् प्रत्ययः वनाद्रे रित्यर्थः । तटे पर्यन्तप्रदेशे धराधरं क्षमारक्षकं सुन्दरायतभुजं भजामहे । सर्वनिर्वाहकत्वेऽपि सौलभ्येनाऽस्मादृश-संरक्षणाय वनगिरिनिवासिनं सेवामहे इति भावः ।। ५० ।।

*मन्दरभ्रमण विभ्रमोद्भटा -*
*स्सुन्दरस्य विलसन्ति बाहवः*
*इन्दिरासमभिनन्द भन्दना -*
*श्चन्दनागरु विलेपभूषिताः ।। ५१ ।।*

मन्देरेति । मन्दरस्य मन्थनाचलस्य भ्रमणं घूर्णन मेव विभ्रमो विलासः, तत्र उद्भटा उत्साहवन्तः इन्दिरायाः श्रियः समभिनन्दे आनन्दे भन्दनाः कल्याणाः, सुखा वा । भदि कल्याणे सुखे च इति धातुः। इन्दिरानन्दकरा इत्यर्थः । चन्दनागरुविलेपेन चन्दनागरुपङ्क रूपाङ्गरागेण भूषिताः सुन्दरस्य बाहवः विलसन्ति पयोधिमथनकाल एव लक्ष्म्याः प्रादुर्भावात् मन्दर भ्रमण विभ्रमोद्भटत्वं इन्दिरा समभिनन्द भन्दनत्वे हेतु रिति भावः ।। ५२ ।।

*ज्याकिणाङ्कपरिकर्मधर्मिणो*
*भान्ति सुन्दर भुजस्य बाहवः*
*पारिजात विटपायितर्धयः*
*प्रार्थितार्थ परिदानदीक्षिताः ।। ५२ ।।*

ज्याकिणेति। ज्याकिणः धनुरारोपण शरसन्धान कालीन मौर्व्याघात जातः प्रकोष्ठनिष्ठो व्रणविशेषः, स एवाऽङ्कः चिह्नं स एव परिकर्म अलङ्कारः, स एव धर्मः एषा मस्तीति ज्याकिणाङ्क परिकर्मधर्मिणः, ज्याघातालङ्कृता इति यावत्। महावीरबाहुलक्षण मिदम्। सर्वेषा मपि भुजानां मौर्व्याघातोक्ते स्सव्यसाचित्व मपि सिद्धम्। प्रार्थितार्थपरिदानदीक्षिताः आश्रितजन प्रार्थितपुरुषार्थ प्रदाने कृत सङ्कल्पा इत्यर्थः। अत एव पारिजात विटपायिता पारिजात शाखावदाचरिता ऋद्धि स्समृद्धिः, विशेषणद्वय प्रतिपादित-शौर्यानुगुण वृत्तायत पीनत्वौदार्यरूप सम्पत् येषां ते तथोक्ताः सुन्दरभुजस्य बाहवः भान्ति, शौर्यौदार्ये एव भुजशोभाहेतु रिति भावः ॥ ५२ ॥

*सागराम्बर तमाल कानन*
*श्यामलर्द्धय उदारपीवराः।*
*शेषभोग परिभोग भागिन -*
*स्तन्निभा वनगिरी शितु र्भुजाः ॥ ५३ ॥*

सागरेति। सागराम्बरतमालकाननवत् श्यामला ऋद्धिः शोभा-समृद्धिः येषां ते तथोक्ताः। श्यामलपद समभिव्याहार बला दृद्धिशब्दः शोभासमृद्धिपरः, श्यामल शब्द एव श्यामतापरो वा। सागराणां नानावर्णत्वेऽपि सामान्यतः कविसमयसिद्धो नीलि मैव, नीलं नभ इति प्रतीतिवत्; ईश्वरस्याऽपि स एवेति भावः। उदारपीवराः आयताः पीनाश्च। शेषभोगपरिभोग एव भागः एषामस्तीति तथोक्ताः। शेषशरीररूप-शय्यासुखानुभवे अंशवन्त इत्यर्थः। भोगः सर्पशरीम्। परिभोगः अनुभवः। भागः अंशः। तन्निभाः शेषभोगनिभाः वनगिरीशितुः वनगिरीश्वरस्य भुजाः भान्तीति पूर्वेणान्वयः ॥ ५३ ॥

*अहमहमिका भाजो गोवर्धनोद्धृति नर्मणि*
*प्रमथनविधा वब्धे र्लब्ध प्रबन्ध समक्रियाः*
*अभिमतबहू भावाः कान्ताभिरम्भण सम्भ्रमे*
*वनगिरिपते र्बाहा श्शुम्भन्ति सुन्दरदोर्हरिः ॥ ५४ ॥*

अहमहमिकेति । अहम्पूर्व महम्पूर्व मिति या प्रवृत्ति स्सा अहमहमिका। गोवर्धनोद्धृतिनर्मणि गोवर्धनोद्धरणलीलायां अहमहमिका भाजः प्रत्येकं स्वातन्त्र्येण प्रवृत्ता इत्यर्थः । अब्धेः प्रमथनविधौ मथनविधाने, "विधि र्विधाने दैवेऽपि" इत्यमरः । लब्धप्रबन्धाः प्राप्तानुषङ्गाः समा स्तुल्या श्च क्रियाः व्यापाराः यासां ता स्तथोक्ताः, चिरकालं चतुर्भिरपि भुजै र्मथित मिति भावः । कान्ताभिरम्भण सम्भ्रमे इन्दिरापरिरम्भणत्वरायां अभिमत बहूभावाः अभिलषित बहुत्वाः, अपर्याप्ते रिति भावः । बहूभावा इत्यत्र " अभूत तद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः" इति च्विप्रत्यये कृते "च्वौच" इति दीर्घः । वनगिरिपते स्सुन्ददोर्हरेः सुन्दरबाहु संज्ञस्य भगवतः बाहाः बाहवः शुम्भन्ति शोभन्ते। शुभशुम्भशोभार्थे इति धातुः ॥ ५४ ॥

*श्रीमद्वनाद्रिपतिपाणितलाब्जयुग्म -*
*मारुढयो र्विमल शङ्खरथाङ्गयो स्तु ।*
*एकोऽब्ज माश्रित इवोत्तमराजहंसः*
*पद्मप्रियोऽर्क इव तत्समितो द्वितीयः ॥ ५५ ॥*

श्रीमदिति । श्रीमतो वनाद्रिपतेः पाणितले करतले एवाऽब्जयुग्म मरविन्दद्वन्द्वम् आरूढयोः आरुह्य स्थितयोः, विमलश्चाऽसौ शङ्खश्च रथाङ्गञ्च तयोः, निर्धारणे षष्ठी, तयो र्मध्ये इत्यर्थः । एकस्तु पाञ्चजन्य स्तु अब्जमाश्रितः उत्तमराजहंस इव; द्वितीय स्तु तत्समितः पद्मं प्राप्तः पद्मप्रियः पद्मे प्रीतिमान् अर्क इव, भातीति शेषः । इयञ्चाऽभूतोपमा ॥ ५५ ॥

*लक्ष्म्याः पदं कौस्तुभसंस्कृत ञ्च*
*श्रीवत्सभूमि र्विमलं विशालम् ।*
*विभाति वक्षो वन मालयाऽऽढ्यं*
*वनाद्रिनाथस्य सुसुन्दरस्य ॥ ५६ ॥*

लक्ष्म्या इति । लक्ष्म्याः पदं वासस्थानं, कौस्तुभेन संस्कृतम्,

अलङ्कृतम् । "परिकर्माऽङ्गसंस्कारः" इत्यमरः । श्रीवत्सस्य भूमिः वासभूमिः वनमालयाऽऽढ्यं सम्पन्नं शोभितं विमल मुज्ज्वलं, विशालं विस्तृतं वनाद्रिनाथस्य सुसुन्दरस्य वक्षः भाति। लक्ष्मी-कौस्तुभ-श्रीवत्स-वनमालाना मसाधारणाभरणत्वा दतिविलक्षणलक्ष्मीकं सुन्दरबाहु वक्ष इति भावः ॥ ५६ ॥

*सौन्दर्यामृत सारपूर परिवाहावर्त गर्तायितं*
*यातः किञ्च विरिञ्चि सम्भवन भूम्यम्भोज सम्भूति भूः ।*
*नाभि श्शुम्भति कुम्भिकुम्भनिभनिर्भात स्तन स्वर्वधू -*
*सम्भुक्त द्रुमषण्ड शैल वसते रारूढ लक्ष्म्या हरेः ॥ ५७ ॥*

सौन्दर्येति। "कुम्भौ तु शिरसः पिण्डौ" इत्यमरः। कुम्भिकुम्भौ गजशिरःपिण्डौ, तयोर्निभा स्सदृशाः। निर्भातस्तनाः नितरां द्योतिताः स्तना यासां ताः, कुम्भिकुम्भनिभतेजिष्ठस्तनाः ताश्च स्वर्वध्वश्च सुरलोक सुन्दर्यः ताभि स्सम्भुक्तः अनुभूतो यो द्रुमषण्डशैलो वनगिरिः स एव वसति र्वासस्थानं यस्य तथोक्तस्य आरूढलक्ष्म्याः आरूढश्रीनाम्नो हरेः भगवत स्सौन्दर्यमेवाऽमृतसारः सुधारसः तस्य पूरः प्रवाहः तस्य परिवाहः, "जलोच्छ्वासाः परीवाहाः" इत्यमरः । महाप्रवाहा न्निर्गतः प्रवाहभेदः परिवाहः तस्य गर्तायितम् आवर्तवदाचरितं यातः प्राप्तः। किञ्च, विरिञ्चि सम्भवनभूमिः पितामहोत्पत्तिस्थानं, यदम्भोजं , तस्य सम्भूतिभूः उत्पत्तिस्थानं नाभिः शुम्भति शोभते । हस्तिमस्तक तुल्यदीप्तस्तन सुरसुन्दरीपरिभुक्तो वनाद्रि रित्यनेनाऽद्रे रौन्नत्यभोग्यते ज्ञापिते। सुन्दरबाहोः प्रत्येकं तत्तदवयव सौन्दर्यस्यामृतसारत्वं अवयवसमुदाय सौन्दर्यस्य पूरत्वं, नाभे स्तदेकदेशावर्तत्व ञ्चोत्प्रेक्ष्यते ॥ ५७ ॥

*सुन्दरस्य किल सुन्दर बाहो -*
*श्श्रीमहातरुवनाचलभर्तुः ।*
*हन्त यत्र निवसन्ति जगन्ति*
*प्रापितक्रशिमतत्तनुमध्यम् ॥ ५८ ॥*

सुन्दरस्येति। महान्त स्तरवो यस्मिन् स तथोक्तो यो वनाचलः तद्भर्तुः सुन्दरबाहोः सुन्दरस्य यत्र मध्ये जगन्ति निवसन्ति प्रलयसमय इति भावः। तत्तनुमध्यं दिव्यविग्रहावलग्न प्रदेशः उदरमित्यर्थः। प्रापितक्रशिम गमित कार्श्यं किल। हन्तेत्याश्चर्ये। सकलजगन्निवासभूतस्याऽपि भगवदुदरस्य कार्श्य माश्चर्य मितिभावः॥ ५८॥

*पिष्टदुष्ट मधुकैटभ कीटौ*
*हस्तिहस्त युगलाभसुवृत्तौः।*
*राजतः क्रमकृशौ च सदूरू*
*सुन्दरस्य वनभूधर भर्तुः॥ ५९॥*

पिष्टेति। वनभूधर भर्तुः सुन्दरस्य पिष्टौ चूर्णीकृतौ दुष्टौ वेदापहारा दिदोषयुक्तौ मधुकैटभा वेव कीटौ अतिक्षुद्रजन्तु विशेषौ याभ्यां तौ तथोक्तौ मधुकैटभा वुभावपि— "ऊरुद्वयेन निष्पिष्य जघान भगवान्" इति पुराण प्रसिद्धिः। हस्ति हस्त युगलाभौ करिकरद्वन्द्वद्युती च तौ सुवृत्तौ च तथोक्तौ, सुवृत्ततया करिकरसदृशा वित्यर्थः। क्रमकृशौ च हस्ति हस्तवत् क्रमेण कार्श्यभाजा वित्यर्थः। ऊरो स्सन्धिप्रदेश मारभ्य, अधस्ता त्क्रमेण कार्श्यमावश्यकंशोभाया इति भावः। सुदूरू शोभना वूरु राजतः विलसतः॥ ५९॥

*यौवनवृषककुदोद्भेद निभं नितरां*
*भाति विभो रुभयं जानु शुभाकृतिकम्।*
*सुन्दरभुजनाम्नो मन्दर मथिताब्धे*
*श्चन्दन वन विलसत्कन्दर वृषभपतेः॥ ६०॥*

यौवनेति। चन्दनवनेन विलसत्कन्दरो दरी यस्य तस्य वृषभस्य वृषभगिरेः पत्युर्नाथस्य मन्दरमथिताब्धेः मन्थनाचल मथितपयोनिधेः सुन्दरभुजनाम्नः विभोः स्वामिनः यौवन मेव वृषो वृषभः तस्य ककुदः स्कन्धः पृष्ठमध्यगतः उन्नतावयवविशेषः तस्य उद्भेदः अङ्कुरः, तस्य निभं सदृशम्। "प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्", "अङ्कुरो-

ऽभिनवोद्भिदि'' इत्युभयत्राऽप्यमरः। शुभाकृतिकं सुन्दराकारं उभयं जानु जानुद्वयं नितरां भाति सुन्दरबाहुजानु तदीययौवनवृषभस्य ककुदोन्मेषवद्भातीति भावः ॥ ६० ॥

*अधोमुखं न्यस्त पदारविन्दयो*
*रुदञ्चितोदात्त सुनाल सन्निभे।*
*विलङ्घ्य जङ्घे क्व नु रंहतो दृशौ*
*वनाद्रिनाथस्य सुसुन्दरस्य मे॥ ६१ ॥*

अधोमुखमिति। वनाद्रिनाथस्य सुसुन्दरस्य अधोमुखं यथातथा न्यस्ते निहिते पदा वेव अरविन्दे, तयोः उदञ्चितोदात्तसुनालसन्निभे वृत्तायतरुचिरनाल सन्निभे, जङ्घे जानुपादमध्यप्रदेशौ विलङ्घ्य अतिक्रम्य मे दृशौ क्व नु रंहतः क्व वा गच्छतः रहिर्गत्यर्थः सुन्दरबाहुजङ्घयो रति सुन्दरत्वात् तदनुभवप्रवृत्ते मम दृशौ अवयवान्तर शोभानपेक्षे भवत इति भावः ॥ ६१ ॥

*सुसुन्दरस्याऽस्य पदारविन्दे*
*पदारविन्दाधिक सौकुमार्ये।*
*अतोऽन्यथा ते बिभृयात्कथं नु*
*तदासनं नाम सहस्रपत्रम्॥ ६२ ॥*

सुसुन्दरस्येति। अस्य सुसुन्दरस्य पदारविन्दे चरणाम्बुजे पदारविन्दात् पादपीठारविन्दात् आसनपद्मात् अधिकं सौकुमार्य मार्दवं ययोस्ते तथोक्ते भवतः। अतोऽन्यथा उक्त प्रकारा दितरथा चेत् आसनं नाम तत्सहस्र पत्रं आसनत्वेन पादपीठत्वेन प्रसिद्धं तदरविन्दं ते पदारविन्दे कथ न्नु बिभृयात्, कथं वा वहेत्? अतः सौकुमार्यातिशयपराजित मासन पद्मं पदारविन्दे वहतीत्यर्थः ॥ ६२ ॥

उक्त मर्थ मेव मुखान्तरेणाऽऽख्याति -

*सौन्दर्यमार्दव सुगन्धरस प्रवाहै*
*रेते हि सुन्दरभुजस्य पदारविन्दे॥*

*अम्भोज दम्भपरिरम्भण मभ्यजैष्टां*
*तद्वै पराजित मिमे शिरसा बिभर्ति ॥ ६३ ॥*

सौन्दर्य मिति। एते सुन्दरभुजस्य पदारविन्दे सौन्दर्य माभिरूप्यं मार्दवं सौकुमार्यं, शोभनो गन्धः सुगन्धः। रस प्रवाहः - 'विष्णोःपदे परमे मध्व उत्सः', इत्युक्तो मकरन्द प्रवाहः, एतैः, अम्भोजस्य यो दम्भःशोभामार्दवसौरभ्यमकरन्दनिष्यन्दवत्ताप्रयुक्तं पादारविन्दप्रति द्वन्द्विता विडम्बनं तस्य परिरम्भणं प्रसङ्गं अभ्यजैष्टां जितवती। जि अभिभवे इति धातोः परस्मैपदिलुङ् द्विवचनम्, पराजितं तत् अम्भोजं इमे पादारविन्दे शिरसा बिभर्ति वहति। सुन्दरबाहुपादारविन्दाभ्यां नित्यनिरवद्य निरतिशय सौन्दर्यसौकुमार्य सौगन्ध्य मकरन्द प्रवाहाभ्यां पराजितं लौक्किमब्जं तदास नत्वेनाऽवतीर्य त्ते मूर्ध्ना बिभर्तीत्यर्थः ॥ ६३ ॥

*एते ते बत सुन्दराह्वयजुषः पादारविन्दे शुभे*
*यन्निर्णेज समुत्थित त्रिपथगा स्रोतस्सु किञ्चित्किल।*
*धत्तेऽसौ शिरसा ध्रुव स्तदपरं स्रोतो भवानीपति -*
*र्यस्यास्यालक निन्दिकेति निजगु र्नामैव मन्वर्थकम् ॥ ६४ ॥*

एतइति। यन्निर्णेजेन सुन्दरबाहुपादारविन्दशोधनेन समुत्थिता उद्भूता या त्रिपथागा गङ्गा तत्स्रोतस्सु किञ्चित् एकं स्रोतः, "स्रोतोऽम्बुसरणं स्वत" इत्यमरः। असौ ध्रुवः ज्योतिश्चक्राधारतया परिदृश्यमान औत्तानपादिः, "ध्रुव औत्तान पादिः स्यात्" इत्यमरः। धत्ते निर्वहति, आधारो भवतीत्यर्थः। भवानीपतिः पार्वतीपतिः तदपरं तदपेक्षयाऽन्यत् स्रोतो धत्ते शिरसा वहति। यस्याऽस्य रुद्रशिरोधृतस्य स्रोतसः अलकनन्दिकेति अन्वर्थकं नाम, अलकं नन्दयतीति अलकनन्दिका इत्यनुगतार्थं नामधेयं निजगुः ऊचुः, पौराणिका इति शेषः। सुन्दराह्वयजुषः सुन्दर इति नामभाजः। एते ते पादारविन्दे त्रैलोक्यपावन गङ्गोत्पादकतया अत्यन्तपावनं सुन्दरबाहुपादारविन्दे शुभे भोग्ये इत्यर्थः। बतेत्याश्चर्ये। पावनयोरेव अत्यन्त भोग्यता च आश्चर्यकरी इति भावः ॥ ६४ ॥

**आम्नायकल्पलतिकोत्थसुगन्धिपुष्पं**
**योगीन्द्रहार्दसरसीरुह राजहंसम्।**
**उत्पक्कधर्म सहकार फल प्रकाण्डं**
**वन्देय सुन्दरभुजस्य पदारविन्दम्॥ ६५॥**

आम्नायेति। आम्नायः श्रुति रेव कल्पलतिका तस्यां उत्थं उद्भूतं सुगन्धि शोभनागन्धञ्च यत्पुष्पं तत् आम्नायकल्पलतिकोत्थसुगन्धिपुष्प मित्यभेदाध्यवसायः। एव मुत्तरत्राऽपि। हृदि भवं हार्दं, योगीन्द्राणां हार्दसरसीरुहे हृदयकमले राजहंसं, हंसस्य कमलमध्यवर्तित्वा दिति भावः। उत्पक्कः परिपक्को यो धर्मः स एव सहकारः आम्रविशेषः तस्य फलप्रकाण्डं फलश्रेष्ठं, सुन्दरभुजस्य पदारविन्दं वन्देय भजेयं, श्रुतिशिरःप्रतिपाद्यं योगिध्येयं ध्यानफलञ्च सुन्दरबाहुपदारविन्द मेवेति केवल मनुक्त्वा पुष्पराज हंस सहकारफल प्रकण्ड निरूपणात् श्रुतिशिरस्सौलभ्यावहत्वं, योगिहृदयावास रसिकत्वं परमपुरुषार्थत्वञ्च अभिप्रेत मिति मन्तव्यम्॥ ६५॥

***सुसुन्दरस्याऽस्य तु वामनाकृतेः***
***क्रमत्रयप्रार्थिनि मानसे किल।***
***इमे पदे ताव दिहाऽसहिष्णुनी***
***विचक्रमाते त्रिजगत् पदद्वये॥ ६६॥***

सुसुन्दरस्येति। वामनाकृतेरस्य सुसुन्दरस्य मानसे तु क्रमत्रयप्रार्थिनि, महाबलिसकाशात् विक्रमत्रयपरिमिता भूमिर्दातव्येति प्रार्थनभाजि सति, इमे पदे चरणौ इह भूमौ तावत् विक्रमत्रयं असहिष्णुनी असहमाने सती त्रिजगत् त्रैलोक्य मपि पदद्वये विक्रमद्वये विचक्रमाते विक्रान्तवती। पदयो राश्रितसंरक्षण त्वरातिशय स्तादृश इति भावः॥ ६६॥

***सौन्दर्य सारामृतसिन्धुवीचि -***
***श्रेणीषु पादाङ्गुलि नामिकासु।***
***न्यक्कृत्य चन्द्रश्रिय मात्मकान्त्या***
***नखावली शुम्भति सुन्दरस्य॥ ६७॥***

सौन्दर्येति। सुन्दरस्य पादाङ्गुलिनामिकासु पादशाखासमाख्यासु सौन्दर्यसारामृतवीचिश्रेणीषु, सौन्दर्यसार एव सारभूतं सौन्दर्य मेव अमृतसिन्धुः सुधासागरः तस्य वीचिश्रेणीषु तरङ्गपङ्क्तिषु सौन्दर्यसारामृतसिन्धुवीचि श्रेणित्वेन निरूपितासु पादाङ्गुली ष्विति यावत्। नखावली नखापङ्क्तिः चन्द्रश्रियं चन्द्रपङ्क्ति शोभां न्यक्कृत्य नीचीकृत्य जित्वा शुम्भति शोभते, "न्यङ् नीच खर्वह्रस्वाः स्युः" इत्यमरः। पादाङ्गुलीनां वीचिश्रेणित्वेन निरूपितत्वात्, तत्र प्रतिफलित चन्द्रपङ्क्तित्वेन नखावल्युत्प्रेक्ष्यते। लोके प्रतितरङ्गं चन्द्रबिम्ब प्रतिफलनं प्रसिद्धं हि॥ ६७॥

*यो जातक्रशिमा मली च शिरसा सम्भावित श्शम्भुना*
*सोऽयं यच्चरणाश्रयी शशधरो नूनं नखव्याजतः।*
*पूर्णत्वं विमलत्व मुज्ज्वलतया सार्धं बहुत्वं तथा*
*यात स्तं तरुषण्ड शैलनिलयं वन्दामहे सुन्दरम्॥ ६८॥*

य इति। शम्भुना शिरसा सम्भावितः धृतः यः शशधरः जातक्रशिमा सञ्जातकार्श्यः क्षयिष्णुः मली कलङ्की च अभू दिति शेषः। सोऽयं शशधरः नखव्याजतः यच्चरणाश्रयी यत्पादाश्रयवान् सन् पूर्णत्वं सर्वदा समग्रत्वं, विमलत्वं निष्कलङ्कत्वं, तथा उज्ज्वलतया सार्धं प्रकाशाधिक्येन सह बहुत्व ञ्च दशविधशरीरत्वञ्च यातः प्राप्तः तरुषण्डशैलनिलयं वनाद्रिवासिनं तं सुन्दरं वन्दामहे भजामहे। देवतान्तर शिरोधारणेऽपि कार्श्यकलुष-विशिष्टस्य चन्द्रस्य यत्पादाश्रये सति पूर्णत्व विमलत्वोज्ज्वलत्वबहुत्वानि जातानि स एव सुन्दरबाहुः श्रेयस्कमाना मस्माकंसमाश्रयणीय इति भावः॥ ६८॥

*यस्याः कटाक्षण मनुक्षणमीश्वराणा -*
*मैश्वर्यहेतु रिति सर्वजनीन मेतत्।*
*श्री स्सेति सुन्दर निषेवणतो निराहु -*
*स्त्वां हि श्रियःश्रिय मुदाहु रुदारवाचः॥ ६९॥*

यस्या इति । ईश्वराणां शक्रादीनां ऐश्वर्यहेतुः तत्तदधिकार सम्पत्कारणम् अनुक्षणं प्रतिक्षणं यस्याः श्रियः कटाक्षणं कटाक्षः इत्येत त्सर्वजनीनं सर्वजनप्रसिद्धम् । सुन्दरनिषेवणतः सुन्दरबाहुसमाश्रयणा द्धेतोः सा सर्वसुराधीश्वराणामप्यैश्वर्यहेतु स्वीय कटाक्षा सा श्रीरिति निराहुः श्रयते इति श्रीः इति निर्वचन्ति । श्रिञ् सेवाया मिति धातो स्सेवार्थकत्वात्, भगवन्तं निरन्तरं सेवते इति हेतोः श्रीरिति निर्वचन मकुर्व न्नित्यर्थः । उदारवाचः सर्वतत्त्वार्थप्रदस्वप्रबन्धाः भगवद्वाल्मीकि यामुनाचार्य प्रभृतयः त्वां श्रियः श्रिय मुदाहु र्हि उच्चै र्वदन्ति हि । श्रीरामायणे "श्रियः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमाक्षमा" इति । स्तोत्ररत्ने "कः श्रीः श्रियः परमसत्त्वसमाश्रयः कः" इति । ईश्वरत्वेनाऽभिमतानां समस्तानां समस्तावह स्वकीयकटाक्षाया लक्ष्म्या अपि भगवानति शयावह इति भावः ॥ ६९ ॥

*दिव्याचिन्त्य महाद्भुतोत्तमगुणै स्तारुण्यलावण्यक -*
*प्रायैरद्भुत भावगर्भ सततापूर्वप्रियै र्विभ्रमैः ।*
*रूपाकार विभूतिभिश्च सदृशीं नित्यानपेतां श्रियं*
*नीलां भूमिमपीदृशीं रमयिता नित्यं वनाद्रीश्वरः ॥ ७० ॥*

दिव्येति । दिव्याः अप्राकृताः अचिन्त्याः ईदृक्प्रकाराः इयत्परिमाणाः इति चिन्ययितु मशक्याः,अत एव महाद्भुताः अत्याश्चर्यकराः उत्तमाः स्वसम्बन्धिनोजनस्य अत्यन्तवैलक्षण्यापादकाश्च ये गुणाः ज्ञानशक्त्यादयो दयावात्सल्यादयश्च तैः स्वरूपगुणैः. तारुण्यलावण्यकप्रायैः यौवन-समुदायशोभाप्रभृतिभि र्विग्रहगुणैश्च । अद्भुतो भावोऽभिप्रायो गर्भे येषां ते अद्भुतभावगर्भाः सततापूर्वाः निरन्तरानुभवेऽपि भोग्यतातिशयेन कदाऽप्यननुभूता इवाभिनवी भवन्तः, प्रियाः स्पृहणीयाश्च ये विभ्रमाः विलासाः तैश्च रूपाकारविभूतिभिश्च रूपं स्वरूपम्, आकारो विग्रहसन्निवेशः, विभूति स्सम्पत्, उभयविभूत्यैश्वर्यं रूपाकारविभूतिभिश्च सदृशीम् । "तुल्यशीलवयोवृत्तां तुल्याभिजन-

1. निगदन्ति इत्युचितम् ।

लक्षणाम् । राघवोऽर्हति वैदीहीं तञ्चेय मसितेक्षणा'' इत्युक्तसर्वप्रकार सादृश्य विशिष्टां नित्यानपेतां, ''राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि। अन्येषुचाऽवतारेषु विष्णोरेषाऽनपायिनी'' इत्युक्तप्रकारेण नित्यानपायिनीं श्रियम्, ईदृशीं दिव्याचिन्त्येत्याद्युक्तसर्वथा-सादृश्यादिविशेषण विशिष्टां भूमिं नीला मपि वनाद्रीश्वरो नित्यं रमयिता प्रीणयिता भवति । रमयतेः तृन्प्रत्ययान्तं पदम् । तृच्प्रत्ययान्ते षष्ठीविधानात् द्वितीयान्वयासम्भवः। सुन्दरबाहुचरणारविन्दे शरणवरण-क्षमाणां अपेक्षितं पुरुषकार सान्निध्यं समृद्ध मिति भावः ॥ ७० ॥

अत्यन्तापराधिष्वपि क्षमाकर्तव्येति लक्ष्म्या प्रोक्त मादर्तव्य मेव भवति भगवत - इत्यभिप्राय माह -

*अन्योन्यचेष्टित निरीक्षण हार्दभाव -*
*प्रेमानुभावमधुर प्रणय प्रभावः ।*
*आजस्रनव्यतर दिव्यरसानुभूति -*
*स्स्वां प्रेयसीं रमयिता वनशैलनाथः ॥ ७१ ॥*

अन्योन्येति। अन्योन्यं चेष्टितानि, भ्रूभङ्गमन्दस्मितादि विलास-व्यापाराः निरीक्षणम् अपाङ्गवीक्षणम्, हार्दभावः, हार्दो हृद्गतोऽभिप्रायः तारुण्यलावण्याद्यनुध्यानं, प्रेमानुभावः प्रेमातिशयः संश्लेषकालेऽपि सौकुमार्यपरामर्शः प्रणयापराधानादरहेतुः प्रेमान्ध्यं वा, एतैः मधुरः मधुरत्वं नाम स्वादुतरत्वं मधुवद्रस्यः यः प्रणयप्रभावः अनुरागातिशयो यस्य स तथोक्तः वनशैलनाथः, अत एव, अजस्रमेवाऽऽजस्रं सदा नव्यतरा अत्यन्तापूर्वतरा दिव्या रसानुभूतिः अप्राकृतानन्दानुभवो यस्य स तथोक्त स्सन् स्वां प्रेयसीं स्वकीयां दयितां रमयिता सन्तोषयिता। अत्र ''राम स्तु सीतया सार्धं विजहार बहूनृतून्। मनस्वी तद्गत स्तस्यां नित्यं हृदि समर्पितः। प्रिया तु सीतारामस्य दाराः पितृकृता इति । गुणाद्रूपगुणात्त्याऽपि प्रीतिर्भूयोऽभ्यवर्धत तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते । अन्तर्जात

मपि व्यक्त माख्याति हृदयं हृदा'' इत्यादि श्री रामायणश्लोकाः प्रमाणतयाऽनुसन्धेयाः ॥ ७१ ॥

*सुन्दरस्य वनशैलवासिनो*
*भोगमेव निजभोग माभजन् ।*
*शेष एष इति शेषताकृते:*
*प्रीतिमानहिपति स्स्वनामनि ॥ ७२ ॥*

सुन्दरस्येति। वनशैलवासिनः सुन्दरस्य भोग मेव भोगसाधनमेव निजभोगं स्वकीयशरीरं आभजन् प्राप्नुवन् सुन्दरबाहो स्सुखशय्याभूतनिजशरीर इत्यर्थः । अहिपतिः शेषताकृतेः शेषत्वाकाराद्धेतोः, ''परगताति शयाधानेच्छया उपादेयत्व मेव यस्य स्वरूपं स शेषः, पर श्शेषी'' इत्युक्त शेषत्व स्वरूपात्, शेष एव इति स्वनामनि प्रीतिमान्। भोग मेवेत्यत्र कार्ये कारणत्वोपचारः। यद्वा भोग शब्दस्य सुख पर्यायत्वात् भोगशब्दस्य भोगकरत्व मर्थः। ''भोग स्सुखे स्त्र्यादिभृता वहेश्च फणकाययोः'' इत्यमरः । निजभोगस्य सुन्दरबाहुभोगकरत्वात् एवं रूपशेषत्वसिद्धे, रन्वर्थेशेष इति स्वनामनि परमपुरुषार्थ बुद्धिमा नित्यर्थः ॥ ७२ ॥

*वाहनासनवितानचामरा -*
*द्याकृतिः खगपति स्त्रयीमयः ।*
*नित्यदास्यरतिरेव यस्य वै*
*ह्येष सुन्दरभुजो वनाद्रिगः ॥ ७३ ॥*

वाहनेति। वाहनासनवितान चामराद्याकृतिः ''दास स्सखा वाहन मासनं ध्वजः'' इत्यादि स्तोत्ररत्नोक्त प्रकार वाहनाद्याकारः त्रयीमयः खगपतिः ''वेदात्मा विहगेश्वरः'' इत्युक्तः, यस्य सुन्दरभुजस्य नित्यदास्यरतिरेव वै नित्यकैङ्कर्यभोग एव प्रसिद्धः । ''स्यु रेवन्तु पुन र्वैवेत्यवधारणवाचकाः'' इत्यमरः । एष सुन्दरभुजः वनाद्रिगो हि

वेदात्मकगरुत्मता निरन्तरपरिचरितचरणद्वन्द्व स्सुन्दरबाहु स्सौलभ्याति-शयेन वनशैलवासी भवति हीत्यर्थः ॥ ७३ ॥

*वनाद्रिनाथस्य सुसुन्दरस्य वै*
*प्रभुक्तशिष्टाश्यथ सैन्यसत्पतिः ।*
*समस्तलोकैक धुरन्धरस्सदा*
*कटाक्षवीक्ष्योऽस्य च सर्वकर्मसु ॥ ७४ ॥*

वनाद्रिनाथस्येति । अथ सुसुन्दरस्य वनाद्रिनाथस्य प्रभुक्तशिष्टाशी "त्वदीयभुक्तोज्झितशेषभोजिना" इत्युक्तप्रकारेण त्वदीयभुक्तोज्झित शेषभोजी, सर्वकर्मसु सकलजगत्सृष्ट्यादिव्यापारेषु अस्य वनाद्रिनाथस्य कटाक्षवीक्ष्यः ". . . सेनापतिना निवेदितं तथाऽनुजानन्त मुदारवीक्षणै" रित्युक्तप्रकारेण इङ्गितपात्रञ्च । सैन्यसत्पतिः , अन्येषु सैन्यपतिषु सत्स्वप्ययमेव सर्वोत्तर इत्यभिप्रेत्य सत्पदप्रयोगः । सदा समस्त कालेऽपि, समस्तलोकैकधुरन्धरो वै उभयविभूति प्रधानधूर्वह इति प्रसिद्धः । यस्य सैन्यपतिरेव सर्वनिर्वाहकः स एव सुलभो भवतीति भावः ॥ ७४ ॥

*छत्रचामरमुखाः परिच्छदा*
*स्सूरयः परिजनाश्च नैत्यगाः ।*
*सुन्दरोरुभुज मिन्धते सदा*
*ज्ञान शक्तिमुखनित्य सद्गुणाः ॥ ७५ ॥*

छत्रेति । नित्यं भवं नैत्यं, तत्कैङ्कर्यं गच्छन्तीति नैत्यगाः सूरयः शेषिहृदयज्ञाः परिजनाः अनन्तगरुडादयः, छत्रचामरमुखाः छत्रचामरप्रभृतयः परिच्छदाः परिकराश्च, ज्ञानशक्तिमुखाः नित्यसद्गुणाश्च ज्ञानशक्तिप्रभृति स्वतस्सिद्धकल्याणगुणगणाश्च, सदा सुन्दरोरुभुज मिन्धते, सुन्दरबाहुं प्राप्य प्रकाशन्त इत्यर्थः । इन्धते प्रकाशयन्तीत्युक्ति रनुपपन्ना, णिजन्तत्वाभावाद्धेतोः, "गुणजं गुणिनो हि मङ्गलत्वम्" इत्याद्युक्ति-विरोधाच्च प्राप्येत्यध्याहारः ॥ ७५ ॥

*द्वारनाथ गणनाथ तल्लजाः*
*पारिषद्यपद भागिन स्तथा*
*मामकाश्च गुरुवः पुरातना -*
*स्सुन्दरं वनमहीध्रगं श्रिताः ॥ ७६ ॥*

द्वारनाथेति । द्वारनाथगणनाथ तल्लजाः - द्वारनाथतल्लज़ाः चण्डप्रचण्डादयः, गणनाथतल्लजाः कुमुद्कुमुदाक्षादयः, परिषदि आस्थाने भवाः पारिषद्या इति पदे शब्दे भागः अंशः, एषा मस्तीति पारिषद्य-पदभागिनः पारिषद्यशब्दवाच्यान्तर्भूता इत्यर्थः । मामकाः अस्मदीयाः पुरातनाः गुरवः पूर्वाचार्याश्च पराङ्कुशपरकाल यतिवरादयश्च वनमहीध्रगं वनाद्रिवासिनं सुन्दरं श्रिताः द्वारपालाः गणपालाः पारिषद्यमुख्याः पूर्वाचार्याश्च सुन्दरबाहुं निरन्तरं सेवन्त इत्यर्थः ॥ ७६ ॥

*ईदृशैः परिजनैः परिच्छदै -*
*र्नित्यसिद्धनिजभोगभूमिगः*
*सुन्दरो वनगिरे स्तटीषु वै*
*रज्यते सकलदृष्टिगोचरः ॥ ७७ ॥*

ईदृशै रिति । ईदृशैः पूर्वोक्तप्रकारैः परिजनैः अनन्तगरुडादिभिः, परिच्छदैः छत्रचामरादिभिश्च सह नित्यसिद्धा सदैकरूपा निजास्वासाधरणा च या भोगभूमिः नित्यविभूतिः, तां गच्छतीति नित्यसिद्धनिज भोगभूमिगः, "वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तै र्भागवतै स्सह" इत्युक्त श्रीवैकुण्ठनाथः सकलदृष्टिगोचरः सकलजननयनविषयः सुन्दर स्सन् वनगिरे स्तटीषु रज्यते वै अनुरक्तो भवति हि - "तदक्षरे परमे व्योमन्," "योऽस्याध्यक्षः परमे व्योमन्" "यत्र पूर्वे साध्या स्सन्ति देवाः", "एते वै निरया स्तात स्थानस्य परमात्मनः"। इत्याद्युक्त नित्यनिरवद्य नित्य सूरिपरिवृतपरमपदनिलयः "न चक्षुषा पश्यति कश्चनैनम्," "न मांसचक्षु रभिवीक्षते तम्", "श्रोतव्यो मन्तव्यो

द्रष्टव्यो निदिध्यासितव्य इत्युपासकानां साक्षात्कार्योऽपि स्वकीयकृपया वनगिरि प्रान्ते सकलनेत्रपात्रं भवतीति सुन्दरबाहु सौलभ्यातिशयोऽभिधीयते ॥ ७७ ॥

नित्यसिद्ध भोगभूमि निवासरसिकस्य वनाद्रिवासो वैरस्यावहः स्यादित्याशङ्कां परिहरन्नाह -

*आक्रीडभूमिषु सुगन्धिषु पौष्पिकीषु*
*वैकुण्ठधामनि समृद्ध सुवापिकासु ।*
*श्री मल्लतागृहवतीषु यथा तथैव*
*लक्ष्मीधर स्सजति सिंहगिरे स्तटीषु ॥ ७८ ॥*

आक्रीडेति । वैकुण्ठधामनि वैकुण्ठाख्ये स्थाने समृद्धसुवापिकासु समृद्धा स्सुसम्पन्नाः रस्याम्भस्समृद्धाः शोभनाश्च वाप्यः दीर्घिकाः यासुतासु श्रीमन्ति शोभावन्ति लतागृहाणि आसां सन्तीति श्रीमल्लतागृहवतीषु पोष्पिकीषु पुष्पप्रचुरासु अतएव सुगन्धिषु आक्रीडभूमिषु उद्यानभूमिषु लक्ष्मीधरः श्रियःपतिः यथा सजति सक्तो भवति तथैव पूर्वोक्तसर्वविशेषणविशिष्टासु सिंहगिरे स्तटीषु सजति वैकुण्ठभुवनोद्यानभूमि समान भोग्यतावासो वनाद्रितट इत्यर्थः ॥ ७८ ॥

*आनन्दमन्दिर महामणिमण्डपान्त -*
*र्लक्ष्म्याभुवाऽप्यहिपतौ सह नीलया च*
*निस्सङ्ख्यनित्य निजदिव्यजनैकसेव्यो*
*नित्यं वसन्सजति सुन्दरदो र्वनाद्रौ ॥ ७९ ॥*

आनन्देति । आनन्दमन्दिरं स्वरूप रूपगणविभूति नित्यमुक्त संयुक्त भगवदनुभवजन्य महानन्दोत्पत्तिगृहं महच्च मणिमण्डपं सहस्रस्थूणाऽऽस्थानरत्नं, तस्य अन्तः अन्तराले अहिपतौ शेषे लक्ष्म्या, भुवाभूम्या च नीलया च सहवसन् निस्संख्यनित्यनिजदिव्यजनैकसेव्यः असंख्यात नित्यासाधरणाप्राकृतपरिजनमात्रानुभाव्यः सुन्दरदोः सुन्दरबाहुः

वनाद्रौ नित्यं सजति सक्तो भवति । पत्नीपरिजनादिभि स्सह नित्यावासयोग्यो वनाद्रिः आनन्दमन्दिर महामणिमण्डपादपि अत्यन्तभोग्य इति इतःपूर्वोक्तश्लोकार्थ एव दृढीकृत्य समर्थित इति मन्तव्यम् ॥ ७९ ॥

समर्थित मर्थमेव मुखान्तरेणाऽऽह -

*प्रत्यर्थिनि त्रिगुणकप्रकृते रसीम्नि*
*वैकुण्ठधामनि पराम्बरनाम्नि नित्ये ।*
*नित्यं वसन् परमसत्त्व मयेऽप्यतीत -*
*योगीन्द्रवाङ्मनस एष हरि र्वनाद्रौ ॥ ८० ॥*

प्रत्यर्थिनीति । परमसत्त्वमये शुद्धसत्त्वमये अत एव त्रिगुणक प्रकृतेः सत्त्वरजस्तमोमयमूल प्रकृतेः प्रत्यर्थिनि प्रतिभटे असीम्नि अपरिच्छिन्न परिमाणे पराम्बरनाम्नि परमव्योमपरमाकाशशब्दाभिधेये नित्ये सदातने वैकुण्ठधामनि वेकुण्ठाख्ये स्थाने नित्यं वसन् अतीतयोगीन्द्रवाङ्मनसः योगीन्द्रवाङ्मनसाऽपरिच्छेद्य स्वरूपरूपगुण विभूत्यादिकोऽपि हरिः वनाद्रौ, एषः अयमिति प्रत्यक्षार्हो वर्तत इत्यर्थः । अतीतयोगीन्द्रवाङ्मनसे इति सप्तम्यां वैकुण्ठ धामविशेषणं वा ॥ ८० ॥

अथ लीला विभूतियोगं श्लोकद्वयेनाऽऽह -

*लोकां श्चतुर्दश दधत्किल सुन्दरस्य*
*पङ्क्ती गुणोत्तरित सप्तवृतीद मण्डम् ।*
*अन्यानि चाऽस्य सुसदृंशि परश्शतानि*
*क्रीडाविधे रिह परिच्छदता मगच्छन् ॥ ८१ ॥*

लोकानिति । चतुर्दशलोकान् दधत् स्वान्तराले चतुर्दशसङ्ख्याकान् लोकान् बिभ्रत्, तादृग्विस्तारस्वावकाश मित्यर्थः । पङ्क्तीगुणैः दशगुणैः उत्तरिता स्सञ्जतोत्तराः, सदावृतयः सप्त आवरणानि यस्य तत्तथोक्तम् । पूर्वपूर्वावरणापेक्षया दशगुणाधिकोत्तरोत्तरावरणसप्तक मित्यर्थः । इद

मण्डम्, अस्य सुसदृंशि सुतरां सदृशानि, परश्शतानि शतात्पराणि असङ्ख्यातानीत्यर्थः। अन्यानि अण्डानि च इह लीलाविभूत्यां सुन्दरस्य क्रीडाविधेः लीलाविधानस्य परिच्छदता मुपकरणतां अगच्छन् प्रापन्। पङ्क्तिमदं "कृदिकारा दाक्तिनः" इति विकल्पा दीकारान्तम् "पाङ्क्तिश्छब्दोऽपि दशमम्" इत्यमरः ॥ ८१ ॥

*सुरनरतिर्यगदि बहुभदेक भिन्नमिदं*
*जगदथचाऽण्ड मण्डवरणानि च सप्त तथा।*
*गुणपुरुषै च मुक्तपुरुषाश्च वनाद्रिपते -*
*रुपकरणानि नर्मविधयेऽपि भवन्ति विभोः ॥ ८२ ॥*

सुरेति। सुरनरतिर्यगादिभि र्बहुभि र्भेदकैः विशेषणै र्भिन्नं आदिशब्देन स्थावराः गृह्यन्ते। सुरनरतिर्यक्स्थावरात्मकजन्तुविशिष्ट मिदं जगत्। अथ च अण्डं, तथा सप्त अण्डवरणानि अण्डावरणानि च, गुणपुरुषौ च। गुणशब्देन गुणत्रयविशिष्टप्रकृति रुच्यते। पुरुष पदं जात्येकवचनम् प्रकृति सम्बद्धः पुरुषश्च मुक्तपुरुषा श्च प्रकृतिसम्बन्धविमुक्ताः पुरुषाश्च विभोरपि सर्वस्वामिनोऽपि वनाद्रिपतेः नर्मविधये लीलाविधानाय उपकरणानि भवन्ति। मुक्तपुरुषाः मुच्यमानाः पुरुषा इत्यर्थः, लीलाविभूतियोगस्य प्रकृतत्वात् ॥ ८२ ॥

मुक्तपुरुषा इति मुमुक्षुप्रस्तावात् मुमुक्षून् विशिनष्टि —

*ज्ञानिन स्सततयोगिन स्तु ये*
*सुन्दराङ्घ्रिपदभक्ति भागिनः।*
*मुक्ति माप्य परमं परे पदे*
*नित्यकिङ्करपदं भजन्ति ते ॥ ८३ ॥*

ज्ञानिन इति। सततयोगिनः सततं कर्मयोगानुष्ठान शीलाः ज्ञानिनः ज्ञानयोगनिष्ठाः येजनाः सुन्दराङ्घ्रिपदभक्तिभागिनः सुन्दरबाहुचरण विषयक भक्तियोगभाजो भवन्ति ते जनाः परमां मुक्तिं अपुनरावृत्तिमुक्तिं आप्य

प्राप्य परे पदे परमपदे नित्यकिङ्करपदं नित्यकिङ्करा इति शब्दं भजन्ति प्राप्नुवन्ति कर्मज्ञान भक्तियोगा भगवन्नित्यकिङ्करत्व साधन मिति भावः ॥ ८३ ॥

इतःपरं अष्टत्रिंशता श्लोकैः अवतार सौशील्य मनुभवति -

*देवस्य सुन्दरभुजस्य वनाद्रिभर्तु -*
*र्है ! शीलवत्त्व मथवाऽऽश्रितवत्सलत्वम् ।*
*ऐशस्वभाव मजहद्भि रिहावतारै -*
*र्योऽलञ्चकार जग दाश्रिततुल्यधर्मा ॥ ८४ ॥*

देवस्येति । यः सुन्दरभुजः ईशस्य सम्बन्धी ऐशः, ऐशस्वभावं सर्वेश्वरत्वानुरूप स्वरूप रूपगुण विभवादिकं, सर्वज्ञत्व सर्वशक्तित्वादिकं वा अजहद्भिः अत्यजद्भिः अवतारैः इह लीलाविभूत्यां आश्रिततुल्यधर्मा स्वाश्रितजनतुल्यशील स्सन् जगत् अलञ्चकार अलङ्कृतवान् । वनाद्रिभर्तु स्सुन्दरभुजस्य देवस्य शीलवत्त्वं, 'महतोमन्दै स्सह नीरन्ध्रेण संश्लेष श्शीलम् इत्युक्त शीलवत्त्वं, है ! आश्चर्यावहम् । अथवा आश्रितवत्सलत्वं समाश्रितजनदोषेषु भोग्यताबुद्धि राश्रितवत्सलत्वम् । "अजोऽपि सन्नव्ययात्मा भूताना मीश्वरोऽपि सन् । प्रकृतिं स्वा मधिष्ठाय सम्भवा म्यात्ममायया" इत्युक्तप्रकारेण स्वेच्छया अजहत्स्वासाधारण दिव्यस्वभावमेवावतीर्णस्याऽपि । "आत्मानं मानुषं मन्ये रामं दशरथात्मजम्", "अहं वो बन्धवो जातः" इत्याद्युक्तं तद्बन्धुजनसदृशत्व निबन्धनं वात्सल्यं, सौशील्यं वेति अस्माकं विस्मयो भवतीति भावः ॥ ८४॥

*सिंहाद्रिनाथ तव वाङ्मनसातिवृत्तं*
*रूपन्त्वतीन्द्रिय मुदाह रहस्य वाणी ।*
*एवञ्च न त्व मिह चेत्समवातरिष्य -*
*स्त्वज्ज्ञानभक्तिविधयोऽद्य मुधाऽभविष्यन् ॥ ८५ ॥*

सिंहाद्रिनाथेति। हे सिंहाद्रिनाथ, वनाद्रेस्सिंहाद्रिरिति नामान्तरम्। रहस्यवाणी उपनिषत् वाङ्मनसातिवृत्तं वाङ्मनसातिक्रान्तं अतिक्रान्त-वाङ्मनसम् इत्यर्थः। तव रूपन्तु अतीन्द्रियं चक्षुरगोचरम् उदाह उच्चैर्ब्रूते। अत्र रूपशब्दो विग्रहपरः। एवञ्च सति वाङ्मनसापरिच्छेद्य तारुण्य लावण्यकस्य त्वद्दिव्यविग्रहस्य अचक्षुर्विषयत्वे "न चक्षुषा पश्यति कश्चनैनम्", "न मांसचक्षु रभिवीक्षते तम्" इत्याद्युपनिषद्वाक्येन प्रतिपादिते सति इह लीलाविभूत्यां अद्यत्वं न समवातरिष्य श्चेत् त्वज्ज्ञानभक्तिविधयः युष्मज्ज्ञानभक्तिविधायकशास्त्राणि मुधा व्यर्थाः अभविष्यन्। शुभाश्रयविग्रहाश्रयक प्रवृत्तिमत्यः ज्ञानभक्तिविधयः त्वदवताराभावे न सम्पद्यन्ते इति भावः॥ ८५॥

*ये भक्ता भवदेक भोगमनसोऽन नन्यात्म सञ्जीवना -*
*स्तत्संश्लेषण तद्विरोधिनिधनाद्यर्थं वनाद्रीश्वर!*
*मध्येऽण्डं य दवातर स्सुरनराद्याकार दिव्याकृति -*
*स्तेनैव त्रिदशै र्नरैश्च सुकरं स्वप्रार्थितप्रार्थनम्॥ ८६॥*

य इति। हे वनाद्रीश्वर, अनन्यात्मसञ्जीवनाः स्वात्मनः परमात्म-कत्वानुसन्धातृताया अन्यत् आत्मसञ्जीवनं न विद्यते येषा मिति तथोक्ताः भवदेकोपाया इति यावत्। भवदेकभोगमनसः भवत्संश्लेषमात्रसक्तचित्ता इत्यर्थः, भवदेकोपेया इति यावत्। उक्तविशेषण द्वयविशिष्टा ये भक्ताः, सन्तीति शेषः। तत्संश्लेषणतद्विरोधिनिधनाद्यर्थं "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्म संस्थापनार्थाय सम्भवामि युगे युगे" इत्युक्तप्रयोजनत्रयार्थं भवदेकोपायोपेया भक्ता स्साधुशब्देनोच्यन्ते। तत्परित्राणं तत्संश्लेषण मेव। दुष्कृच्छब्देन भक्तविरोधि न एवोच्यन्ते। निधनादीत्यत्र आदिशब्देन धर्मसंस्थापन मुच्यते। मध्येऽण्डं अण्ड मध्ये सुरनराद्याकार दिव्याकृति र्दिव्यविग्रहो यस्य सः, तथोक्त स्सन् अवातरः अवतारं कृतवानसीति यत्, तैनैव अवतारकरणे नैव त्रिदशै र्देवैर्नरैश्च

स्वप्रार्थितप्रार्थनं स्वाभिलषितयाचनं सुकरं सुशकमभूत्। अवाताराभावे भवत्साक्षात्कारस्यैव दुष्करत्वा त्प्रार्थितप्रार्थनं न सम्भवतीति भावः ॥ ८६ ॥

*श्रीमन्महावनगिरीश, विधीशयो स्ते*
*मध्ये तु विष्णुरिति यः प्रथमावतारः।*
*तेनैव चेत्तव महिम्नि जनाः किलान्धा-*
*स्त्वन्मत्स्यभाव मवगम्य कथं भवेयुः ॥ ८७ ॥*

श्रीमन्निति। हे श्रीमन्, महावनगिरीश, श्रीमच्छब्दो महावनगिरि-विशेषणं वा विधीशयोः ब्रह्मरुद्रयो र्मध्ये तु मध्यएव, " तु स्याद्भेदे-ऽवधारणे" इत्यमरः ॥ ते तव विष्णुरिति यः प्रथमावतारः ब्रह्मविष्णुरुद्रा इति परिगणनानुगुणो यः प्राथमिकोऽवतारः तेनैवाऽवतारेण तव महिम्नि परत्वे जनाः अन्धाश्चेत् अनभिज्ञा यदीत्यर्थः। सृष्टिस्थिति संहारकारिण स्त्रयेऽपि प्रत्येकं स्वतन्त्रास्तुल्या इत्यतः त्वत्सर्वेश्वरत्वसाक्षात्कारक्षमाश्चे दिति यावत्। त्वन्मत्स्यभावंत्वदीय मत्स्यसजातीयतां अवगम्य ज्ञात्वा कथं भवेयुः किल। किलशब्दं काकुवाचकः। समुद्रसञ्चरन्मस्त्येषु अयमपि कश्चिन्मत्स्य इत्यपि बुद्धिंकुर्यु रिति भावः ॥ ८७ ॥

*हे देव, सुन्दरभुज, त्व मिहाण्डमध्ये*
*सौलभ्यतो विसदृशं चरितं महिम्नः।*
*अङ्गीकरोषि यदि तत्र सुरै रमीभि -*
*स्साम्या न्निकर्षपरिपालन मेव साधु ॥ ८८ ॥*

हे इति ! हे देव सुन्दरभुज, त्वं सौलभ्यतः हेतोः महिम्नः सर्वेश्वरत्वस्य विसदृश मननुरूपं चरितं चेष्टितं अङ्गीकरोषि यदि स्वीकरोषि चेत् तत्र विसदृशचेष्टिते अमीभिस्सुरैः ब्रह्मरुद्रेन्द्रादिभिः साम्यात् विष्णूपेन्द्रादि सादृश्यात् निकर्षपरिपालनं मत्स्यकूर्मसजातीयताभिनय एव साधु समीचीनम्। सौलभ्यात् स्वीयसर्वस्मात्परत्वविसदृशव्यापाराङ्गीकारे अभिमते सति ब्रह्मरुद्रेन्द्रादि साम्यावह विष्णूपेन्द्रद्यवतारा दपि मत्स्यकूर्मादिसजतीयावतार एव अत्यन्त सौलभ्यावह इति भावः ॥ ८८ ॥

निकर्षपरिपालन प्रसङ्गात्सर्वावतार प्रधान रामकृष्णाद्यवतार-व्यापारा ननुभवति -

***इहावतीर्णस्य वनाद्रिनाथ ते***
***निगूहत स्स्वं महिमान मैश्वरम् ।***
***उमापतेः किं विजयः प्रियङ्करः***
***प्रियङ्करावेन्द्रजिदस्त्रबन्धना ॥ ८९ ॥***

इहेति ! हे वनाद्रिनाथ, ऐश्वरं ईश्वरसम्बन्धि सर्वेश्वरत्वनिबन्धनं स्वं स्वतस्सिद्धं महिमानं वैभवं निगूहतः निरोधयतः इह लीलाविभूत्यां अवतीर्णस्य कृतावतारस्य सर्वेश्वरत्वतिरोधानाय कृतावतारस्येत्यर्थः । ते तव उमापतेः विजयः प्रियङ्करः, किं बाणासुर समरकालीनो रुद्रजयः प्रीत्यावहो वा ? इन्द्रजितः अस्त्रबन्धना ब्रह्मास्त्रनागास्त्रपाशबन्धः प्रियङ्करा वा स्वमहिमनिगूहनानुगुणत्वा दिन्द्रजिदस्त्रबन्धनैव प्रियङ्करेत्यर्थः । अतो निकर्षपरिपालनमेव साध्विति भावः ॥ ८९ ॥

महिमनिगूहनं सर्वात्मना दुश्शक मित्याह -

***पुच्छोत्पुच्छन मुर्छनोद्धति धुतव्यावर्तितावर्तव -***
***त्संवर्तार्णवनीरपूरविलुठत्पाठी न दिव्याकृतेः ।***
***सिंहाद्रीश, न वैभवं तव कथं स्वालक्ष्य मालक्ष्यते***
***पद्माक्षस्य जुघुक्षतोऽपि विभवं लक्ष्मीधराधोक्षज ॥ ९० ॥***

पुच्छेति । अधोमुखानि अन्तर्मुखानि अक्षाणि इन्द्रियाणि येषां ते अधोक्षाः, तेषु जायते प्रादुर्भवतीति अधोक्षजः उपासकहृदय कमल वासीति यावत् । तस्य सम्बुद्धिः । एवम्भूतोऽपि सौलभ्यात् सिंहाद्रीश, लक्ष्मीधर, विभवं महिमानं जुघुक्षतोऽपि गूहितु मिच्छतोऽपि पुच्छस्य वालस्य उत्पुच्छन मुन्नमनं, मूर्छनोद्धतिः, तिर्यक्प्रसरणवेगः । उत्पुच्छनोद्धति, मूर्छनोद्धति श्चेति वा, ताभ्यां धुतः कम्पितः, व्यावर्तितः भ्रामितः अत एव आवर्तवान् जलभ्रमणवान् य स्संवर्तार्णवः प्रलयजलधिः

तस्य नीरपूरे सलिलप्रवाहे विलुठतः ससम्भ्रमं सञ्चरतः पाठीनस्य मीनस्य दिव्याकृतिः अप्राकृताकारो यस्य, तस्य तथोक्तस्य प्रलयार्णवपयःपूरक्षोभदक्ष स्वपुच्छमूर्छनातिविलक्षणमत्स्यमूर्तेरित्यर्थः। पद्माक्षस्य मत्स्यविग्रहपरिग्रहेऽपि पुण्डरीकप्रकाण्डसदृशेक्षणस्य तव स्वालक्ष्यं- सुतराम् आ समन्तात् साक्षात्कार्यं वैभवं न कथ मालक्ष्यते? स्पष्टं लक्ष्यत एवेत्यर्थः। संवर्तार्णवव्यावर्तनसमर्थ स्वपुच्छोत्पुच्छन मूर्छनोद्धति युत विलक्षण लक्ष्मीक मत्स्यविग्रहपरिग्रहः पद्माक्षत्व ञ्च निगूहित मपि महिमानं प्रादुर्भाव यतीति भावः ॥ १० ॥

*साचलावटतटाकदीर्घिका -*
*जाह्नवीजल विवर्धितः क्षये।*
*शृङ्गसङ्ग मितनौ र्मनोभू-*
*रग्रतोऽण्डजवपु र्हि सुन्दर ॥ ११ ॥*

साचलेति। "मनुस्तावत् तर्पणसमये स्वकमण्डलूद्धृतं क्रमशोऽभिवृद्धिभाजं मत्स्यं दृष्ट्वा भूगर्ते प्रक्षिप्तवान्। तत्राऽपि अपर्याप्ताभिवृद्धिं तटाके प्रक्षिप्तवान्। एवं क्रमेण दीर्घिका जाह्नवी समुद्रेषु प्रचिक्षेप। ततो मत्स्यः प्रलये मनुना सह स्थिरचरनिकरं स्वशृङ्गविधृतनावि निधाय धर्मा नुपादिशत्" इति पौराणिकी प्रसिद्धिः। हे सुन्दर, अण्डजवपुः मत्स्यविग्रहः अचलाया भूम्याः अवटो गर्तः अचलावटः, तेन सहिता स्साचलावटाश्च ताः तटाकदीर्घिकाजाह्नव्यश्च तासां जलेषु विवर्धितः (वृद्धिं) प्रापितः त्वं , क्षये प्रलये प्रलयार्णव इत्यर्थः। मनो रग्रतः शृङ्गसङ्गमितनौः शृङ्गाकारावयविधृततरणि रभू र्हि। अवान्तर प्रलये सर्गबीजभूतं मनुञ्च नावि निधाय तां नावं स्वशृङ्गेण संयम्य मनो रग्रतो धर्मोपदेशपरोऽभूरित्यर्थः। अय मर्थः श्रीरङ्गराजस्तवे "मीनतनुस्त्वं नावि निधाय" इत्यादि श्लोकेनाऽनुसंहितः ॥ ११ ॥

*प्रलयजनीरपूर परिपूरित स्वनिलयावसन्नवदन -*
*भ्रमदशरण्य भूत शरणार्थिनाकि शरणं भवन् स्व कृपया।*
*चलदुदधीरिताम्बुकलुषी क्रियाढ्य गमन स्वपृष्ठ विधृता -*
*चलकुल एष मीनतनु रत्र सुन्दर भुजो वनाद्रिनिलयः ॥ १२ ॥*

प्रलयेति। स्वकृपया स्वतस्सिद्धयाकृपया प्रलयजेन नीरपूरेण परिपूरितस्वनिलयानाम् आक्रान्त स्वस्वस्थानानाम् अत एव अव सन्नवदनानां खिन्नमुखानां भ्रमता मितस्ततो धावताम्, अशरण्यभूतानां शरण्यभूत पूरुषान्तररहितानां शरणार्थिनां रक्षकापेक्षकानां च नाकिनां देवानां शरणं भवन् रक्षको भवन् स्वकृपयैव एतादृश त्रिदशरक्षक स्सन् चलता स्वसञ्चारेण प्रकम्पता उदधिना ईरितस्य निरस्तस्य अम्बुनः कलुषीक्रियायां कलुषताकरणे आढ्यगमन स्सम्पन्नसञ्चारः तादृशवेगवद्गमन इत्यर्थः। स्वपृष्ठविधृताचलकुलः निजपृष्ठभागोद्धृत शैलस्तोमः मीनतनुः मत्स्यमूर्तिः अत्र वनाद्रिनिलये एष सुन्दरभुजः। प्रलयार्णव नीरपूरान्तरितमन्दिरातिविषण्णामर्त्यरक्षणार्थं तदवस्थानयोग्यान् कुलाचलान् मीनतनुः य स्समुद्दधार स एव संसारार्णवमग्ना स्मादृशरक्षणाय वनाद्रिभवनो भवतीति भावः ॥ १२ ॥

*स्वपृष्ठे प्रष्ठाद्रिभ्रमण करणैः किञ्च फणिनो*
*विकृष्टिव्याकृष्टिव्यतिविधुत दुग्धाब्धिचलितैः।*
*अविस्पन्दो नन्द न्विकसदरविन्देक्षणरुचिः*
*पुराऽभू स्सिंहाद्रेः प्रियतम हरे कच्छपवपुः ॥ १३ ॥*

स्वेति। हे सिंहाद्रेः प्रियतम सिहाद्रिवल्लभ हरे, पुरा पूर्वकाले प्रकर्षेण तिष्ठतीति प्रष्ठः ''प्रष्ठोऽग्रगामिनि'' इति निपातना त्साधुः। स्वपृष्ठे प्रष्ठस्य निजपृष्ठभागनिष्ठस्य अद्रेः मन्दरपर्वतस्य भ्रमणकरणैः भ्रामणैः किञ्च फणिनःमथनसाधनयोक्त्रीकृतस्य वासुकेः विकृष्टिव्याकृष्टिभ्यां आकर्षणाप कर्षणाभ्यां व्यतिविधुतस्य अतिमात्रं कम्पितस्य दुग्धाब्देः क्षीरसागरस्य

चलितैः चलनैः अविस्पन्दः निष्कम्पः स्वपृष्टनिष्ठस्य मन्थाचलस्य भ्रमणैः स्वस्याऽपि भ्रमणं सम्भावितं मन्थनाचलचलननिबन्धनरज्जुभूत-सर्पाकर्षणापकर्षणातिमात्रकम्पित जलधिजलचलनेनाऽपि स्वस्य चलनं सम्भावितम्, तथाऽपि अविस्पन्द इत्यर्थः । नन्दन् समाश्रित संरक्षणक्षमभारलाभेन अतिप्रीतिमान् अत एवारविन्देक्षणरुचिः विकस्वरनलिन समाननयनकान्तिः कच्छपवपुः कर्ममूर्ति रभूः । स्वविग्रहक्लेशेऽपि प्रणतजनत्राण लाभाभिनन्दी भवा निति भावः ॥ ९३ ॥

*जगत्प्रलीनं पुन रुद्दिधीर्षत*
*स्सिंहक्षितिक्षिन्निलयस्थ सुन्दर ।*
*पुरावराहस्य तवेय मुर्वरा*
*दंष्ट्राह्वयेन्दोः किल लक्ष्म लक्षिता ॥ ९४ ॥*

जगदिति । हे सिंहक्षितिक्षिन्निलयस्थ, सिंहक्षितिक्षित् सिंहाद्रिः स एव निलयो वासस्थानं, तत्र तिष्ठतीति तथोक्त, सुन्दर, पुरा प्रलीनं प्रलयार्णव मग्नं जगत् पुनरुद्दिधीर्षतः उद्धर्तु मिच्छतः वराहस्य तव दंष्ट्राह्वयेन्दोः दंष्ट्रानामक चन्द्रमसः इय मुर्वरा भूमिः. "उर्वरा सर्वसस्याढ्या' इत्यमरः । लक्ष्म लक्षिता किल कलङ्कतया अवलोकिता हि । तादृग्विधमहाविग्रहो वराहो भवा नभवत् इति भावः । एतेन एतादृशाभिनिवेशेन प्रलयाब्धिमध्यप्रलीन जगदुद्धारक स्त्वं संसार सागर मग्ना नस्मानपि उत्तारयेति पर्यवसित मिति मन्तव्यम् ॥ ९४ ॥

*न वायुः पस्पन्दे ययतु रथवाऽस्तं शशिखी*
*दिशोऽनश्य न्विश्वाऽप्यचल दचला साचल कुला ।*
*नभश्च प्रश्च्योति क्वथित मपिपाथो नरहरौ*
*त्वयि स्तम्भे शुम्भद्वपुषि सति हे सुन्दरभुज ॥ ९५ ॥*

नेति । हे सुन्दरभुज, नरहरौ त्वयि स्तम्भे हिरण्यासुर गृहस्तम्भे

शुम्भद्वपुषि शोभमानविग्रहे सति प्रादुर्भवति सतीत्यर्थः। वायुर्न पस्पन्दे। 'स्पदि किञ्चिच्चलने' इति धातुः। ईषदपि न चचाल, भीत्येति भावः। अथवा अथ च शशिखी चन्द्रसूर्यौ अस्त मदर्शनं ययतुः प्रापतुः। दिशः प्राच्यादयः अनश्यन् नष्टाः। णश अदर्शने। विवच्य नष्टाः। साचलकुला शैलसमूह सहिता, विश्वा समस्ताऽप्यचला, न चलतीत्यचला इति निरुक्ता भूमिः अचलत् चलिता। नभश्च प्रश्च्योति प्रकर्षेण क्षरितम्, श्च्युतिर् क्षरणे। नभ स्समुद्रमग्नं भवतीत्यर्थः। अन्तरिक्ष म प्यन्तरित मिति यावत्। पाथोऽपि पयोधिजल मपि क्वथितं निष्पक्वम्। औष्ण्याधिक्येनोद्वेल घूर्णमभू दिति यावत्। श्च्योतः क्षरणं तदस्यास्तीति श्च्योति। ''निष्पक्वं क्वथितम्' इत्यमरः। निष्पक्व मतिपक्वम्। प्रह्लादप्रतिपक्षशिक्षणाय प्रादुर्भवन्नरसिंह-संहननसाक्षात्कारक्षमाणां क्षमादिपञ्चभूतानां चाञ्चल्य मभूदिति भगवतः स्वाश्रिताहितानुग्रहनिग्रहौ सुग्रहावभिहितौ। दिश आकाशादिपञ्च स्वन्तर्भाव इति अस्मत्सिद्धान्तः॥ ९५॥

उक्तमेव विवृणोति -

***अरालं पातालं त्रिदशनिलयः प्रापितलयो***
***धरित्री निर्धूतायु रपि दिशः का मपि दिशम्।***
***अजृम्भिष्टाम्भोधि र्घुमुघुमिति घूर्णन् सुररिपो -***
***र्विभिन्दाने वक्ष स्त्वयि नरहरौ सुन्दरभुज॥ ९६॥***

अरालमिति। हे सुन्दरभुज, नरहरौ नरसिंहे त्वयि सुररिपो र्हिरण्यासुरस्य वक्षो विभिन्दाने विभिन्नं कुर्वति सति पातालम् अरालं वक्रमभूत् व्यत्यस्त मभूत्। त्रिदशनिलयः स्वर्गः प्रापितलयः गमितविगमः, नष्टोऽभूत्। धरित्री भूमि र्निर्धूता अतिमात्रकम्पिता, दिशः कामपि दिशं ययुः, अन्तर्हिता इत्यर्थः। अम्भोधिः घुमुघुमिति ध्वनिना घूर्णन् भ्रमन्सन् अजृम्भिष्ट जृम्भितोऽभूत्, उद्वेलोऽभूदित्यर्थः। जृभि गात्रविनामे इति धातो रात्मनेपदि लुङेकवचनम्॥ ९६॥

*नखक्रकचकप्रधिक्रथित दैत्य वक्षः स्थली*
*समुत्थरुधिरच्छटाच्छुरित बिम्बितं स्वं वपुः ।*
*विलोक्य रुषितः पुनः प्रति मृगेन्द्रशङ्कावशा -*
*द्य एष नरकेसरी स इह दृश्यते सुन्दरः ॥ १७ ॥*

नखेति । नख एव क्रकचकः करपत्रमुख्यः खड्गविशेषः क्रकचोऽस्त्री करपत्रम्'' इत्यमरः । तस्य प्रधिः नेमिः कोटिरिति यावत् । ''नेमिः स्त्री स्या त्प्रधिः पुमान्'' इत्यमरः । नखक्रकचकप्रधिना क्रथितायाः भिन्नायाः दैत्यवक्षः स्थल्याः समुत्थया समुत्पन्नया रुधिरच्छटया रक्तपूरेण छुरितं बिम्बितं प्रसक्तप्रतिबिम्बं स्व वपुः विलोक्य । बिम्बित मिति भावे क्तः । यो नरकेसरी नरसिंहः प्रतिमृगेन्द्रशङ्कावशात् प्रतिद्वन्द्विसिंहान्तर सन्देहाक्रान्त्या पुनः भूयोऽपि रुषितः कुपितो भवन् स एष नरकेसरी इह सुन्दरो दृश्यते । अद्याऽपि समाश्रितद्वेषि निरसनोद्युक्तो वर्तत इत्यर्थः ॥१७॥

*क्षिति रियं जनिसंहृतिपालनै -*
*र्निगिरणोद्गिरणोद्धरणै रपि*
*वनगिरीश तवैव सती कथं*
*वरद वामन भिक्षण मर्हति ॥ १८ ॥*

क्षिति रिति । हे वरद, सर्वेषां सर्वाभीष्टप्रद, वामन, महाबलि सकाशात् पदत्रययाचनाय परिगृहीतवामनवेष, वनगिरीश, जनिसंहृतिपालनैः सृष्टिसंहाररक्षणैः निगिरणं प्रलये स्वकुक्षिनिक्षेपः उद्गिरणं पुन र्वमनं, उद्धरणं समुद्रमध्या दुद्धारः - एतै रपि तवैव सती भवत एव द्रव्यभूता इयं क्षितिः कथं वा भिक्षण मर्हति? भिक्षार्हा भवति ? परद्रव्यं किल भिक्षार्ह मिति भावः । समाश्रितपरिपन्थिना मपि धर्मसम्बन्धे सति । तदनुसारेणाऽवतीर्य निराकरणं भक्तोऽभिमत मिति सिद्धम् ॥ १८ ॥

*भार्गवः किल भवन् भवान् पुरा*
*कुन्दसुन्दरवनाचलेश्वर*

*अर्जुनस्य बलदर्पितस्य तु*
*च्छेत्स्यति स्मरति बाहुकाननम् ॥ ९९ ॥*

भार्गव इति। हे कुन्दसुन्दरवनाचलेश्वर ! कुन्दद्रुमसुन्दर वनगिरिनाथ, पुरा किल भार्गवः परशुरामो भवन् भवान् बलदर्पितस्य बाहुबलेन गर्वितस्य अर्जुनस्य कार्तवीर्यस्य बाहुकानन न्तु वनसमान बाहुसहस्रं , तु विशेषेण छेत्स्यति अच्छैत्सीत्, तत् स्मरति । "शेषे प्रथमः" इत्यनुशासनात् भवच्छब्दानुगुणः प्रथमपुरुषप्रयोगः । अभिज्ञावचनेलृट्" इत्यनुशासनात् स्मरतिपद समभिव्याहारानुगुणो भूतार्थे लृट् प्रयोगः । अनेकक्षत्रिययूथनिधनविधाना दपि कार्तवीर्यार्जुनबाहुसहस्रच्छेदोऽति दुष्कर इति भावः ॥ ९९ ॥

*आज्ञा तवाऽत्र भवती विदिता त्रयी सा*
*धर्मं तदुक्त मखिलेन वनाद्रिनाथ*
*अन्यून माचरितु मास्तिकशिक्षणार्थ -*
*मत्रावतीर्य किल सुन्दर, राघवोऽभूः ॥ १०० ॥*

आज्ञेति । हे वनाद्रिनाथ, सुन्दर, "अत्रभवत्तत्र भवच्छब्दौ पूज्यार्थौ" इत्यनुशासनात्, अत्र भवती पूज्या, सा त्रयी तत् वेदत्रयम् "स्त्रिया मृक्साम युजुषी, इति वेदा स्त्रय स्त्रयी" इत्यमरः । तवाऽऽज्ञा विदिता, तवाऽऽज्ञात्वेन प्रसिद्धा । तदुक्तं तत्तद्वर्णाश्रमाद्यनुष्ठेयतया तया त्रय्या प्रतिपादितं धर्मं आस्तिकशिक्षणार्थं शास्त्र वश्य शिक्षायै अखिलेन अन्यूनं, न्यूनं अङ्गवैकल्यं, तद्रहितं यथा तथा, आचरितुं अनुष्ठातुं, अत्राऽ वतीर्य राघवोऽभूः, "रामो विग्रहवान् धर्मः" इत्युक्तप्रकारेण पितृवचनपरिपालन शरणागत संरक्षणादि समस्तधर्मव्यवस्थापको दाशरथि रभूः । तदुक्तं भगवद्गीतायाम् - "यद्य दाचरति श्रेष्ठ स्तत्तदेवेतरो जनः, स यत्प्रमाणं कुरुते, लोक स्तदनुवर्तते" इत्यादि ॥ १०० ॥

*वनगिरिपति रीशितेति देवै -*
*स्त्रिपुरहर त्रिपुरघ्नचाप भङ्गात् ।*
*व्यगणि परशुराम दर्शितस्य*
*स्वकधनुषः परिमर्शदर्शनाच्च ॥ १०१ ॥*

वनगिरिपति रिति । देवैः कर्तृभिः त्रिपुरहरस्य रुद्रस्य त्रिपुरघ्नः त्रिपुरहननसाधनभूतो यश्चापः जनकचक्रवर्तिना सीतापरिणय परिपणतयाऽऽरोपणीय इति प्रदर्शितः शिवचापः तस्य भङ्गात्, ततःपरं परशुराम दर्शितस्य द्वन्द्वयुद्धार्हबलपरीक्षार्थं परशुरामेण प्रदर्शितस्य स्वकधनुषः वैष्णवधनुषः परिमर्शदर्शनात् अप्रयत्नारोपणवीक्षणाच्च वनगिरिपति रीशिता सर्वेश्वर इति व्यगणि परिगणितः, निर्णीत इत्यर्थः । ‘‘आत्मानं मानुषं मन्ये रामं दशरथात्मजम्’’ इति स्वमाहात्म्य मनाविष्कुर्वतोऽपि परत्वं स्फुरतीति भावः ॥ १०१ ॥

*अनवाप्त मत्र किल लिप्स्यते जनै-*
*र्न च लब्ध मेत दिह भोक्तु मिष्यते ।*
*अनवाप्त मत्र किल नास्ति राम त -*
*ज्जगती त्वया तृण मवैक्षि सुन्दर ॥ १०२ ॥*

अनवाप्त मिति । हे राम सुन्दर, रामतयाऽवतीर्णसुन्दर अत्र जनै रनवाप्त मलब्धं किल भोक्तुं लिप्स्यते वाञ्छ्यते । इह भोक्तुं लब्धं एतत् वाञ्छितं वस्तु न चेष्यते सिद्धे इच्छा विरहात् । अत्राऽन वाप्तं नास्ति किल । तत् अवाप्तसमस्तकामत्वात् त्वया जगती भूमिः तृण मवैक्षि, तृणव दत्यल्पं दृष्टम् । उभयविभूतिनायकस्य इक्ष्वाकुराज्य मत्यल्पं प्रत्यभात् इतरथा त्यागासम्भवा दिति भावः ॥ १०२ ॥

*शिखरिषु विपिने ष्वप्यापगा स्वच्छतोया*
*स्वनुभवसि रसज्ञो दण्डकारण्यवासान् ।*
*तदिह तदनुभूतौ साभिलाषोऽद्य राम*
*श्रयसि वनगिरीन्द्रं सुन्दरीभूय भूयः ॥ १०३ ॥*

शिखरिष्विति । हे राम, रसज्ञः रसिक स्त्वं शिरवरिषु चित्रकूटादि शैलेषु विपिनेषु अच्छतोया स्वपगास्वपि माल्यवती मन्दाकिनी पम्पानदीषु च। तत्त दुपवनेष्वपि दंण्डकारण्यवासान् अनुभवसि। "चित्रकूट मनुप्राप्य भरद्वाजस्य शासनात् । रम्य मावसथं कृत्वा रममाणा वने त्रयः। देवगन्धर्वसङ्काशा स्तत्र ते न्यवसन् सुखम्"। इत्याद्युक्तप्रकारेण अरण्यवाससुख मनुभवसीत्यर्थः । "चिरनिर्वृत्त मप्येतत् प्रत्यक्ष मिव दर्शितम्" इति चिरनिर्वृत्तस्याऽपि प्रत्यक्षीकरणा दनुभवसीति लट् प्रयोगः । तत् तस्मात्कारणात् तदनुभूतौ शिखरिविपिनापगाद्यनुभवे साभिलाष स्सन् इह जगति, अद्य वर्तमानकाले, भूयः पुनरपि, रामावतारा दनन्तरमपि सुन्दरीभूय सुन्दरो भूत्वा वनगिरीन्द्रं नूपुरापगाविद्योतितं वनाद्रिं आश्रयसि "सुभग श्चित्रकूटोऽसौ गिरिराजोपमो गिरिः । यस्मिन् वसति काकुत्स्थः कुबेर इव नन्दने" इत्युक्तचित्रकूटसदृशो वनशैल इति भावः ॥ १०३ ॥

दण्डकारण्यवासेऽपि कचित् क्लेशविशेषस्य सत्त्वात् तादृशश्रमहरो वनगिरि रेवेत्याह -

*उपवनतरुषण्डै र्मण्डिते गण्डशैल*
*प्रणयि भवदुदन्तोद्गायि गन्धर्वसिद्धे।*
*वनगिरितटभूमिप्रस्तरे सुन्दर, त्वं*
*भजसि नु मृगयानानुद्रवश्रान्ति शान्तिम् ॥ १०४ ॥*

उपवनेति । हे सुन्दर, उपवनतरुषण्डैः आरामद्रुमस्तोमैः मण्डितेऽलङ्कृते।" 'गण्डशैला स्तु च्युताः स्थूलोपला गिरेः" इत्यमरः । गन्धर्वाश्च सिद्धाश्च गन्धर्वसिद्धाः । गण्डशैलप्रणयिनः शैलच्युत स्थूलोपलवासरसिकाः भवदुदन्तोद्गायिनः त्वच्चरित्रगानशीलाश्च गन्धर्वसिद्धाः यस्मिं स्तथोक्ते वनगिरितटभूमिप्रस्तरे वनगिरितटभूमिपर्यन्त शिलायां मृगयानानुद्रवश्रान्तिशान्तिं मारीचमृगगमनानुधावन श्रमोपशमं भजसि । नु शब्दः उत्प्रेक्षाद्योतकः ॥ १०४ ॥

*कूलेऽब्धेः किल दक्षिणस्य निवसन् दूरोत्तराम्भोधिगान्*
*दैत्या नेकपतत्रिणाऽच्छिन तीयं किं वदन्ती श्रुता।*
*तत्रैवेश्वर मम्भसां व्यजयथा स्तस्मा द्वनाद्रीश्वर*
*श्रीमन् सुन्दर सेतुबन्धनमुखाः क्रीडा स्तवाऽऽडम्बरम्॥ १०५॥*

कूले इति। हे वनाद्रीश्वर, श्रीमन्, सुन्दर, दक्षिणस्याब्धेः कूले निवसन् स त्वं दूरोत्तराम्भोधिगान् अतिदूरोदीच्य समुद्रद्वीपगतान् दैत्यान् एकपतत्रिणा एकेन सायकेन आच्छिनः। छिन्नानकरोः। इतीयं इत्येवम्प्रकारा किंवदन्ती वृत्तान्तः श्रुता, श्रीरामायणे इतिशेषः। ''किं वदन्ती जनश्रुतिः, वार्ता प्रवृत्ति र्वृत्तान्त उदन्त स्स्यात्'' इत्यमरः। तत्रैव दक्षिणाब्धिकूले एव अम्भसामीश्वरं समुद्रं व्यजयथाः विजितवान्। तस्मात्कारणात् तव सेतुबन्धनमुखाः क्रीडाः आडम्बरम्, ख्यात्यर्थो व्यापार इत्यर्थः। बहुदेशव्यवहितोदीच्यसमुद्रद्वीपस्थदैत्यस्तोम मेकसायकेन जितवत स्तव तत्र स्थित्वैव लङ्काद्वीपस्थरक्षस्संशिक्षणे सुशके सागरपराजयपूर्वक सेतुनिर्माणप्रभृतिनर्मविचेष्टितानि ख्यात्यर्थानीति निष्कृष्टार्थः। अच्छिन इति परस्मैपदिलङ्मध्यमैकवचनम्॥ १०५॥

रामावतार मनोहरव्यापारोपसंहाराय उपवनतरुषण्डै रित्यादि पूर्वोक्तश्लोकार्थ मेव वनभूधर भोग्यतातिशय सूचकतया भूयोऽप्यनुवदति-

*रघुकुलतिलक त्वं जातु चिद्यातुधान -*
*च्छलमृगमृगयायां सम्प्रसक्तः पुराऽभूः।*
*तदुपजनित खेदच्छेदनायाऽद्य गाय -*
*न्मधुकर तरुषण्डं रज्यसे किं वनाद्रिम्॥ १०६॥*

रघुकुलतिलकेति। हे रघुकुलतिलक, त्वं पुरा, जातुचित् कदाचित्, यातुधानएव राक्षस एव छलमृगः तस्य मृगयाया माखेटने मृगसंहारानुगुणव्यापारे। ''आखेटनं मृगव्यं स्या दाखेटो मृगया स्त्रियाम्'' इत्यमरः, सम्प्रसक्तः सम्यगासक्तोऽभूः। तदुपजनितखेदच्छेदनाय

मारीचमायामृगयातिप्रसक्ति सञ्जात श्रमोपशमनाय, अद्य इदानीं गायन्तो मधुकरा भृङ्गाः यस्मिन् तत् तरुषण्डं द्रुमबृन्दं यस्मिं स्तत्तथोक्तम्। वनाद्रिं रज्यसे किम्? अनुरक्तो भवसि किम्? तादृशो वनशैलभोग्यतातिशय इत्याशयः ॥ १०६ ॥

*हे सुन्दरैकतर जन्मनि कृष्णभावे*
*द्वे मातरौ च पितरौ च कुले अपि द्वे।*
*एकक्षणा दनुगृहीतवतः फलन्ते*
*नीला कुलेन सदृशी किल रुक्मिणी च ॥ १०७ ॥*

हे इति। हे सुन्दर, एकतरजन्मनि एकस्मिन्नवतारे कृष्णभावे कृष्णत्वे द्वे मातरौ च देवकीयशोदे द्वौ पितरौ च वसुदेवनन्दगोपौ द्वे कुले अपि क्षत्रियकुल-गोपालकुले एकक्षणात् स्वल्पकाले नैव अनुगृहीतवतः आदरेण परिगृहीतवतः ते फलं रुक्मिणी नीला च कुलेन सदृशी किल, क्षत्त्रियकुलसदृशी रुक्मिणी, गोपालकुल सदृशी नीलामातृपितृकुल द्वयपरिग्रहः भिन्नान्वयजपत्नीद्वयपरिग्रहार्थ मित्यर्थः ॥ १०७ ॥

*त्वं हि सुन्दर यदा स्तनन्धयः*
*पूतनास्तन मधा स्तदा नु किम्?*
*जीर्ण मेव जठरे पयोविषं*
*दुर्जरं वद तदात्मना सह ॥ १०८ ॥*

त्वमिति। हे सुन्दर त्वं यदा हि स्तनन्धय स्सन् पूतनास्तनं अधाः अपिबः। धेट् पाने इति धातोर्लुङ् परस्मैपदि मध्यमैकवचनम्। तदा नु दुर्जरं इतरैर्जरयितु मशक्यं पयोविषं पयोरूपं विषं तदात्मना, तस्याः पूतनायाः आत्मना जीवेन सह जठरे उदरे, जीर्ण मेव किम्, वद। त्वयैवोत्तरं वक्तव्यम् स्तनन्धयदशाया मेव पूतना जीवेन सह इतर दुर्जरं तदीय स्तन्य विषं जीर्णं कुर्वं स्त्वमेव शङ्कां परिहर इति भावः ॥ १०८ ॥

*आश्रयेषु सुलभो भवन्भवान्*
*मर्त्यतां यदि जगाम सुन्दर ।*
*अस्तु नाम तदुलूखले किय -*
*द्दामबद्ध इति किं तदाऽरुदः ? ॥ १०९ ॥*

आश्रयेष्विति । हे सुन्दर, आश्रयेषु सुलभो भवन् आश्रयणफल-परिचरणयोग्यो भवन् मर्त्यतां जगाम यदि, मर्तुं योग्या मर्त्याः. इत्याद्युक्त-मनुष्यतां प्राप यदि, त दस्तु नाम स्वसङ्कल्पित सौलभ्यानुकूलत्वात् मर्त्यत्वं भवतु नाम तदा उलूखले व्रीह्याद्यवहनन साधन दारुविशेषे कियता कियत्परिमाणेन दाम्ना रज्ज्वा बद्ध इति हेतोः किं मरुदः ? यद्वा, दामबद्ध इति किय दरुदः ? उच्चैः बहुरोदनं कृतवान् । समाश्रित सौलभ्यलाभाय मनुष्यभावनाजुषः तवोलूखलबन्धन मपि अत्यन्तानुकूल मेवेति प्रीति समयोदितं रुदितं शङ्कावह मिति भावः । पूर्वस्मिन् श्लोके जीर्णमेव किम्? इति प्रश्नः परत्वसूचकः । अत्र श्लोके कि मरुदः ? इति प्रश्नः सौलभ्यातिशय सूचक इति विवेकः ॥ १०९ ॥

*सुन्दरोरुभुज नन्दनन्दन -*
*स्त्वं वा न्भ्रमरविभ्रमालकः ।*
*मन्दिरेषु नवनीततल्लजं*
*वल्लवीधिय मुत व्यचूचुरः ॥ ११० ॥*

सुन्दरेति । हे सुन्दरोरुभुज, भ्रमराणां भृङ्गाणां विभ्रम इव विभ्रमो विलासो येषां ते तथोक्ताः अलका यस्य स तथोक्तः, अतिसुन्दरालक इत्यर्थः । नन्दनन्दनोभवन् गोपकुमारो जयमानः त्वं मन्दिरेषु गोपालागारेषु नवनीततल्लजं नवनीतश्रेष्ठं, उत यद्वा वल्लवीधियं गोपाङ्गनाचेतनां व्यचूचुरः अमूमुषः उभयम प्यपाहरः अत्यन्तकान्तदिव्यमङ्गलविग्रहस्य नन्दनन्दनस्य भवतो नवनीतापहारो, गोपीजनमनोहरोऽभव दिति भावः ॥ ११० ॥

*कालियस्य फणतां शिरस्तु मे*
*सत्कदम्ब शिखरत्व मेव वा।*
*वष्टि जुष्टवनशैल सुन्दर*
*त्व त्पदाब्ज युग मर्पितं ययोः ॥ १११ ॥*

कालियस्येति। हे सुन्दर, जुष्ट स्सेवितः वनशैलो येन तथोक्त, त्वत्पदाब्जयुगं ययोः कालियफणशिखर कदम्बशिखरयोश्च अर्पितं न्यस्तं मे शिरस्तु तां कालियफणतां कृष्णनटनस्थान कालियफणशिरःस्थानं सत्कदम्बशिखरत्वं, कृष्णचरणार्पणयोग्यतया शोभननीपद्रुमशाखात्व मेव वा वष्टि वाञ्छति। "दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः।" इति, "अरण्ये सन्ति पत्राणि नद्यां स्वादूदकानि च। सन्ति हस्तौ च पादौ च कथं नाऽऽराध्यते हरिः" इति च भगवदाश्रयणोपयोगिकरचरणादि विशिष्टेऽपि मनुष्यत्वे एव मम नाऽऽदरः भगवच्चरणार्पणोपयुक्तेचेत् तिर्यक्स्थावरत्वे एव मम अत्यन्तावश्यके इति भावः ॥ १११ ॥

*गूहित स्वमहिमाऽपि सुन्दर,*
*त्वं व्रजे किमिति शक्र माक्रमीः।*
*सप्तरात्र मदधाश्च किं गिरिं*
*पृच्छतश्च सुहृदः किमक्रुधः ॥ ११२ ॥*

गूहितेति। हे सुन्दर, गूहितस्वमहिमाऽपि तिरोहितस्वाभाविक वैभवोऽपि त्वं व्रजे नन्दव्रजे किमिति मतिं कृत्वा शक्रं स्वाराधनव्याघातविधानात् आयोधनोन्मुखं शतमखं आक्रमीः आक्रान्तवानसि? यद्वा पुरुहूताराधनव्याघात एवाऽऽक्रमणम्। सप्तानां रात्रीणां समाहारः सप्त रात्रम्। अत्र रात्रिशब्दो दिवारात्रपरः ॥ "कालाध्वनो रत्यन्तसंयोगे द्वितीया" गिरिं गोवर्धनं अदधाः धृतवान्। पृच्छतः अतिमात्रं गोवर्धनोद्धरण मवेक्ष्य भवान् "देवो वा सिद्धो वा" इति प्रश्नं कुर्वतः सुहृदः कि मक्रुधः किमर्थ मकुप्यः। स्वमहिमनिगूहनोद्युक्तस्य शक्राक्रमणं

निरन्तरं सप्तरात्रं गोवर्धनोद्धरणं च पुनः परत्वशङ्काकृतं सुहृदं प्रति क्रोधश्च परस्परव्याहते इति भावः ॥ ११२ ॥

*हे नन्दनन्दन, सुसुन्दर, सुन्दराह्व-*
*बृन्दावने विहरत स्तव वल्लवीभिः ।*
*वेणुध्वनिश्रवणत स्तरुभि स्तदा वै*
*सग्रावभि र्जतुविलाय महो विलिल्ये ॥ ११३ ॥*

हे इति। हे नन्दनन्दन, नन्दगोपानन्दकर, सुसुन्दर, अतएव सुन्दराह्व, अन्वर्थनामधेयेत्यर्थः। तदा तस्मिन् काले बृन्दावने, वल्लवीभिः गोपिकाभिः विहरतः क्रीडितः तव वेणुध्वनिश्रवणतः वेणुनादाकर्णनात् सग्रावभिः अश्मसहितैः तरुभिः, ग्रावभि स्तरुभिश्चेत्यर्थः। प्राप्तकाठिन्यै रपीति यावत्। जतुविलायं विलल्ये, जतु यथा विलीनं भवति तथा विलीन मित्यर्थः। जतुविलाय मित्यत्र "उपमाने कर्मणि च" इति णमुल् प्रत्ययः। विलिल्ये भावे लिट्। नन्दनन्दनत्वे नावतीर्णस्य सुसुन्दरस्य वेणुक्वणनाकर्णनं अत्यन्त कठिनानामपि निष्यन्दहेतु र्भवतीति भावः ॥ ११३ ॥

*गायं गायं वनगिरिपते, त्वं हि बृन्दावनान्त*
*र्गोपीसङ्घै र्विहरसि यदा सुन्दर व्यूढबाहो ।*
*रासारम्भोत्सवबहुविधप्रेम सीमन्तिनीनां*
*चेत, श्चेत स्तव च तु तदा कान्दशा मन्वभूताम् ॥ ११४ ॥*

गायं गायमिति। व्यूढः वित्तः दृढो वा। हे सुन्दरव्यूढबाहो ! यद्वा, गोपीसङ्घै र्व्यूढबाहो संश्लिष्टबाहो, सुन्दर, बृन्दावनान्तः बृन्दावनान्तराले, गायं गायं गानं कृत्वा गानं कृत्वा, पायं पाय मितिवन्मन्तव्यम्, णमुल् प्रत्ययान्त मव्ययम्। गोपीसङ्घै स्सह, विहरसि क्रीडसि। हीति प्रसिद्धौ। पक्षान्तरे गायं गायं विहरसीत्यन्वयः। तस्मिन् काले समये तु "अङ्गना-मङ्गना मन्तरे माधवो माधवं माधव श्चान्तरेणाङ्गना। इत्थ माकल्पिते मण्डले मध्यग स्सञ्जगौ वेणुना देवकीनन्दनः" इत्युक्तप्रकारं अनेकविग्रह-

परिग्रहवतो भगवतोऽनेकगोपिकाभि स्संश्लिष्टभुजस्य वेणुगान सहितो नृत्तविशेषयुक्त क्रीडाविशेषो रास इत्युच्यते। रासारम्भएव उत्सवः, तस्मिन् बहुविधं अनेकविधशृङ्गाररसं प्रेम प्रणयः यस्य तथोक्तम्। सीमन्तिनीनां चेतः तव चेतश्च, कां दशा मन्वभूताम्, अनिर्वचनीयां दशा मन्वभूताम्। रासक्रीडासमये समुत्थितः सुन्दर सुन्दरीजन मनसोर प्यसंवेद्य शृङ्गार रसोऽवाङ्मनसगोचर इत्यर्थः ॥ ११४ ॥

*इङ्गितं निमिषितञ्च तावकं*
*रम्य मद्भुत मतिप्रियङ्करम्।*
*तेन कंसमुख कीटशासनं*
*सुन्दराल्पक मपि प्रशस्यते॥ ११५ ॥*

इङ्गितमिति। हे सुन्दर, तावकं त्वत्सम्बन्धि इङ्गितं भ्रूभङ्गादि, निमिषित ञ्च कटाक्ष श्च, अद्भुत माश्चर्यकरम्, अतिप्रियङ्करम् अतिप्रीतिकरं, रम्यं मनोहरञ्च, भवतीति शेषः। तेन हेतुना अल्पक मपि ईषत्कर मपि कंसमुखकीटशासनं कंसप्रभृतिजन्तु विशेषनिषूदनं प्रशस्यते स्तूयते। सङ्कल्पमात्रसंहृतसमस्त जगतः तव कंसमुखात्यल्पजन्तु निग्रहोऽपि श्लाघ्यते। तत्र हेतु स्त्वत्कृत्यत्वमात्र मित्यर्थः इङ्गितमात्रं पर्याप्तं कंसादि हिंसनायेति पर्यवसितम्॥ ११५ ॥

*वाराणसीदहन पौण्ड्रकभौमभङ्ग-*
*कल्पद्रुमा हरणशङ्करजृम्भणाद्याः।*
*अन्याश्च भारत बल क्रथनादय स्ते*
*क्रीडा स्सुसुन्दरभुज श्रवणामृतानि॥ ११६ ॥*

वाराणसीति। हे सुन्दरभुज, वाराणसीदहनं काशीभस्मीकरणं पौण्ड्रकभौमयोः पौण्ड्रक वासुदेवनरकासुरयोः भङ्गः वधः कल्पद्रुमाहरणं पारिजातापहारः, शङ्करजृम्भणं जृम्भणास्त्रेण शङ्करस्तम्भनम्, उक्तान्येतानि आद्यानि प्रथमानि यासां ता स्तथोक्ताः। भारतबलक्रथनादयः

अष्टादशाक्षौहिणीसङ्ख्याक भारतसेना हननादयः अन्याः ते क्रीडा लीलाश्च श्रवणामृतानि श्रोत्रेन्द्रियात्यन्तरस्याः । ग्रन्थविस्तरभयनिबन्धन स्सङ्ग्रहेणोपन्यास इति मन्तव्यम् ॥ ११६ ॥

अतिसन्निहित कृष्णावतारप्रसङ्गेन तत्समानयोगक्षेमावातर-त्रयावस्थितस्त्वमेव समाश्रितजन सर्वप्रार्थितप्रदोऽसीति सुन्दरबाहु महिमानं श्लोकत्रयेणाऽऽह -

*त्वं हि सुन्दर वनाद्रिनाथ हे*
*वेङ्कटाह्वय नगेन्द्रमूर्धनि ।*
*देवसेवितपदाम्बुजद्वय -*
*स्संश्रितेभ्य इह तिष्ठसे सदा ॥ ११७ ॥*

त्वमिति । हे वनाद्रिनाथ, सुन्दर, त्वं वेङ्कटाह्वयनगेन्द्रमूर्धनि श्री वेङ्कटाख्य महीधराधित्यकायां सदा देवसेवित पदाम्बुजं द्वय स्सन् "यत्र पूर्वे साध्या स्सन्ति देवाः" इत्युक्तनित्य सूरिपरिचरित चरणनलिनयुगल स्सन् इह संश्रितेभ्य स्तिष्ठसे हि । अत्राऽत्यन्तावस्थान मत्रत्याश्रिताभीष्ट-प्रदानार्थ मिति स्वाभिप्रायं प्रकाशयन् तिष्ठसीत्यर्थः । "श्लाघ ह्नुङ् स्थाशपां ज्ञीप्स्यमानः" इति अभिप्राय प्रकाशने चतुर्थी, आत्मनेपदञ्च ॥ ११७ ॥

*हस्ति शैल निलयो भवन् भवान्*
*साम्प्रत वरदराजसाह्वयः*
*इष्ट मर्थ मनुकम्पया ददत्*
*विश्वमेव दयते हि सुन्दर ॥ ११८ ॥*

हस्तीति । हे सुन्दर, आह्वयेन नाम्ना सहित स्साह्वयः वरदराज इति साह्वयः वरदराजसाह्वयः, हस्तिशैलनिलयः करिगिरिवासो भवन् भवान् साम्प्रतमिदानीम् इष्ट मर्थं प्रार्थितं पुरुषार्थं अनुकम्पयैव ददत् तत्तत्साधनानुष्ठानेन विनापीतिभावः । विश्वं जगत् दयते हि दयाविषयं करोति हि ॥ ११८ ॥

*मध्ये क्षीरपयोधि शेषशयने शेषे सदा सुन्दर*
*त्वं तद्वैभव मात्मनो भुवि भवद्भक्तेषु वात्सल्यतः ।*
*विश्राण्याखिलनेत्रपात्र मिहसन् सह्योद्भवाया स्तटे*
*श्रीरङ्गे निजधाम्नि शेषशयने शेषे वनाद्रीश्वर ! ॥ ११९ ॥*

मध्ये इति । हे वनाद्रीश्वर, सुन्दर, त्वं मध्येक्षीरपयोधि क्षीर सागरमध्ये सदा शेषशयने शेषरूपेशयने पर्यङ्के शेषे शयनं करोषि । तत् आत्मनो वैभवं शेषपर्यङ्कशायित्वरूपं स्वस्य प्रभावं भुवि भूम्या मपि भवद्भक्तेषु विषये वात्सल्यतः दोषानादरहेतु स्नेह विशेषात् । विश्राण्य वितीर्य "विश्राणनं वितरणम्" इत्यमरः । अखिलनेत्रपात्रं सन् सकलनयनगोचरो भवन् इह इदानीं सह्योद्भवाया स्तटे कावेर्या स्तीरे निजधाम्नि श्रीरङ्गे । निजधाम्नीति विशेषणेन वैकुण्ठाख्य विमानमेव श्रीरङ्गाख्यं वर्तते इत्यर्थः । शेषशयने शेषे क्षीराब्धिशायिसाक्षात्काराशक्त भक्तजन वात्सल्यात् तत्सेवार्थं समस्तार्चावतारमूलकन्दभूत श्रीरङ्गशायी भवसीति भावः ॥ ११९ ॥

**कल्की भविष्यन् कलिकल्कदूषिता -**
**न्दुष्टा नशेषा न्भगवन्हनिष्यसि ।**
**स एष तस्याऽवसर स्सुसुन्दरः**
**प्रशाधि लक्ष्मीश समक्षमेव नः ॥ १२० ॥**

कल्कीति । हे लक्ष्मीश, भगवन्, सुसुन्दर स्त्वं कल्की हयसादिविशेषः भविष्यन् अवतरिष्यन् सन् कलिकल्केन कलिकालप्रयुक्त कलुषेण दूषितान् निन्दितान् , दुष्टाचारपरा नित्यर्थः । अशेषान् दुष्टान् हनिष्यसि वधिष्यसि तस्य कलिकल्मषदूषितदुष्टहननसमर्थ कल्क्यवतारस्य अवसर स्स एषः कल्क्यवतारयोग्यतया योऽवसरः त्वदीयहृदयङ्गतः स समयः अय मेवेत्यर्थः। अस्माकं समक्षमेव प्रशाधि शिक्षय । त्वया इदानी मेव कल्क्यवतारं कृत्वा दुष्टानां शिक्षा न कृता चेत् आश्रिताना मस्माकं नाशो भवे दिति भावः ॥ १२० ॥

एवं बहुप्रकारेण आश्रितजनोपकारकरान् अवतारान् त्व मेवाऽकरोरिति बहुशोऽभिहितं सुन्दरबाहुविहारमुपसंहृत्य, तत स्त्वमेवाऽऽश्रयणीय इति शरणं व्रजति -

*ईदृशा स्त्वदवतारसत्तमा -*
*स्सर्व एव भवदाश्रितान् जनान् ।*
*त्रातु मेव न कदाचि दन्यथा*
*तेन सुन्दर, भवन्तमाश्रये ।। १२१ ।।*

ईदृशा इति। हे सुन्दर, ईदृशाः उक्तप्रकाराः सर्व एव त्वदवतारसत्तमाः सर्वेष्ववतारेषु श्रेष्ठाः मुख्यप्रादुर्भावाः भवदाश्रितान् जनान् त्रातुमेव "परित्राणाय साधूनाम्" इत्युक्तप्रयोजनार्था इत्यर्थः। यत्र साधुपरित्राणं दुष्कृद्विनाशं विना न घटते, तत्र दुष्कृद्विनाश इत्याशयः। कदाचिदप्यन्यथा प्रयोजनान्तराय न भवन्ति । तेन वनाद्रौ सुन्दरत्वेनाऽवतारस्याऽपि आश्रितपरित्राणफलत्वेन भवन्त माश्रये, ज्ञानशक्तिसौलभ्य शौशील्यवात्सल्यादिकल्याणगुणसम्पन्न माश्रितरक्षणैकदीक्षितं भवन्तं शरणं गतोऽस्मीत्यर्थः ।। १२१ ।।

*त्वामामनन्ति कवयः करुणामृताब्धिं*
*त्वा मेव संश्रितजनिघ्न मुपघ्नमेषाम् ।*
*येषां व्रज न्निह हि लोचनगोचरत्वं*
*है सुन्दराह्व परिचस्करिषे वनाद्रिम् ।। १२२ ।।*

त्वा मिति। हे सुन्दराह्व, कवयः कवनशीलाः भगवद्वाल्मीकिपराशर पाराशर्यपराङ्कुशपरकाल प्रभृतय इत्यर्थः। करुणामृताब्धिं करुणैव अमृतं तस्याब्धिम् उत्पत्तिस्थानम् । यद्वा करुणाया अमृताब्धिं क्षीरसागरं करुणापरिपूर्णं आमनन्ति वदन्ति । त्वामेव संश्रितजनिघ्नं समाश्रितसंसारविनाशकम्, एषां समाश्रितानां उपघ्न माश्रयभूत ञ्च आमनन्ति। "स्या दुपघ्नोऽन्तिकाश्रये" इत्यमरः। उपघ्नं, जनिघ्नं, शरण्यं

शरण श्चेत्यर्थः । येषा माश्रितानां लोचनगोचरत्वं नयनविषयत्वं व्रजन् सन् इह लीलाविभूत्यां वनाद्रिं परिचस्करिषे अलङ्करोषि। "सम्परिभ्यां करोतौ भूषणे" इति सुडागमः । निर्हेतुक कृपापरिपूर्णत्वा च्छरण्यत्वा च्छरणत्वाच्च शरणवरण सौकर्याय समाश्रितनेत्र पात्रं भवन् वनाद्रि भवनो भवसीति भावः ॥ १२२ ॥

**अशक्यं नो किञ्चित्तव न च न जानासि निखिलं**
**दयालुः क्षन्ता चाऽस्यहमपि न चाऽऽगांसि तरितुम् ।**
**क्षमोऽत स्त्वच्छेषो ह्यगति रिति च क्षुद्र इति च**
**क्षमस्वैतावन्नो बल मिह हरे सुन्दरभुज ! ॥ १२३ ॥**

अशक्य मिति। हे सुन्दरभुज, हरे, तवाऽशक्यं नो किञ्चित् न किमपि, किमपि नास्तीत्यर्थः। निखिलं च न जानासीति न, जानास्येव। सर्वशक्ति स्सर्वज्ञश्चेत्यर्थः। दयालुः परदुःखासहिष्णुः, क्षन्ता अपराधसहिष्णुश्चाऽसि। अह मपि आगांसि अपराधान् तरितुञ्च प्रायश्चित्तादिना विनाशयितुञ्च न क्षमः न शक्तः । अतः अस्मात्कारणात् तव सर्वज्ञत्वसर्वशक्तित्व दयाक्षमाविशिष्टत्वान्मम च दुष्कृतनिष्कृत्यक्षमत्वाच्च। हि शब्दः इति - शब्दार्थकः । त्वच्छेषो हि त्वद्दासं इति अगति रिति च उपायान्तर रहित इति च क्षुद्रः क्षुद्रपुरुषार्थतृप्त इति च क्षमस्व। यद्वा, क्षुद्र इत्यकिञ्चन इति च आगांसि क्षमाविषयं कुरुष्व। इह संसारे नः अस्माकं एतावद्बलं मया अनुसंहितं भवतो ज्ञानशक्तिदयाक्षमा वैशिष्ट्यं मयाऽनुसंहितं, मम च दासत्वाकिञ्चन्यानन्य गतित्वनिभृतत्वञ्च बलं साधन मित्यर्थः॥ १२३ ॥

*लङ्कायुद्धहतान् हरीन् द्विजसुतं शम्बूकदोषान्मृतं*
*सान्दीपिन्यभिज म्मृतं द्विजसुतान् बालांश्च वैकुण्ठगान् ।*
*गर्भ श्चार्जुनिसम्भवं व्युदधर स्स्वेनैव रूपेण य-*
*स्स्वाभीष्टं मम मद्गुरोश्च ददसे नो किं वनाद्रीश्वर ! ॥ १२४ ॥*

लङ्केति । हे वनाद्रीश्वर, यः लङ्कायुद्धहतान् हरीन् वानरान्,

शम्बूकदोषात् शम्बूकाख्यशूद्रस्य अधश्शिरस्त्वेन तपश्चरणरूपपापात् मृतं द्विजसुतम्। इदं द्वयमपि रामावतारकालिकं; मृतं सान्दीपिन्यभिजं कृष्णगुरुस्सान्दीपिनिः तदभिजं तत्सुतं, वैकुण्ठगान् प्राप्तवैकुण्ठान् बालान् शिशून् द्विजसुतांश्च, द्वारकावासिवैदिकपुत्रांश्च आर्जुनिः अर्जुन स्यापत्यमभिमन्युः तत्सम्भवं गर्भञ्च अभिमन्युना उत्तराया माहितं गर्भञ्च स्वेनैव रूपेण मरणकालिकतत्तद्वयोवेषभूषणादिना आकारेण, व्युदधरः विशेषेणोद्धृतवानभवः। जीवेन सह पुनरानयः। स त्वं मम मद्गुरोः "अस्मद्गुरो र्भगवतः" इत्युक्तरामानुजस्य च स्वाभीष्टं स्वाभिलषितं किमर्थं नो ददसे, न ददासि ? 'दद दाने' इति धातुः रामानुजगुरो रभिलषितं श्रीरङ्गनाथ सन्निधिवास तत्परिचर्यादिकं ममाभिलषितं भगवद्रामानुज सन्निधिवासं तत्परिचर्यादिकमिति विवेकः। कालान्तरमृता न पुनरावृत्तियुक्तलोकान्तर गतानपि मरणकालीना कारेणैव पुन रानीतवत स्तव अशक्यं न किमपि, वयमप्याश्रिताः, किमित्यभीष्टं न ददासीत्यर्थः ॥ १२४ ॥

स्वकीयविषयवासमात्रतृप्त स्त्वं प्रबलफलप्रदोऽसीत्याऽऽह श्लोकचतुष्टयेन -

*आयोध्यगान् स पशुकीटतृणांश्च जन्तून्*
*किं कर्मणो नु बत !कीदृश वेदानाढ्यान्।*
*सायुज्यलभ्य विभवान् निजनित्यलोकान्*
*सान्तानिका नगमयो वनशैलनाथ ! ॥ १२५ ॥*

आयोध्यगानिति। हे वनशैलनाथ ! अयोध्यासम्बन्धिनो देशा आयोध्याः, तान् गच्छन्तीति तथोक्ताः, साक्षा दयोध्यावासिन एव न, अयोध्यासम्बन्धिदेशवासिनोऽपीत्यर्थः। सपशुकीटतृणान् - पशवश्चतुष्पादः, कीटः अतिक्षुद्रजन्तुविशेषः, पशुकीटतृणसहितान् जन्तून् प्राणिनः किंकर्मणो नु - किं कीदृशं कर्म येषा न्ते किंकर्माणः, तान्। नु प्रश्नार्थः। "नु पृच्छायां विकल्पे च" इत्यमरः। कीदृशेन वेदनेन ज्ञानेन

आढ्यान् सम्पन्नान् कर्मयोग ज्ञानयोगशून्या नपि कर्मयोगनिष्ठान् मत्वा, ज्ञानयोगनिष्ठान् वा मत्वा इत्यर्थः। सायुज्ये सायुज्यमोक्षे लभ्यो विभवः सम्पत् येषां ते तथोक्तान् निजनित्यलोकान् सत्यलोका दुपर्यवस्थितान् श्रीवैकुण्ठतुल्यभगवदनुभवानुकूल्यान्, केचन सान्तानिका नाम, ता नगमयः प्रापयः, अयोध्यासम्बन्धिदेशासत्तिमात्रेण प्रापयः इत्यर्थः ॥ १२५ ॥

*हरितवारण भृत्यसमाह्वयं*
*करिगिरौ वरद स्त्व मपूर्विकाम् ।*
*दृश मलम्भय एव हि सुन्दर,*
*स्फुट मदाश्च परश्शत मीदृशम् ॥ १२६ ॥*

हरितेति। हे सुन्दर, करिगिरौ हस्तिशैले वरदः वरदराजो भवं स्त्वं, हरितवारणभृत्य इति समाह्वयः समाख्यानं यस्य तं तथोक्तम्। अपूर्विकां अपूर्वां पूर्व मविद्यमानां दृशं दृष्टि मलम्भय एव प्रापय एव। लभिधातुः द्विकर्मकः। हरितवारणदासनाम्ने कस्मैचिद्भागवताय वरदराजो दृशं प्रादादिति प्रसिद्धिरस्ति। ईदृशमेवं प्रकारं परश्शतं अनेकवारं स्फुटं प्रसिद्धं यथा तथा अदाश्च दत्तवा नसि च। "यस्य प्रसादकलया बधिरः शृणोति पङ्गुः प्रधावति जवेन च वक्ति मूकः। अन्धः प्रपश्यति सुतं लभते च वन्ध्या तं देव मेव वरदं शरणं प्रपद्ये" इति श्लोकोऽत्रानुसन्धेयः ॥ १२६ ॥

*इह च देव ददासि वरान् परान्*
*वरद सुन्दर सुन्दरदोर्धर ।*
*वनगिरे रभित स्तट मावसन्*
*अखिललोचनगोचरवैभवः ॥ १२७ ॥*

इहेति। हे वरद, सुन्दर, सुन्दरदोर्धर सुन्दराकारबाहुवह, वनगिरे स्तट मभितः तटसमीपे आवसन् अखिललोचनगोचरः सकलमनुज-नयनविषयो वैभवं महिमा यस्य स तथोक्तः। त्वं इह वनाद्रौ च परान् अतिशयितान् वरान् ददासि शेषाद्रिनिलयस्सन् जनेभ्यो ऽधिकान् वरान् ददासीति भावः ॥ १२७ ॥

'इह च देव ददासि वरान् परा' निति सामान्यत उक्तं स्थाली पुलाकन्यायेन विशिष्योदाहरति -

*इद मिमे शृणुमो मलयध्वजं*
*नृप मिह स्वय मेव हि सुन्दर।*
*चरणसात्कृतवा निति त द्वयं*
*वनगिरीश्वर, जातमनोरथाः ॥ १२८ ॥*

इद मिति। हे वनगिरीश्वर ! इमे वयं इह वनाद्रौ स्वय मेव हि साधनानुष्ठानानपेक्षः स्वकीयकृपयैव मलयध्वजं नृपं मलयध्वजाख्यं पाण्ड्यनृपं चरणसात्कृतवान् चरणाधीनं कृतवान्, चरणपरिचर्यार्हं चकर्थ- इतीदं एवं प्रकारं पूर्ववृत्तं शृणुमः श्रुतवन्तो भवामः। तत् तस्मात्कारणात् जातमनोरथाः। अस्मानपि चरणसात्करिष्यसीति सञ्जातवाञ्छाः, केवलस्वकृपयैव मलयध्वजपाण्ड्यस्य चरणारविन्दपरिचरणप्रद स्त्वमस्मभ्य मपि प्रदास्यसीति निश्चित्य प्रवृत्ताभिलाषा भवाम इति भावः ॥ १२८ ॥

एवं श्लोकचतुष्टयेन सुन्दरबाहो र्वाञ्छितप्रदत्व मुक्त्वा तदानीन्तनाति चण्डपाषण्डप्रभुविवासितभगवद्रामानुजचरणनलिनविश्लेषाक्षमतया स्तोत्रप्रारम्भ एव "सुन्दरोरुबाहुं स्तोष्ये तच्चरणविलोकनाभिलाषी" इत्यभिलषितं क्षिप्रमेव प्रदिशेति स्वहृद्गतं सङ्गृह्योपसंहरति श्लोक चतुष्टयेन-

*विज्ञापनां वनगिरीश्वर, सत्यरूपा-*
*मङ्गीकुरुष्व करुणार्णव मामकीनाम्।*
*श्रीरङ्गधामनि यथापुर मेष सोऽहं*
*रामानुजार्यवशगः परिवर्तिषीय ॥ १२९ ॥*

विज्ञापना मिति। हे करुणार्णव, "व्यसनेषु मनुष्याणां भृशं भवति दुःखितः" इति परदुःखदुःखित्वरूप कृपापरिपूर्ण, अत एव वनगिरीश्वर, अकिञ्चनास्मत्संरक्षणाय वनाद्रौ विहितसन्निधान, स्वामिन्, सत्यरूपां सहृदयतया यथार्थां, मामकीनां मदीयां विज्ञापनां अङ्गीकुरुष्व श्रुत्वा सफलां

कुरुष्वेत्यर्थः। विज्ञापना कीदृशीत्याकाङ्क्षाया माह श्री रङ्गधामनीति। एष सोऽहं इदानी माचार्यविश्लेषविषण्णहृदयः तत्संश्लेषार्थं भवत्स्तुति-प्रवृत्तोऽहं यथापुरं यथापूर्वं श्रीरङ्गधामनि भवदावासस्थाने रामानुजार्यवशगः भगवद्रामानुजार्यवशवर्तीसन् परिवर्तिषीय परि समीपे निवसेयम्। परिपूर्वात् 'वृतु वर्तने' इति धातो राशिषि लिङ्। सुन्दरबाहो स्सर्वाभीष्टदत्वेऽपि तत्त्वज्ञैः श्री वत्सचिह्नमिश्रैः आचार्यवशवर्तित्वस्यैव परमपुरुषार्थतया प्रार्थितत्वात् इदमेव सर्वोत्तीर्ण मिति निर्णयः॥ १२९॥

*किञ्चेदञ्च विरिञ्चिभावन! वनाद्रीश प्रभो सुन्दर,*
*प्रत्याख्यानपराङ्मुखो वरदतां पश्य न्नवश्यं शृणु।*
*श्रीरङ्गश्रिय मन्वहं प्रगुणयं स्त्वद्भक्तभोग्यां कुरु*
*प्रत्यक्षं सुनिरस्त मेव विदध त्प्रत्यर्थिनां प्रार्थनम्॥ १३०॥*

किञ्चेति। हे विरिञ्चि भावन, विरिञ्चिं ब्रह्माणं भावयति उत्पादयतीति तथोक्त, वनाद्रीश, प्रभो, स्वामिन्, सुन्दर, वरदतां पश्यन् स्वकीय वरप्रदत्वप्रसिद्धिं निर्धारयन् त्वं प्रत्याख्याने निरसने पराङ्मुख स्सन् प्रत्याख्यानहीन स्सन् इत्यर्थः, उपेक्षा रहित स्सन्निति यावत्। किञ्च, पूर्वश्लोकविज्ञापिता दपि इदञ्चावश्यं शृणु। तत्किमित्याकाङ्क्षायामाह - श्रीरङ्गेति। प्रत्यर्थिनां प्रतिपक्षिणां पाषण्डिनां प्रार्थनं भगवद्रामानुज-निवासनपूर्वकं श्रीरङ्गश्रीतिरोधानादिकं प्रत्यक्षं अस्मत्समक्षमेव सुनिरस्तं दूरतोऽपास्तं विदधत् कुर्वन् त्वं श्रीरङ्गश्रियं श्रीरङ्गसम्पदम् अन्वहं दिने दिने प्रगुणयन् प्रगुण मभिवृद्धं कुर्वन् सन् त्वद्भक्त भोग्यां रामानुजार्यप्रभृतिभवद्भक्तजनानुभाव्यां कुरु प्रत्यर्थिनिरसनपूर्वकं श्रीरङ्गमङ्गलानुभवाय भवदीयान् रामानुजार्यप्रभृती नानयेति पूर्वश्लोक प्रार्थनानुगुणः पर्यवसितोऽर्थः॥ १३०॥

इत्थं प्रार्थित मर्थ मेव आदरप्रकर्षेण पुनरपि प्रकारान्तरेण प्रार्थयते-

*कारुण्यामृतवारिधे वृषपते हे सत्यसङ्कल्पन,*
*श्रीमत्सुन्दर योग्यताविरहितानुत्सार्य सद्वत्सल !*
*क्षाम्यन् साधुजनैः कृतां स्तु निखिला नेवापचारान् क्षणात्*
*तद्भोग्या मनिशं कुरुष्व भगवन् श्रीरङ्गधामश्रियम् ॥ १३१ ॥*

कारुण्येति । हे भगवन् ! ज्ञानशक्त्यादिविशिष्ट, सत्यसङ्कल्पन, सङ्कल्पनं सङ्कल्पः "अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । न हि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः" इत्यादिभवदुक्तिवत् "द्वय मर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपात मत्रैव श्रीरङ्गे सुख मास्व" इति रामानुजार्य मुद्दिश्य सङ्कल्पितं किलेति सम्बुद्धेरभिप्रायः । मध्ये प्रकृतिसम्बन्धनिबन्धनापचारप्रसङ्गशङ्काया माह - सद्वत्सल, दोषेष्वपि भोग्यताबुद्धि र्वात्सल्य मिति भावः । कारुण्यामृतवारिधे, सामान्यतः परदुःखासहिष्णो राश्रितक्लेशोपेक्षा न युक्तेति भावः । वृषपते सौलभ्यात् वृषगिरीश्वर, श्रीमन् पुरुषकारभूतया श्रिया नित्यसन्निहित, सुन्दर, योग्यताविरहितान् भगवत्सेवाद्ययोग्यतया शास्त्रोक्तान् पाषण्डिनः उत्सार्य अपसार्य पलायितान् कृत्वा साधुजनैः सात्त्विक समूहै स्तु कृतान् निखिला नेवापचारान् अकृत्यकरणकृत्याकरणादिकान् क्षाम्यन् क्षमाविषयं कुर्वन् सन् क्षणात् क्षिप्र मेव श्रीरङ्गधामश्रियं श्रीरङ्गस्थानसम्पदं अनिशं तद्भोग्यां साधुजनभोग्यां कुरुष्व, रामानुजार्यतच्छिष्यप्रशिष्यादिसात्त्विक-जनानुभाव्यां कुरुष्वेत्यर्थः ॥ १३१ ॥

*इदं भूयो भूयः पुनरपि च भूयः पुनरपि*
*स्फुटं विज्ञीप्सामी त्यगति रबुधोऽनन्यशरणः ।*
*कृतागा दुष्टात्मा कलुषमति रस्मीत्यनवधे -*
*र्दयाया स्ते पात्रं वनगिरिपते, सुन्दरभुज ! ॥ १३२ ॥*

श्रीवत्सचिह्नविरचिते पञ्चस्तवे सुन्दरबाहुस्तव स्समाप्तः ।

इद मिति । एवं वनगिरिपते, सुन्दरभुज, अगतिः अबुधः

कर्मज्ञानरहितः, अबुधपदसमभिव्याहारा दगतिपदं कर्मराहित्यपरम्। अत एवाऽनन्यशरणः तदुभयसाध्यभक्त्यभावस्य सिद्धत्वात् त्वदेकशरण इत्यर्थः। अहम्, इतीदं विज्ञापितमेवेदं भूयो भूयः पुनरपि च भूयः पुनरपि विज्ञीप्सामि विज्ञापयितु मिच्छामि। दुष्टात्मा दुष्टमनाः कलुषमतिः क्षुद्रबुद्धिः अहं कृतागा अस्मि कृतापराधोऽस्मीति हेतोः ते दयायाः पात्रं दयनीयो भवानि। सकृद्विज्ञापनस्यैव पर्याप्तत्वेऽपि उन्मत्तचित्तवत् असकृद्विज्ञापन मपराध एव। ततः प्रियतर गुरुचरणविरहविषण्णोऽहं परदुःखासहिष्णुतारूपायाः केवलकृपायाः पात्र मिति मत्वा विज्ञापितं निर्वर्तयेति भावः॥ १३२॥

पञ्चस्तवव्याख्याने सुन्दरबाहुस्तवव्याख्या परिसमाप्ता।

# वरदराजस्तवः

श्रीभाष्यकारसकाशानिशसंवासप्रकाशित समस्तश्रुत्यन्ततत्त्वार्थाः श्रीवत्सचिह्नमिश्राः आनृशंस्यमनसः सकलसुमनस्सञ्चयसञ्जीवनाय पञ्चस्तवव्याजेन अर्थपञ्चकं प्रकाशयितुकामाः प्रथमतः प्राधान्येन भगवतो वैकुण्ठनाथस्य अकुण्ठमहिम्नः स्वरूपरूपादिकं तदुपसर्जनत्वेन प्रत्यगात्मादिस्वरूपञ्च वैकुण्ठस्तवे गुरुवन्दनपूर्वकं प्रदर्श्य, व्यूहान्तर्यामिणो रचिन्त्यवैभवतया तदन्तर्भाव मेव विभावयन्तः विभवावतार भावुकव्यापारविषयकमतिमानुषस्तवं विधाय, तथाविध कादाचित्क-तामति सम्बन्ध वर्जितार्चावतारस्तवप्रस्तावे, समस्तकाङ्क्षितप्रदानदीक्षितं वनक्षितिधरमन्दिरं सुन्दरबाहुं बहुशः स्वदेशिक रामानुजाचार्यचरणकमल संश्लेषैकफलाः स्तुत्वा "हस्तिशैलनिलयो भवन् भवान्" इति प्रस्तुतं हस्तिगिरिनाथं शरणागतिमन्त्रप्रकारेण सम्प्रति तुष्टूषन्त स्सन्तः प्रारिप्सितस्य निष्प्रत्यूहपरिसमाप्त्यर्थं आशीर्वचनरूपं मङ्गलं निबध्नन्ति।

*स्वस्ति हस्तिगिरिमस्तशेखर -*
*स्सन्तनोतु मयि सन्ततं हरिः ।*
*निस्समाभ्यधिक मभ्यधत्त यं*
*देव मौपनिषदी सरस्वती ।। १ ।।*

स्वस्तीति। उपनिषत्सम्बन्धिनी औपनिषदी सरस्वती, वाणी "न तत्समश्चाभ्यधिक श्च दृश्यते" इत्यादिवेदान्तवाक्य मित्यर्थः । देवं,

'दिवुक्रीडाविजिगीषाव्यवहारद्युति स्तुति मोद मद स्वप्नकान्तिगतिषु' इत्युक्त सकलकल्याणगुणगणं यम्, निस्समाभ्यधिक माह, हस्तिगिरिमस्तशेखरः करिगिरि शिरःपरिष्कारभूत स्स हरिः, करिगिरिशेखरताया मेव निस्समाभ्यधिकत्वं देवत्वञ्च विभाव्यते इति भावः। मयि विषये सन्ततं स्वस्ति श्रेयः सन्तनोतु अत्र परत्र चाऽपि वाचिक परिचर्या-करणरूपं श्रेयः श्रुतिशिरस्सरस्वत्या इव ममाऽपि भूया दिति भावः ॥ १ ॥

*श्रीनिधिं निधिमपार मर्थिना -*
*मर्थितार्थपरिदानदीक्षितम्।*
*सर्वभूतसुहृदं दयानिधिं*
*देवराज मधिराज माश्रये ॥ २ ॥*

श्रीनिधि मिति। अस्मिन् श्लोके मन्त्ररत्नपूर्वखण्डार्थ स्सङ्गृह्यते। श्री र्निधीयतेऽस्मि न्निति श्रीनिधिः। यद्वा, श्रियो निधिः निधिवत्प्रार्थनीय इत्यर्थः। अनेन श्रीमत्पदार्थ स्सङ्गृहीतः। नारायणपदसमभिहितेषु गुणे ष्वत्यावश्यकाः केचनाऽनन्तरं सङ्गृह्यन्ते। अर्थिना मपार मपरिच्छिन्नं निधिम्। अनेन परमप्राप्यत्व मुच्यते। अर्थितार्थपरिदानदीक्षितं प्रार्थितपुरुषार्थप्रदानकृत सङ्कल्पम्। अनेन पापकत्व मुच्यते। सर्वभूतसुहृद मित्यनेन प्रापकतायां किञ्चित्कारनैरपेक्ष्य मुच्यते। दयानिधि मित्यनेन सौहार्दभावेऽपि परदुःखासहिष्णुत्वे स्वाभाविक मव्याहतत्व मुच्यते। अधिराज मित्यनेन स्वामित्व मुच्यते। एवम्भूतं देवराजम् ''तमीश्वराणां परमं महेश्वरम् तं देवतानां परमञ्च दैवतम्'' इत्युक्तप्रकारेण देवतासार्वभौमम् आश्रये शरणं प्रपद्ये, श्रीमतः प्राप्यस्य प्रापकस्य तदुपयोगिसौहार्ददया स्वामित्वविशिष्टस्य देवराजस्य चरणौ शरणं प्रपद्ये इति पर्यवसितोऽर्थः ॥ २ ॥

अनन्तरं इन्द्रियपथातिक्रान्तस्याऽपि ऐन्द्रियकत्वरूपं शरणवरणोपयुक्तं सौलभ्य मनुसन्धत्ते -

*नित्य मिन्द्रियपथातिगं महो*
*योगिना मपि सुदूरगं धियः ।*
*अप्यनुश्रवशिरस्सु दुर्ग्रहं*
*प्रादुरस्ति करिशैलमस्तके ॥ ३ ॥*

नित्यमिति। नित्य मिन्द्रियपथातिगं इन्द्रियमार्गातिगामिनम् "न मांस चक्षु रभिवीक्षते तम्" इत्युक्त मित्यर्थः। योगिनां धियो बुद्धे रपि सुदूरगं परिच्छिद्य ज्ञातु मशक्य मित्यर्थः। आचार्योच्चारणात् अनु श्रूयते इत्यनुश्रवो वेदः, तच्छिरस्स्वपि वेदान्तेष्वपि दुर्ग्रहं न तु सुग्रहम्। एकस्मि न्नानन्दगुण एव, "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह" इत्युक्तेरुभय मपि सिद्धम्। एतादृशं महः करिशैलमस्तके हस्तिशैलाधित्यकायां प्रादुरस्ति प्रादुर्भवति। "गङ्गाया दक्षिणे भागे योजनानां शतद्वये, पञ्चयोजन मात्रेण पूर्वाम्भोधे स्तु पश्चिमे॥ वेगवत्युत्तरे तीरे पुण्यकोट्यां हरि स्स्वयम्। वरदस्सर्वभूताना मद्याऽपि परिदृश्यते ॥ वपाहोमे प्रवृत्ते तु प्रात स्सवनकर्मणि। धातुरुत्तरवेद्यन्तः प्रादुरासीज्जनार्दनः" इत्यादिक मनुसन्धेयम् ॥ ३ ॥

इदानीं वरदराजस्य हस्तिगिरिशिखरावास रसिकतातिशयः श्रुतेरप्यादरणीय इत्याह -

***वल्लिका श्रुतिमतल्लिकामयी***
***येन पल्लवितविश्वशाखया।***
***स्वश्रिया करिगिरे रनुक्रियां***
***वष्टि मृष्टवरदं त माश्रये ॥ ४ ॥***

वल्लिकेति। श्रुतिषु वेदेषु मतल्लिका श्रेष्ठा, तन्मयी वल्लिका येन वरदराजेन पल्लविता सञ्जातपल्लवा विश्वशाखा समस्तच्छान्दोग्य सुबालादिभेदभिन्ना शाखा, अन्यत्र शाखा विटपाः यस्या स्तया। स्वश्रिया स्वकीयशोभया करिगिरे रनुक्रिया अनुकारः तां वष्टि वाञ्छति, तं मृष्टवरदं

पूर्णवरदं वाञ्छिताधिकफलप्रदं समाश्रये । उपनिषत् छान्दोग्यादिः स्वशाखासु पल्लवस्थाने परिष्कारभूतेन वरदराजेन सौलभ्य मनाविष्कृत मिति, आविष्कृतसौलभ्यवरदराजशेखरितकरगिरिशिखरसाम्य मिच्छतीति भावः ॥ ४ ॥

श्रुत्यपेक्षया हस्तिगिरे राधिक्य मेवाऽऽह -

*यं परोक्ष मुपदेशत स्त्रयी*
*नेति नेति परपर्युदासतः ।*
*वक्ति यस्तमपरोक्ष मीक्षय-*
*त्येष तं करिगिरिं समाश्रये ॥ ५ ॥*

यमिति। त्रयी श्रुतिः बृहदारण्यकोपनिषत्, उपदेशतः उपदेशात् नेति नेति, इति न इति न, इत्युक्तप्रकारं न भवति इत्युक्तप्रकारं न भवति - इति परपर्युदासतः "द्वे वाव ब्रह्मणो रूपे, मूर्तञ्चामूर्तञ्च, मर्त्यञ्चामृतञ्च" इत्यादिना मूर्तमर्त्यशब्दाभ्यां अमूर्तामृतशब्दाभ्याञ्च ब्रह्मरूपत्वेन प्रतिपादितचिदचित्तत्त्वरूपवत्त्वादिपर्युदासतः चिदचित्तत्त्वमात्र-रुपवत्त्वाद्युक्तप्रकारं ब्रह्म न भवतीति तन्निरसनमात्र पर्यवसानात् यं वरदराजं परोक्षं अप्रत्यक्षं वक्ति वदति, न तु ब्रह्मस्वरूपप्रकारं परिच्छिद्य वदतीत्यर्थः। य एष, करिगिरिः तं वरदराजं अपरोक्षं ईक्षयति प्रदर्शयति सर्वेषां साक्षात्कारविषयं करोति तं करिगिरिं समाश्रये। "नित्यमिन्द्रियपथातिगं महो योगिना मपि सुदूरगं धियः । अप्यनुश्रवशिरस्सु दुर्ग्रहं प्रादुरस्ति करिशैलमस्तके ॥" इत्युक्तप्रकारेण वरदराजसाक्षात्कारयितृत्वात् करिगिरि रेव समाश्रयणीय इत्यर्थः।

बृहदारण्यके - "द्वे वाव ब्रह्मणो रूपे मूर्तञ्चामूर्तञ्च मर्त्यञ्चामृतञ्च" इत्युपक्रम्य, "तस्य हैतस्य पुरुषस्य रूपम् यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाग्न्यर्चि र्यथा पुण्डरीकम्" इत्यादिना

मूर्तामूर्तकनकाम्बर पाण्डुकम्बलादिरूपाण्यभिधाय, “अथात आदेशो नेति नेति। न ह्येतस्मा दिति नेत्यन्य त्परमस्ति। अथ नामधेयं सत्यस्य सत्य मिति। प्राणा वै सत्यम्; तेषा मेष सत्यम्” इत्युक्तम्।

आदेश उपदेश इति न इति न पूर्वोक्ततत्तद्रूपवन्मात्रं न इति न ह्येतस्मादिति नेत्यन्यत्पर मस्ति इति न इति प्रतिपादिता दस्माद्ब्रह्मणः अन्यत्परं न ह्यस्ति अन्यदुत्कृष्टं नास्ति हि। इदमेव सर्वतत्त्वोत्कृष्टतया सर्वोपनिषत्प्रसिद्धम्। अतः तस्य ब्रह्मणः सत्यस्य सत्य मिति नामधेयं, प्राणा जीवाः सत्यं वै सत्यतया प्रसिद्धा हि। तेषां प्राणानामप्येष पुरुष स्सत्यं, जीवानामपि सत्यत्वावह इत्यर्थः। “प्रकृतैतावत्त्वं हि प्रतिषेधति, ततो ब्रवीति च भूयः” इति ब्रह्मसूत्रेण अस्याः श्रुते रर्थो निर्णीतः। नेति वाक्यं पूर्वप्रकृत मेतावत्त्व मेतावद्रूपवत्त्वं प्रतिषेधति, हि यस्माद्धेतोः, ततः तदनन्तरं भूयः ब्रवीति सत्यस्य सत्यमित्यादि वदतीति स्वयं वरदराजस्वरूपादि साक्षात्काराक्षमायाः श्रुतेरपि सर्वेषां साक्षात्कारयितृत्वक्षमः करिगिरि रेवाभ्यधिक इति भावः ॥ ५ ॥

*एष ईश इति निर्णयं त्रयी*
*भागधेयरहितेषु नो दिशेत्।*
*हस्तिधामनि न निर्णयेत को*
*देवराज मय मीश्वर स्त्विति ॥ ६ ॥*

एष इति। त्रयी वेदत्रयं भागधेयरहितेषु भाग्यहीनेषु विषये एष वरदराजः ईशः सर्वेश्वर इति निर्णयं निश्चयं नोदिशेत् न वितरेत् - “चित्रं विधेर्विलसित न्त्विद माविरस्ति दुष्टात्मना मय महो किल दुर्विपाकः। यत्केचिदत्र भवतीं श्रुतिमाश्रयन्तोऽप्यर्थे कुदुष्टिविनिविष्टधियो विनष्टाः” इत्युक्त मिति भावः। हस्तिधामनि हस्तिरूपे धाम्नि स्थाने तु देवराज मय मीश्वर इति कः को वा न निर्णयेत निर्णयं न कुर्वीत, सर्वोऽपि

निश्चिन्वीतेत्यर्थः । हस्तिगिरिवासो देवराजस्य सर्वेश्वरत्वाद्यविनाभूत-समस्तकल्याणगुणात्मकत्वा वह इति भावः ॥ ६ ॥

उक्तमेव सुव्यक्तं विवृणोति -

*है कुदृष्ट्यभिनिविष्टचेतसां*
*निर्विशेषसविशेषताश्रयम् ।*
*संशयं करिगिरि र्नुदत्यसौ*
*तुङ्गमङ्गलगुणास्पदे हरौ ॥ ७ ॥*

है इति । तुङ्गाः उन्नताः आनन्दगुणवदपरिच्छेद्याः मङ्गलाः कल्याणाश्च ये गुणाः ज्ञानशक्त्यादयः तेषा मास्पदे आवासस्थाने हरौ विषये कुदृष्ट्या कुत्सितया दृशा अयथार्थज्ञानेन अभिनिविष्टचेतसा मत्याविष्टमनसां वज्रलेपायितचित्तानां निर्विशेषसविशेषताश्रयं संशयं हरि र्निगुण स्सगुणो वेति कोटिद्वयावलम्बिसन्देहम् असौ करिगिरिः नित्यनिरवद्य निरतिशय कल्याण गुणगणपुष्कलतया सर्वसाक्षात्कार्य देवराजाधिष्ठितोऽयं हस्तिगिरिः नुदति निरस्यति । उपनिषत्स्वपि कुदृष्टीना मनुत्पन्नं देवराजस्य मङ्गल गुणगणाकरत्व निर्णयं करिगिरि रुत्पादयतीति पर्यवसितोऽर्थः । है शब्दः प्रसिद्ध्यर्थः । शङ्करपक्षीयाणां मायावादिनां सगुणत्व-प्रसङ्गानङ्गीकारेऽपि तदवान्तरभेदयादवप्रकाश पक्षीयै र्दशाभेदेन ब्रह्मण स्सगुणत्वाङ्गीकारात्संशयोक्तिः ॥ ७ ॥

सात्विकै रपि सोपबृंहणया श्रुत्या तत्त्वनिर्णयः कथञ्चिच्छक्यः हस्तिगिरिस्तु समस्थानां स्वतएव भगवन्तं विभावयतीत्याह -

*न्यायतर्क मुनिमुख्य भाषितै -*
*श्शोधितै स्सह कथञ्चन त्रयी ।*
*जोषयेद्धरि मनंहसो जनान्*
*हस्तिधाम सकलं जनं स्वयम् ॥ ८ ॥*

न्यायेति। त्रयी न्यायाः पूर्वोत्तरमीमांसान्यायाः, तर्काः, यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात् इत्यादि प्रमाणानुग्राहक विचार विशेषाः मुनिमुख्यभाषितानि तत्त्वविद ग्रेसर भगवद्वाल्मीकि पराशर पाराशर्य प्रभृति परमर्षि प्रणीत श्रीरामायण विष्णुपुराण भारतादि सात्त्विकशास्त्राणि, शोधितै रित्यनेन अपन्यायतर्काभास राजस तामस पुराणादीनि निरस्यन्ते। शोधितै श्शुद्धैः न्याय तर्क मुनिमुख्यभाषितैः कारणैः अनंहसः अपापान् "जन्मान्तर सहस्रेषु तपोज्ञान समाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते।" इत्युक्त प्रकारेण क्षीणकल्मषान् जनान् हरिं भगवन्तं जोषयेत् सेवयेत्। जुषी प्रीति सेवनयोः, णिजन्तत्वात् द्विकर्मकत्वम्। हस्तिधाम सकलं जनं आबालपण्डितं स्वयं सहकार नैरपेक्ष्येण जोषयेत् साक्षात्कारयतीत्यर्थः। अत्र "धर्मे प्रमीयमाणे तु वेदेन करणात्मना। इतिकर्तव्यताभागं मीमांसा पूरयिष्यति"॥ "वेदशास्त्र रथा रूढाः न्यायखङ्गधरा द्विजाः। क्रीडार्थमपि यद्ब्रूयु स्स धर्मः परमो मतः"॥ "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना॥ यस्तर्केनाऽनुसन्धत्ते स धर्मं वेद नेतरः"॥ "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभे त्यल्पश्रुता द्वेदो मा मयं प्रतरिष्यति॥" "यस्मि न्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा स्वयम्। तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते। अग्ने श्शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम्। राजसेषु च माहत्म्य मधिकं ब्रह्मणो विदुः। संङ्कीर्णेषु सरस्वत्याः पितॄणाञ्च निगद्यते। सात्त्विकेष्वथ कल्पेषु माहात्म्य मधिकं हरेः। तेष्वेव योगसंसिद्धाः गमिष्यन्ति परांगतिम्"॥ इत्यादयः प्रमाणतयाऽनुसन्धेयाः॥ ८॥

*अद्भुतं मह दसीमभूमकं*
*किञ्चि दस्ति किल वस्तु निस्तुलम्।*
*इत्यघोषि य दिदं तदग्रत -*
*स्तथ्यमेव करिधाम्नि दृश्यते॥ ९॥*

अद्भुतमिति। अद्भुतं सकल विसजातीयाश्चर्यावहं महत् अविच्छिन्न स्वरूपम् - असीमभूमक मपरच्छिन्नस्वभावम्, अत एव निस्तुलं निरुपमं किञ्चित् ज्ञातांशेऽप्यनिष्कृष्टम्। यद्वा, किञ्चित् एकं वस्तु अस्तीति य दघोषि सुप्रसिद्ध मुक्तं, तद्वस्तु करिधाम्नि अग्रतः मांसचक्षुषा मप्यस्माकं पुरतः इदं सत् इदमिति प्रत्यक्षार्हं सत् तथ्यं सत्यमेव दृश्यते। "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।" "सदेव सोम्येद मग्र आसीत् एक मेवाऽद्वितीयं ब्रह्म। "य स्सर्वज्ञ स्सर्व वित्"। "पराऽस्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।" "न तत्समश्चाऽभ्यधिकश्च दृश्यते।" "एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः" इति श्रुतिशतै रुद्घोषितवैभवो नारायणः करिगिरौ सम्यक्प्रत्यक्षीक्रियते इत्यर्थः॥ ९॥

प्रत्यक्षादि प्रमाणान्तर संवादवत एव आगमस्य प्रामाण्य मिति वादिनां बाह्यानां मतेऽपि हस्तिगिरिणा वरदराजं सकलजन साक्षात्कारक्षमं कलयता त्रयी प्रमाणभाव मनुभवतीत्याह -

*संवदेत किल य त्प्रमान्तरै-*
*स्तत्प्रमाण मिति ये हि मेनिरे।*
*तन्मते ऽपि किल मानतां गता*
*हस्तिनाऽद्य परवस्तुनि त्रयी॥ १०॥*

संवदेतेति। ये वादिनः यत्किल यत्प्रमाणतयाऽभिमतन्तु प्रमान्तरै स्संवदेत संवादि भवेत् अनुगृहीतविषयं भवेत् तत्प्रमाणं हीति मेनिरे मन्यन्ते स्म, तन्मतेऽपि त्रयी अद्य हस्तिना हस्तिगिरिणा परवस्तुभूतं वरदराजं प्रत्यक्षयता हस्तिशैलेनेत्यर्थः। हस्तिनेति नामैकदेशे नाम ग्रहणम् - भीमो भीमसेन इतिवत्। परवस्तुनि परवस्तुविषये मानतां प्रमाणतां गता किल सर्वज्ञ स्सर्वशक्ति स्सर्वशरण्य स्सकलफलप्रदः पुण्डरीकाक्षो लक्ष्मीपतिः परमपुरुषः सर्वनिर्वाहक इति श्रुतिप्रतिपादितस्य परवस्तुनः स्वमस्तके

हस्तिगिरिणा समस्त साक्षात्कार्यतया वहनात् श्रुति रबाधितविषया भवतीति भावः ॥ १० ॥

इत्थं मन्त्ररत्नस्थनारपदाभिधेय हस्ति भूधर वैभवं प्रतिपाद्य तदयनपदाभिधेयस्य भगवतो वैभवं विस्तरेण प्रतिपादयितुं प्रारभमाणः गुणयोगं प्रथमतः प्रतिपदायति -

*गुणायत्तं लोके गुणिषु हि मतं मङ्गलपदं*
*विपर्यस्तं हस्तिक्षितिधरपते तत्त्वयि पुनः ।*
*गुणा स्सत्यज्ञान प्रभृतय उत त्वद्गततया*
*शुभीभूयं याता इति हि निरणैष्म श्रुतिवशात् ॥ ११ ॥*

गुणायत्त मिति। लोके गुणिषु गुणवत्सु मङ्गल पदं, एते शोभना इति शब्दः गुणायत्तं गुणाधीनं मतं हि। मणिद्युमणि चन्द्रचन्दनादिषु शोभनता हेतुः शोभातप चन्द्रिका सुगन्धभर सम्बन्ध इत्यतिप्रसिद्ध मित्यर्थः । हे हस्तिक्षिति धरपते, त्वयि पुनः त्वयि तु तन्मङ्गलपदं गुणायत्तं विपर्यस्तं व्यत्यस्तं भवति । गुण्यायत्त मेव गुणानां मङ्गलत्व मित्यर्थः । सत्यज्ञानप्रभृतयः सत्यज्ञानमुखाः गुणा उत, गुणाः पुनः,स्वरूप निरूपकगुणतया प्रसिद्धाः सत्यत्वज्ञानत्वानन्तत्वानन्दत्वामलत्वादय इत्यर्थः । त्वद्गततया त्वदाश्रिततया त्वत्स्वरूपानुबन्धितया शुभी भूयं शुभत्वं याता इति श्रुतिवशात् "सत्यस्य सत्यं, ज्योतिषां ज्योतिः" इत्यादि श्रुतिबलात् निरणैष्म निर्णीतवन्तो हि भवामः । निर्पूर्वात् नीञ् प्रापणे इति धातोः परस्मैपदि लुङुत्तमबहुवचनम्। शुभीभूय मिति "भुवो भावे" इति भावार्थे क्यप्प्रत्ययः । स्वरूप निरूपकगुणानां सत्यज्ञानादीनां, निरूपित स्वरूप विशेषण गुणानां ज्ञानशक्त्यादीना ञ्च नित्यनिरवद्य निरतिशयत्वाद्यतिशया भवदीयत्व प्रयुक्ता इति भावः ॥ ११ ॥

भगवत एतादृशगुण विशिष्ट स्वरूपं श्रुताव प्यवाङ्मनसगोचरतया प्रत्यपादीत्याह-

*निराबाधं नित्यं निरवधि निरंहो निरुपमं*
*सदा शान्तं शुद्धं प्रतिभट मवद्यस्य सततम् ।*
*परं ब्रह्माऽऽम्नातं श्रुतिशिरसि यत्त द्वरद, ते*
*परं रूपं साक्षात्तदिद मपदं वाङ्मनसयोः ॥ १२ ॥*

निराबाध मिति । निराबाधं निर्विकारं, नित्यं कालपरिच्छेदरहितं, निरवधि देशपरिच्छेद रहितं, निरंहः निर्मलं, निरुपमं निस्तुलं, सदा शान्तं नित्यानुकूलं, भोग्यमिति यावत्, शुद्धं निष्कृष्टसत्त्वरूपं, अत एव सतत मवद्यस्य प्रतिभटं, स्व सम्बन्धिना मपि हेय सम्बन्धगन्धासह मित्यर्थः । अन्यथा निरंहः पदेन पुनरुक्तेः । य त्तत्परं ब्रह्म श्रुतिशिरसि वेदान्ते वाङ्मन सयो रपदं अविषयः, आम्नातं "न चक्षुषा गृह्यते नाऽपि वाचा यत्त दद्रेश्यमग्राह्य" मित्यादिवेदान्त वाक्ये अवाङ्मनस गोचरतया प्रत्यपादि । हे वरद, तदिदं ते साक्षात् परं रूपं त्वदीयं निष्कृष्टपरम स्वरूपं, एतादृशपरस्वरूपरूप विशिष्टो भवान् सौलभ्येन हस्तिगिरि मस्तशेखरो भवतीति भारः ॥ १२ ॥

*प्रशान्तानन्तात्मा ऽनुभवज महानन्दमहिम -*
*प्रसक्तस्तैमित्यानुकृत वितरङ्गार्णव दशम् ।*
*परं यत्ते रूपं स्वसदृशदरिद्रं वरद त -*
*त्त्रयी पिस्पृक्षन्ती परनिरसने श्राम्यति परम् ॥ १३ ॥*

प्रशान्तेति । भगवतः शन्तोदितदशा, नित्योदित दशेति च दशाद्वयमस्ति तत्र हेय प्रत्यनीक कल्याणैकतान स्वस्वरूपानुभवदशा प्रथमा इतरा तु विभूत्यनुभवदशा । हे वरद, प्रकर्षेण शान्तस्य प्रशान्तस्य अत्यन्तानुकूलस्य, अनन्तस्य अपरिच्छिन्नस्य च आत्मनः स्वस्वरूपस्य अनुभवजः साक्षात्कारजन्यो यो महानन्दः आनन्दातिशयः तस्य महिम्ना महत्तया प्रसक्तं सङ्गतं यत् स्तैमित्यं निश्चलत्वं तेन अनुकृता कृतानुकारा वितरङ्गार्णवदशा निस्तरङ्गसमुद्रावस्था ये न तत्तथोक्तम् ।

अत्यन्तानुकूलापरिच्छिन्न स्वस्वरूप साक्षात्कारजन्यापरिच्छिन्ना नन्दवैभवनिश्चलत्व संवादिनिस्तरङ्गरत्नाकरावस्थ मित्यर्थः । स्वस्वरूपस्यात्यन्तानुकूलत्वा त्परिपूर्णत्वाच्च तदनुभवदशाया मतिमहत्यानन्दे जायमने य दैकाग्र्चं प्रसक्तं तेन प्रशान्तोर्मिक महार्णवावस्थाऽनुक्रियते इति यावत् । स्वसदृशदरिद्रं ईषदनुकारि निस्तरङ्गाब्धिव्यतिरिक्त सदृशवस्त्वन्तररहितं यत्ते परं रूपं अत्युत्कृष्टं स्वरूपमस्ति, तत्स्वरूपं पिस्पृक्षन्ती स्प्रष्टु मिच्छन्ती प्रतिपादयितुं प्रवृत्ता त्रयी परनिरसने परं "निष्कलं निष्क्रियं यत्त दद्रेश्य मग्राह्य" मित्यादिना हेयावयव विकारादिनिरसन एव श्राम्यति शान्ता भवति, न तु यथावत्प्रतिपादयितुं शक्नोतीत्यर्थः । भगवत स्तथाविधशान्तोदित दशावतः ईदृशसौलभ्य मस्मादृशा मनुग्रहायेत्यभिप्रायः । "अतिपतितावधिस्वमहिमानुभवप्रभवत्सुखकृत निस्तरङ्गजलधीयित नित्यदशाम्" इति सुन्दरबाहुस्तवे नामव्यत्यासतः प्रयुक्तं नित्यदश मिति ॥ १३ ॥

उक्तमेव सुव्यक्तं विवृणोति -

*न वक्तुं न श्रोतुं न मनितु मथोपासिसिषितुं*
*न च द्रष्टुं प्रेम्णा तदनु न च भोक्तुं हि सुशकम् ।*
*परं य द्वस्तूक्तं ननु वरद, साक्षा त्तदसि भोः*
*कथं विश्वस्मै त्वं करिगिरिपुर स्तिष्ठस इह ॥ १४ ॥*

नेति । हे वरद, यत् परं वस्तु सर्वस्मात्परं यत्तत्त्वं वक्तुमुपदेष्टुञ्च न सुशकं, श्रोतुञ्च न सुशकम् उपदिष्ट मपि श्रोतुं ग्रहीतुं न शक्यम् । एवं मनितुञ्च न सुशकं, श्रुत मपि युक्तिभिः प्रतिष्ठापयितुं च न शक्यम् । अथ मननानन्तरं उपासिसिषितुं च न सुशकम् उपासनाय वाञ्छितुं न शक्यम् । श्रुत्येति शेषः: । "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति तत्त्वदर्शिन आचार्यात् न्याययुक्तार्थ ग्रहणरूपस्य श्रवणस्य युक्तिभिः प्रतिष्ठापनरूपस्य मननस्य, तैलधारावदविच्छिन्न स्मृतिसन्तानरूपस्य निदिध्यासनस्य,

प्रत्यक्षसमानाकारस्य साक्षात्कारस्य च विहितत्वेऽपि "न चक्षुषा गृह्यते नाऽपि वाचा", "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति स्वरूपगुणयो रवाङ्मानसगोचरता प्रतिपादनात्, श्रवणपूर्वभाव्युपदेशेन सह साक्षात्कारानन्तर भाविनिरन्तरानुभवपर्यन्तस्य षड्विधस्यास्याशक्यत्व-मुक्तप्रायमिति भावः । साक्षा त्तदसि ननु य दुपदेशश्रवणमनननिदिध्यासन साक्षात्कारानुभावाना मशक्यत्व मुक्तम् निष्कृष्टं तत्परवस्तु भवसि किल । कथ मिह भूतले करिगिरिपुरः त्वं विश्वस्मै तिष्ठसे । सर्वस्मै जनाय स्वाश्रितान् रक्षिष्यामीत्यभिप्रायं प्रकाशयन् तिष्ठसीत्यर्थः । "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान" इति चतुर्थी । उपदेशादीना मशक्योऽपि कृत्स्नानुभाव्यतया करिगिरिपुरोभागे कथं सुलभो भवसीति भावः ॥ १४ ॥

अथ षाड्गुण्यपूर्णतां वर्णयति -

*प्रकृष्टं विज्ञानं बल मतुल मैश्वर्य मखिलं*
*विमर्यादं वीर्यं वरद, परमा शक्ति रपि च ।*
*परं तेज श्चेति प्रवरगुणषट्कं प्रथमजं*
*गुणानां निस्सीम्नां गणनविगुणानां प्रसवभूः ॥ १५ ॥*

प्रकृष्टमिति । हे वरद, प्रकृष्ट मुत्कृष्टं विज्ञानं, प्रकृष्टमित्यादि-ज्ञानादिविशेषणैश्चेतनज्ञानादयो व्यावर्त्या इति मन्तव्यम् । अतुलं निरुपमम् बलम्, अखिलम् असङ्कुचित मैश्वर्यं, विमर्यादं निरवधि वीर्यं, परमा प्रकृष्टा शक्ति रपि च । अपि चेत्येकं पदम् । पर मुत्कृष्टं तेजश्चेति, प्रथमजं परवासुदेवोद्भवं कृत्स्नगुणप्रथमगण्यं वा प्रवरगुणषट्कं श्रेष्ठगुणषट्कं गणनविगुणानां दया क्षमादीनां प्रसवभूः उत्पत्तिस्थानं भवति; दयाक्षमादयो ज्ञानशक्त्यादिशाखाभेदा इति भावः ॥ १५ ॥

भगवत स्समस्तकल्याणगुणत्वेऽपि परव्यूहविभागे गुणाविर्भाव-तिरोभावविभाग माह -

*गुणै ष्षड्भि स्त्वेतैः प्रथमतरमूर्ति स्तव बभौ*
*तत स्तिस्र स्तेषां त्रियुग, युगलै र्हि त्रिभि रभूत् ।*
*व्यवस्था या चैषा ननु वरद साऽऽ विष्कृतिवशा-*
*द्भवान्सर्वत्रैव त्वगणितमहामङ्गलगुणः ॥ १६ ॥*

गुणैरिति । हे वरद, त्रियुग, ज्ञानबले ऐश्वर्यवीर्ये, शक्तितेजसी इति त्रीणि युगानि यस्य तथोक्त भगवन् ! तव प्रथमतरमूर्तिः परम पदनिलयपरवासुदेवमूर्तिः, एतैष्षड्गुणैः बभौ भाति स्म । तदनन्तरं तिस्रो मूर्तयः, मूर्तय इति वचनव्यत्यासानुषङ्गः । तेषां गुणानां त्रिभि र्युगलैः युगलत्रयेण बभुः भान्तिस्मेति वचनव्यत्यासश्च । हि प्रसिद्धौ । यैषा व्यवस्था परवासुदेवमूर्तौ गुणाः षट्, सङ्कर्षणमूर्तौ ज्ञानबले, प्रद्युम्नमूर्तौ ऐश्वर्यवीर्ये, अनिरुद्धमूर्तौ शक्तितेजसी इति याऽसौ व्यवस्था उक्तेत्यर्थः सा च आविष्कृतिवशात् उपासकसौकर्याय गुणयुगलमेकमेव तत्तन्मूर्ता वाविष्कर्तव्यमिति सङ्कल्पवशादित्यर्थः । तर्हि गुणान्तराभाव इत्याशङ्क्याऽऽह भवानिति । भवांस्तु सर्वत्र सर्वमूर्ता वपि अगणितमहामङ्गलगुण एव असङ्ख्यातापरिच्छेद्यकल्याणगुणविशिष्ट एव अभूत् । अत्र "षाड्गुण्या द्वासुदेवः पर इति भगवान्मुक्तभोग्यो, बलाढ्या द्बोधा त्सङ्कर्षणस्त्वं हरसि वितनुषे शास्त्र, मैश्वर्यवीर्यात् । प्रद्युम्नस्सर्गधर्मौ नयसि च, भगवन्, शक्तितेजोऽनिरुद्धो बिभ्राणः पासि तत्त्वं गमयसि च तथा व्यूह्य रङ्गाधिराज !" इति श्रीरङ्गराजस्तवश्लोकोऽनुसन्धेयः ॥ १६ ॥

भगवत स्समस्तकल्याणगुणविशिष्टत्वेन विभवावतारेषु कृत्स्नगुणाविर्भाव इत्याशङ्क्य, तत्राऽप्याविर्भावतिरोभावौ सङ्कल्पायत्ता वित्याह -

*इयं वैयूही वै स्थिति रथ किलेच्छाविहृतये*
*विभूतीनां मध्ये सुरनरतिरश्चा मवतरन् ।*
*सजातीय स्तेषा मिति तु विभवाख्यामपि भजन्*
*करीश, त्वं पूर्णो वरगुणगणै स्तान् स्थगयसि ॥ १७ ॥*

इयमिति । हे करीश, इयं पूर्वोक्ता स्थितिः व्यवस्था वैयूही वै व्यूहसम्बन्धिनी प्रसिद्धा । अथ किल अनन्तरं खलु इच्छा विहृतये ऐच्छिकविहाराय मनोरथानुकूललीलायै विभूतीनां सुरनरतिरश्चां मध्ये स्वलीलापरिकरभूतानां देवमनुष्यतिर्यग्जातीनां मध्ये अवतरन् प्रादुर्भवन् वरगुणगणैः कल्याणगुणगणैः पूर्णः अत एव विभवाख्यां विभवविशिष्टोऽवतारो विभवावतार इति नामधेय मपि भजं स्त्वं तेषां सुरनरतिरश्चां सजातीय इति तु "आत्मानं मानुषं मन्ये रामं दशरथात्मजम्" इत्यादिप्रकारेण तत्तज्जातीयोऽभवम् इति हेतो रेव ता न्गुणगणान् स्थगयसि आच्छादयसि स्थग आच्छादने इति धातुः । सकल कल्याणगुणविभवेन विभवावतार इति प्रसिद्धौ सत्यामपि तत्तत्सजातीयताभिनयनिबन्धनं गुणतिरोधान मिति भावः ॥ १७ ॥

कल्याणगुणाविर्भावतिरोभावयो र्विषयविभाग माह-

*परो वा व्यूहो वा विभव उत वार्चावतरणो*
*भवन्वान्तर्यामी वरवरद यो यो भवसि वै ।*
*स स त्वं स न्नैशान्वरगुणगणा न्बिभ्रदखिला-*
*न्भजद्भ्यो भास्येवं सतत मितरेभ्य स्त्वितरथा ॥ १८ ॥*

पर इति । हे वरवरद, उतशब्दो वाऽर्थः । परो भवन्वा, व्यूहो भवन्वा, विभव उत विभवो भवन्वा, अर्चावतरणो भवन्वा, अन्तर्यामी भवन्वा यो यो भवसि वै यादृशो यादृशो भवसि वा स सन् तादृश स्तादृशो भवन् ऐशान् सर्वेश्वरत्वस्वरूपानुबन्धिनः अखिलान् वरगुणगणान् सर्वज्ञत्वसर्वशक्तित्वादिकल्याणगुणगणान् सततं बिभ्रत् दधान स्त्वं एवंविध समस्तकल्याणगुणगणविशिष्टत्वाकारेण भजद्भ्य स्सेवमानेभ्यः भासि । इतरेभ्य स्त्वभक्तेभ्य स्तु इतरथा निर्गुणो भासि । पराशरपराशर्यवाल्मीकिप्रह्लाद भीष्मादीनां भक्तानां सम्यक्प्रकाशिताः कल्याणगुणा एव बाह्यकुदृष्टिशिशुपालादीना मभक्तानां तिरोहिता इति भावः ॥ १८ ॥

दयादीनां स्वरूपगुणानां, रूपगुणानां सौन्दर्यादीनाञ्च भक्तजनभोग्यत्व माह -

*दयाक्षान्त्यौदार्य म्रदिमसमता सौहृदधृति-*
*प्रसादप्रेमाज्ञाऽऽश्रित सुलभताद्या वरगुणाः ।*
*तथा सौन्दर्याद्या स्तव वरदराजोत्तमगुणा*
*विसीमानोऽसङ्ख्याः प्रणतजनभोगं प्रसुवते ॥ १९ ॥*

दयेत्यादि। हे वरदराज, तव विसीमानः अपरिच्छेद्याः असङ्ख्याः, स्वार्थनिरपेक्षपरदुःखासहिष्णुता दया, शिक्षणक्षमस्याऽपि आगस स्सहिष्णुता क्षान्तिः, उपसत्तितारतम्यानुचिन्तनं विनैव चिन्तित-प्रदत्वमौदार्यम्, आश्रितविश्लेषासहत्वं म्रदिमा, जातिगुणवृत्ताद्यनादरेण कृत्स्नेऽप्यादर स्समत्वं, परहितैकप्रवृत्तचित्तत्वं सौहार्दम्, अपराधोद्घाटनेऽपि अनुकम्पावत्त्वं धृतिः, निर्व्याजनित्यसौमुख्यं प्रसादः, आश्रितसंश्लेषैकरसिकत्वं प्रेम, कृत्याकृत्यज्ञापन माज्ञा, अतीन्द्रियस्याऽपि आश्रयणयोग्यविग्रहपरिग्रह स्सौलभ्यम्, आश्रित-सुलभताद्याः वरगुणाः, आद्यशब्देन सौशील्यादयो गृह्यन्ते । तथा सौन्दर्याद्याः प्रत्यवयवशोभाप्रभृतयः उत्तमगुणाः । अत्राप्याद्यशब्देन लावण्यादयो गृह्यन्ते। प्रणतजनभोगं भक्तसङ्गसौख्यं प्रसुवते उत्पादयन्ति। प्रपूर्वात् षूङ् प्रणिप्रसवे इति धातोः आत्मनेपदि लट् बहुवचनम् ॥ १९ ॥

भगवतः स्वातन्त्र्यं सार्वज्ञ्यं च निन्दया स्तौति -

*अनन्याधीनत्वं तव किल जगु र्वैदिकगिरः*
*पराधीनं त्वान्तु प्रणतपरतन्त्रं मनुमहे ।*
*उपालम्भोऽयं भोः श्रयति बत सार्वज्ञ्यमपि ते*
*यतो दोषं भक्ते ष्विह वरद, नैवाऽऽकलयसि ॥ २० ॥*

अनन्येति। भो वरद, वैदिकगिरः "न तस्येशे कश्चन, तस्य नाम मह

द्यशः'', ''सर्वस्य वशी सर्वस्येशानः'', ''तमीश्वराणां परमं महेश्वरं, तं देवतानां परमञ्च दैवतम्'' इत्याद्युपनिषद्वाक्यानि तव अनन्याधीनत्वं स्वतन्त्रत्वं जगुः किल गायन्ति स्म, अकीर्तय न्नित्यर्थः । वयन्तु प्रणतपरतन्त्रं आश्रितवश्यं त्वां पराधीनं परतन्त्रं मनुमहे जानीमः । यतो यस्मात् कारणात्, इह लीलाविभूत्यां भक्तेषु दोष मेव नाऽऽकलयसि, न जानासि । दोषो यद्यपि तस्य स्या त्सता मेत दगर्हितम्'' इत्युक्तप्रकारेण दोषप्रसङ्गमपि न सहसे इत्यर्थः । अय मुपालम्भः आश्रित-दोषानभिज्ञत्वरूपः अपवादः ते सार्वज्ञ्यं सर्वज्ञत्वमपि श्रयति । आश्रितदोषानभिज्ञस्य कुतस्सर्वज्ञत्व मिति पर्यवस्यति । त्रय्यन्तप्रतिपादितं तव स्वातन्त्र्यं सौशील्यकामनारूप भक्तपारवश्यपराहतं, सर्वज्ञत्व मपि आश्रितदोषादर्शित्वरूपवात्सल्यपराहत मिति भावः ॥ २० ॥

इत्थं मन्त्ररत्नस्थ श्रीमत्पदं श्रीनिधिपदेन व्याख्याय नारपदार्थत्वेन प्रथमदशके करिगिरिमाहात्म्य मुक्त्वा, नारायणपदस्य गुणप्राधान्यविवक्षया कल्याणगुणान् द्वितीयदशके नाभिधाय दिव्यविग्रहयोगस्याऽपि नारायण शब्दार्थत्वाच्चरणशब्दार्थत्वेनाक्षिप्त-त्वाच्च द्वि चत्वारिंशच्छ्लोकै रमूर्धपादं दिव्यमङ्गलविग्रहं वर्णयितुं प्रारभते-

*पाणिपादवदनेक्षणशब्दै -*
*रम्बुजा न्यपदिशन्वरद, त्वम् ।*
*बाहुभिस्त्वतिविशालतमाला -*
*नाञ्जनं करिगिरे रसि शृङ्गम् ॥ २१ ॥*

पाणीति । हे वरद, पाणिपादवदनेक्षणशब्दैः करचरणाननयननामकैः, अवयवै रित्यध्याहार्यम् । अम्बुजानि अपदिशन् निरस्यन्, बाहुभिस्तु अतिविशालतमालान् अपदिशन् त्वं करिगिरेः आञ्जनं अञ्जनमयं शृङ्गमसि सानुरसि । ''शृङ्गं प्राधान्यसान्वोश्च'' इत्यमरः । अद्रिशृङ्गस्य स्वमूर्धसम्भूताम्बुजवत्त्वात् तमालद्रुमवत्त्वाच्च अम्बुजविजयि-

पाण्याद्यवयवः तमालविजयिबाहुः कालमेघश्यामस्त्व मञ्जनाकार-हस्तिगिरिसानु रिव विभासीति भावः ॥ २१ ॥

*त्वा मुदारभुज मुन्नस माय -*
*त्कर्णपाशपरिकर्मसदंसम् ।*
*आयताक्ष मभिजातकपोलं*
*पारणीयति वरप्रद दृङ्मे ॥ २२ ॥*

त्वा मिति । हे वरप्रद, मे दृक् चक्षुः उदारभुजं पीनवृत्तायतबाहुम्, उन्नस मुन्नतनासिकम् । "उपसर्गाच्च" इति नासिकाया नसादेशः । प्रशस्तः कर्णः कर्णपाशः, केशपाश इतिवत् । आयन्तौ आयतौ कर्णपाशौ परिकर्मणी भूषणे ययो स्तौ तथोक्तौ । सन्तौ शोभमानौ च अंसौ भुजशिरसी यस्य तथोक्तम्, आयताक्षं कर्णान्तविश्रान्तलोचनम्, अभिजातकपोलं सुन्दरगण्डं त्वां पारणीयति आत्मनः पारणमिच्छति "सुप आत्मनः क्यच्" इति क्यच्प्रत्ययान्तात् पारणशब्दा ल्लटिरूपम् । अनुभवितु मिच्छतीत्यर्थः ॥ २२ ॥

*नीलमेघनिभमञ्जनपुञ्ज*
*श्यामकुन्तल मनन्तशयं त्वाम् ।*
*अब्जपाणिपद मम्बुजनेत्रं*
*नेत्रसात्कुरु करीश सदा मे ॥ २३ ॥*

नीलमेघनिभ मिति । हे करीश, नीलमेघनिभं कालमेघश्यामलम् अञ्जनपुञ्जश्यामकुन्तलम् अञ्जनराशिरिव श्यामकेशपाशम्, अब्जपाणिपदम् अम्बुजनेत्रम् तामरससदृशकरचरणनयनम् अनन्तशयं शेषशयनं त्वां सदा नेत्रसात्कुरु चक्षुर्विषयं कुरुष्व । "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इत्युक्तं सदा दर्शनं दातव्य मित्यभिप्रायः । "भाष्यकारविश्लेषकाले विलोचन विकलैः श्रीवत्सचिह्नमिश्रैः निर्मित मिमं वरदराजस्तवं पुन रागत्य शृण्वन्तो भाष्यकाराः एतच्छ्लोक-श्रवणसमये श्रीवत्सचिह्नमिश्रचक्षुः प्रेक्ष्य 'किमिति वरदराजो दयानिधिः

नेत्रं न दत्तवा निति शङ्कितवन्तः । तदानीं 'सदा दर्शन मेव मया प्रार्थित' मिति परिहृतञ्च' इत्यैतिह्य मस्ति । अतः, उक्तं सदादर्शन मेव सम्य ग्विवृण्वद्भिः प्रार्थ्यते इति हृदयम् ॥ २३ ॥

*त्वक् च दृक् च निपिपासति जिह्वा*
*विह्वला श्रवणवत्परवृत्तौ ।*
*नासिका त्वयि करीश, तथेति*
*प्राप्नुयां कथ मिमां स्वि दवस्थाम् ॥ २४ ॥*

त्वगिति । हे करीश, त्वयि विषये त्वक् च दृक् च मम चक्षुरिन्द्रियं त्वगिन्द्रियञ्च निपिपासति नितरां पातु मिच्छति, रसनेन्द्रियव्यापारं वाञ्छतीत्यर्थः । जिह्वा रसनेन्द्रियं श्रवणवत् श्रोत्रेन्द्रियवत् परवृत्तौ दर्शनस्पर्शनादिके इन्द्रियान्तरव्यापारे विह्वला व्याकुला चपला भवति । श्रोत्रेन्द्रियं यथेन्द्रियान्तरव्यापारचपलं भवति तथा रसनेन्द्रियमपि भवतीत्यर्थः । नासिका घ्राणेन्द्रियञ्च तथा परवृत्तौ विह्वला भवतीति कथं स्वित् कथं वा इतीमामवस्थां प्राप्नुयाम् एतादृशीं दशां प्राप्तो भूयासम् । "पश्य त्यचक्षु स्स शृणोत्यकर्णः", "विश्वतश्चक्षुरुत विश्वतोमुखः", "नयनश्रवणो दृशा शृणो ष्यथ ते रङ्गपते महेशितुः, करणैरपि कामकारिणो घटते सर्वपथीन मीक्षणम्" इत्यादि प्रतिपादित सर्वपथीनप्रत्यक्षवतो भगवतः परमसाम्यापत्तिरूपमुक्ति मुपेत्य तथाविधप्रत्यक्षेण यथामनोरथं भगवन्त मनुभवेय मित्यर्थः ॥ २४ ॥

इत्थं श्लोकचतुष्टयेन दिव्यमङ्गलविग्रह शोभा मनुभूय प्रत्यवयवशोभ मनुभवितुं प्रारभते -

***आधिराज्य मधिकं भुवनाना -***
***मीश, ते पिशुनय न्किल मौलिः ।***
***चूलिकामणिसहस्रमरीचे -***
***र्हस्तिभूषण भवत्युदयाद्रिः ॥ २५ ॥***

आधिराज्य मिति । हे ईश, स्वामिन्, हस्तिभूषण, हस्तिगिरिशेखरभूत, भुवनानां सकललोकानाम् अधिक माधिराज्यं सर्वसाम्रज्यं पिशुनयन् सूचयन् ते मौलिः किरीटं, "चूडा किरीटं केशाश्च संयता मौलयः" इत्यमरः । चूलिकामणिः शिखारत्नं किरीट-शिखरस्थानीयरत्नं स एव सहस्रमरीचिः सूर्यः, तस्य उदयाद्रि र्भवति । किलेत्युत्प्रेक्षायाम् । उभयविभूतिसाम्राज्यसूचकदेवराजकिरीटं विशृङ्खल-मयूखसङ्घात स्वशिखामणिद्युमणे रुदयगिरि रिव विभातीति भावः ॥ २५ ॥

*उद्धरत्युपरि भक्तजना नि-*
*त्यूर्ध्वताश्रयणसूचितशक्तिम् ।*
*ऊर्ध्वपुण्ड्रतिलकं बहुमाना -*
*त्किं बिभर्षि वरद स्वललाटे ॥ २६ ॥*

उद्धरतीति । हे वरद, 'इद मूर्ध्वपुण्ड्रतिलक' मिति कर्तृपद मध्याहार्यम् । भक्तजनान् भगवद्भक्ति मतो जनान् उद्धरति स्वधारणे नोर्ध्वगतिं प्रापयति इति एव मूर्ध्वताश्रयणेन ऊर्ध्वाकार विशिष्टतया सूचिता ज्ञापिता शक्तिवीच्यं प्रति वाचकभावो येन तं तथोक्तम् । ऊर्ध्वगतिं प्रापयती त्यूर्ध्वपुण्ड्रम् इति शब्दशक्ति रूर्ध्वाकारवैशिष्ट्येन ज्ञापितेत्यर्थः । एवम्भूत मूर्ध्वपुण्ड्रतिलकं बहुमानात् स्वभक्तोद्धारकत्वप्रयुक्तसत्कारात्, स्वललाटे बिभर्षि किम् ? "स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्, भस्मीभवति तत्सर्व मूर्ध्वपुण्ड्रं विना कृतम्" इति कर्माङ्गतया धारणन्तु भवतो न सम्भवतीति भावः ॥ २६ ॥

*कर्णिका तव करीश, कि मेषा*
*कर्णभूषण मुतांसविभूषा ।*
*अंसलम्ब्यलकभूषण माहो*
*मानसस्य मम वा परिकर्म ॥ २७ ॥*

कर्णिकेति । हे करीश, तव एषा कर्णिका कर्णभूषणम् । "कर्णललाट

त्क न्नलङ्कारे' इति कन्प्रत्ययः । कर्णभूषणं किं, कर्णस्यैव भूषणं किमित्यर्थः। उत अथवा, अंसविभूषा अंसप्रान्तप्रलम्बमानत्वा दंसस्यैव अलङ्कारो वेत्यर्थः । आहो यद्वा, असंलम्ब्यलकभूषणं असंप्रलम्बमानचूर्णकुन्तलापलङ्कारो वेत्यर्थः। मम मानसस्य परिकर्म वा कर्णभूषणांसशोभालकभूषणनुबुभूषुमदीयहृदयशोभावहा वा, उक्तचतुष्टयस्याऽपि भूषणं भवतीति भावः ॥ २७ ॥

*पारिजातविटपा नभितो या*
*पुष्पसम्प दुदिया त्करिनाथ।*
*तां विडम्बयति तावक बाहु -*
*ष्वातता तु कटकाङ्गदलक्ष्मीः ॥ २८ ॥*

पारिजातेति । हे करिनाथ, तावक बाहुषु आतता विस्तृता कटकाङ्गदलक्ष्मीः वलयकेयूरशोभा तु पारिजातविटपानभितः कल्पशाखिशाखाः परितः या पुष्पाणां सम्पत् शोभा उदियात् उदयं प्राप्नुयात् तां पुष्पशोभां विडम्बयति अनुकरोति। पारिजातद्रुमसदृशस्य वरदराजस्य विटपसदृशेषु बाहुषु पुष्पशोभासदृशी कटकाङ्गदशोभेत्यर्थः ॥ २८ ॥

*मथ्यमान चल फेनिलसिन्धु -*
*प्रोत्थितिक्षणदशाङ्गमितौ ते।*
*वक्षसि स्फुरित मौक्तिकहारे*
*कौस्तुभश्च कमला च करीश ॥ २९ ॥*

मथ्यमानेति। हे करीश, स्फुरितमौक्तिकहारे चलितमुक्तादामनि ते तव वक्षसि कौस्तुभश्च, कमला लक्ष्मीश्च उभौ, मथ्यमानः क्रियमाण मथनः अत एव चलफेनिलः चञ्चलफेनवांश्च यः सिन्धु स्समुद्रः तस्मात्प्रोत्थितिक्षणदशां उद्भूतिसमयावस्थां गमितौ प्रापितौ, समुद्रसदृशशोभे, भगवतः, चञ्चलमुक्ताहारे (च) वक्षसि स्थितौ लक्ष्मीकौस्तुभौ मथनकाले चलफेनमालसमुद्रोद्भूता विव भात इति भावः।

प्रादुर्भवल्लक्ष्मीकौस्तुभमथनचलफेनमाल - समुद्रसाम्यं लक्ष्मीकौस्तुभाधिष्ठितस्य स्फुरितमौक्तिकहारस्य भगवद्वक्षसः फलितम् । "फेनाच्च" इति मत्वर्थेलच् प्रत्ययः ॥ २९ ॥

*अञ्जनक्षितिभृतो यदि नामो -*
*पत्यका वरद, हेममयी स्यात् ।*
*तादृशी तव विभाति तु लक्ष्मी -*
*राम्बरी बत ! विडम्बितविद्युत् ॥ ३० ॥*

अञ्जनेति । हे वरद, अञ्जनक्षितिभृतः अञ्जनमयपर्वतस्य उपत्यका पर्यन्तभूमिः । "उपत्यकाऽद्रे रासन्ना भूमिः" इत्यमरः । हेममयी स्याद्यदि नाम, विडम्बितविद्युत् अनुकृतसौदामनी, सौदामनीसदृशी, आम्बरी लक्ष्मीः पीताम्बरसम्बन्धिनी शोभा तु तादृशी विभाति । काञ्चनमयाञ्जनपर्वतोपत्यकासदृशी भासते । नामेति प्रसिद्धौ । बते त्याश्चर्ये ॥ ३० ॥

*परभाग मिया क्ष्वे स्तमिस्रा*
*वरदाऽद्य त्वयि तं निशामयामः ।*
*गमिता तव वक्त्रचित्रभानोः*
*परभागं ननु कौन्तली तमिस्रा ॥ ३१ ॥*

परभागमिति । हे वरद ! तमिस्रा रात्रिः रवे स्सूर्यस्य परभागं पश्चाद्भागम् इया त्प्राप्नुयात्, रवे रस्तमयकाल एव रात्रेः प्रादुर्भावा दिति भावः । तत्परभागगमनं अद्य त्वयि त्वदीयदिव्यविग्रहे निशामयामः पश्यामः । तव कौन्तली अलकसम्बन्धिनी तमिस्रा कुन्तलाख्या रात्रि रित्यर्थः । वक्त्रचित्रभानोः वदनतपनस्य परभागं वर्णोत्कर्षम् । वर्णान्तरसन्निधानजन्यवर्णोत्कर्षस्य परभाग इति नाम । पश्चाद्भागं गमिता प्रापिता । परभाग एव परभाग इति श्लिष्टरूपकम् । लोकप्रसिद्धा रात्रे स्सूर्यपरभागप्राप्तिः, प्राप्तवक्त्रचित्रभानुपरभागायां त्वदीयकुन्तलतमिस्रायां स्पष्टं दृष्टेति निष्कृष्टोऽर्थः । सहस्रभानुसन्निभभगवद्वदनशोभा सन्निधानात्तमिस्रा सदृशकुन्तलशोभा सुतरां भासते इति भावः ॥ ३१ ॥

*उभयो रपि पक्षयो स्तिथिर्या*
*विषमीभावनिरासदाऽष्टमीति।*
*उपमानजसम्पदे हि सेन्दो -*
*र्वरदाऽभूद्भवतो ललाटलक्ष्म्याः ॥ ३२ ॥*

उभयो रिति। हे वरद, उभयोः पक्षयोः शुक्लकृष्णपक्षयो रपि इन्दोः चन्द्रस्य विषमीभावनिरासदा वैषम्यनिरसनप्रदा वृद्धिक्षययो रपि अष्टकलाविशिष्टतारूपसाम्यकरी या अष्टमी तिथिरस्ति सा तिथिः भवतो ललाटलक्ष्म्याः अलिकशोभायाः उपमानजसम्पदे उपमाने सदृशवस्तुनि जायमाना या सम्पत् शोभासमृद्धिः, तस्यै उपमानसम्पदे अभूत् अर्धचन्द्रोपमानसम्पादनाय अभूत्। इन्दोः भवतो ललाटलक्ष्म्याः उपमानसम्पदेऽभूदिति। 'इन्दो' रिति पदस्य उभयत्राप्यन्वयः। इन्दोः कलासाम्यप्रदा अष्टमी, वरदराजललाटसाम्यप्रदा च अभूदित्यर्थः। वरदराजललाटं पक्षद्वयाष्टमीचन्द्रसदृशं भवतीति पर्यवसितोऽर्थः ॥ ३२ ॥

*अलकालिचिकीर्षया किलात्ता*
*सुपरीचिक्षिषया ललाटपट्टे।*
*सुमषी निकषीकृता भ्रुवौ ते*
*वरद, स्या दकृतत्वत स्तु नैवम् ॥ ३३ ॥*

अलकेति। हे वरद! कर्तु मिच्छा चिकीर्षा। परीक्षितु मिच्छा परीचिक्षिषा। 'विधात्रा' इत्यध्याहार्यम्' विधात्रा अलकालिचिकीर्षया कुन्तलपङ्क्तिनिर्माणेच्छया आत्ता स्वीकृता, सुपरीचिक्षिषया कुन्तल पङ्क्त्युपादानकारणतया गृहीता इयं मषी अतिकाला वा, न वा इति परीक्षितु मिच्छया, ललाटपट्टे वरदराजालिकाख्ये निकषोपलफलके निकषीकृता निकृष्टा सुमषी शोभना मषी भ्रुवौ स्या त्किल। भ्रूयुगत्वेन व्यवह्रियते इत्युत्प्रेक्षितुं शक्यते इत्यर्थः। अकृतत्वतस्तु दिव्यविग्रहस्य "इच्छागृहीताभिमतोरुदेहः", "प्रकृतिं स्वा मधिष्ठाय सम्भवाम्यात्म-

मायया", "न तस्य प्राकृता मूर्तिः" इत्याद्युक्तप्रकारेण नित्यत्वात्तु, नैवम् एवमुत्प्रेक्षा न सम्भवति; नित्यस्य निर्माणाद्यसम्भवा दिति भावः ॥ ३३ ॥

*श्रवसश्च दृशश्च शब्दरूप*
*ग्रहणे ते न हि जीववद्व्यवस्था।*
*उभयो रखिलेक्षणक्षमत्वा -*
*द्वरदातः, श्रवणाश्रयौ दृशौ ते ॥ ३४ ॥*

श्रवसश्चेति। वरदातः, ते तव श्रवसश्च श्रोत्रस्य च दृशश्च यथा क्रमं शब्दरूपग्रहणे जीववद्व्यवस्था नहि। श्रोत्रेणैव शब्दो ग्राह्यः दृशैव रूपं ग्राह्य मिति नियमो नास्तीत्यर्थः। स्वय मेव कर्णपर्यन्तायते दृशौ। तत्र उत्प्रेक्ष्यते। जीवात्मश्रोत्रादीनां शब्दा द्येकैकविषयग्राहकत्व नियमवत् भगवदिन्द्रियाणां नियमाभावात् दृश श्शब्दग्राहकत्वात्, श्रोत्रस्य च रूपग्राहकत्वात् उभयो स्सङ्करोऽभव दित्यर्थः ॥ ३४ ॥

*करुणारसवाहिवीक्षणोर्मे -*
*र्वरदप्रेममयप्रवाह भाजः।*
*ततितीरवनावली भ्रुवौ दृ -*
*क्चलसिन्धौ स्तव नासिकैव हेतुः ॥ ३५ ॥*

करुणेति। हे वरद! करुणारसं वहतीति प्रवहतीति करुणारसवाही, वीक्षणोर्मिः अपाङ्गतरङ्गो यस्य तथोक्तस्य। करुणाया रसत्वं रस्यतयेति मन्तव्यम्। प्रेममयप्रवाहभाजः तव दृक्चलसिन्धोः प्रणयरूप-प्रवाहवत्त्वानुगुणं चलसिन्धुत्वनिरूपणम्। भ्रुवौ तते विस्तृते तीरवनावली, भवत इति शेषः। नासिकैव सेतु र्भवति। अत्यन्त भोग्यानुकम्पेक्षण-क्षमवीक्षणोर्मेः बहुलप्रणयप्रवाहवतश्चक्षुस्सुखोत्तरलसागरस्य तीरवनावलीद्वयस्थानीये भ्रुवौ, नासिका सेतुस्थानीयेत्यर्थः ॥ ३५ ॥

*विभवं विवृणोति विस्तृणीते*
*रुच माविष्कुरुते कृपा मपाराम्।*

*अभिवर्षति हर्ष मार्द्र भावं*
*तनुते ते वरदैष दृष्टिपातः ॥ ३६ ॥*

विभव मिति। हे वरद, ते तव, एष दृष्टिपातः, अस्माक मपि साक्षात्कारक्षमः कटाक्षः विभवं विवृणोति भवदीय मुभयविभूति-सार्वभौमत्वं व्यक्तं करोति, रुचं शोभां विस्तृणीते विस्तृतां करोति। 'तस्य यथा कप्यासं पुण्डरीक मेव मक्षिणी' इति, 'रामो राजीवलोचन', ''कृष्णं कमलपत्राक्षम्'' इत्याद्युक्ता मखण्डितोल्लासपुण्डरीकसदृशतां प्रकाशयतीत्यर्थः। अपारं निरवधिं, कृपा माविष्कुरुते सूचयति, अपारां कृपां प्रवहतीत्यर्थः ॥ ३६ ॥

*अरुणाधरपल्लवे लसन्ती*
*वरदाऽसौ द्विजचन्द्रचन्द्रिका ते।*
*अधिविद्रुममस्तनिस्तलाली*
*रुच माविष्कुरुते हि पुष्कराक्ष ॥ ३७ ॥*

अरुणेति। हे पुष्कराक्ष, हे पुण्डरीकाक्ष, वरद, अरुणाधरपल्लवे अरुणे अत एव पल्लवतुल्ये अधरे लसन्ती प्रकाशमाना असौ द्विजचन्द्रचन्द्रिका चन्द्रसदृशदन्तप्रभा अधिविद्रुमं विद्रुमे । सप्तम्यर्थेऽव्ययीभावः । अधिविद्रुममस्तां निरस्ताञ्च तां निस्तलालीरुचं मौक्तिकशोभाम् आविष्कुरुते प्रकाशयति। अधिविद्रुममस्तनिस्तलालीरुच मित्येकं पदम्। भगवत स्समुद्रसाम्य, मधरस्य विद्रुमलतासाम्यं, तदुपरि भासमान मौक्तिकावलीशोभासाम्यं दन्तपङ्क्तिशोभायाश्चाभिमतम् ॥ ३७ ॥

*स्मितनिर्झरिका विनिष्पतन्ती*
*तव वक्षःस्थलभूतले विशीर्णा।*
*वरद, प्रबिभर्ति हारलक्ष्मी -*
*मपि मुक्तावलिका नदीव तज्जा ॥ ३८ ॥*

स्मितेति। हे वरद, विनिष्पतन्ती उन्नतस्थानात् पतन्ती तव स्मितनिर्झरिका। वदनस्य वक्षः स्थलापेक्षया उन्नतत्वात् तस्मा न्निष्पततः स्मितस्य निर्झरत्वेन निरूपणम्। वक्षः स्थलमेव भूतलं तस्मिन् विशीर्णा प्रकीर्णा सती हारलक्ष्मीम् "हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टिका। हारभेदा यष्टिभेदात् गुत्सगुत्सार्धगोस्तनाः" इत्युक्तत्वात्, प्रकीर्णा, निर्झरसादृश्याश्च शतयष्टिक सहस्रयष्टिकहारशोभां प्रबिभर्ति। मुक्तावलिकाऽपि एकयष्टिका मुक्तावल्यपि, तज्जा निर्झरजा नदीव कुल्यातुल्या, भातीति शेषः। परिमलझरीत्यादि प्रयोगानुगुण्यात् निर्झरी, निर्झरिका, निर्झर इति इतिच पर्यायशब्दाः। अधो विजृम्भमाणं स्मित मपि हारत्वेन पर्यवसितम्। एकावली तु तदेकदेश इवाऽऽभातीति भावः॥ ३८॥

*परिमण्डित रासमण्डलाभि*
*र्वरदाघ्रात मभीष्टगोपिकाभिः।*
*अनुवर्तितदातनप्रहर्षा*
*दिव फुल्लं हि कपोलयो र्युगन्ते॥ ३९॥*

परिमण्डितेति। हे वरद, परिमण्डितं परिष्कृतं रासमण्डलं याभिस्ताभिः अभीष्टगोपिकाभिः प्रियाभि र्गोपाङ्गनाभिः आघ्रातं ते कपोलयोर्युगम् अनुवर्तितदातनप्रहर्षा दिव, गोपाङ्गनाघ्राणकालीन-प्रीत्यनुवृत्त्येवेत्यर्थः। इदानीमपि अनुवृत्तात् तदानीन्तनानन्दातिशया दिव फुल्लं विकसितं हि। परस्परसंश्लिष्टबाहुकानेक विग्रहपरिग्रह कृष्णगोपाङ्गनामण्डलप्रवृत्तनृत्तविशेषोरासः। रासक्रीडाकाले उभयपार्श्व-स्थिताभ्यां गोपिकाभ्यां प्रतिविग्रहं कपोलद्वय मपि प्रीत्यतिशयेनाऽऽघ्रातं भवतीति, तदानीन्तनाना मनेकेषां विग्रहाणां कपोलयो र्यावान्वा विकासो जातः तावा नपि विकासो वरदराजकपोलयो र्विकास इति भावः॥ ३९॥

*मुख मुन्नस मायताक्ष मुद्य-*
*त्स्मितदन्तं रुचिराधरं नतभ्रु।*

*लसदंसविलम्बिकर्णपाशं*
*मयि ते निश्चल मस्तु हस्तिनाथ ॥ ४० ॥*

मुख मिति । हे हस्तिनाथ, उन्नसम् उन्नतनासिकम् "उपसर्गाच्च" इति नासिकाया नसादेशः । आयताक्षं कर्णपर्यंतायतनयनम्, उद्यत्स्मिताः प्रादुर्भवन्मन्दहासाः दन्ताः यस्मिं स्तत् । रुचिराधरं पल्लवतुल्याधर मित्यर्थः । नतभ्रु कुञ्चितभ्रूयुगं, लसति शोभमाने अंसे भुजशिरसि विलम्बिनौ प्रलम्बमानौ कर्णपाशौ यस्य तत् मुखं मयि निश्चल मस्तु; मदवलोकनैकासक्त मस्त्वित्यर्थः ॥ ४० ॥

*पद्मायाः प्रणयरसा त्समासजन्त्याः*
*स्वं बाहुं सुबहुमतो भुजेन तेन ।*
*कां नामाऽन्वभव दहो दशां तदात्वे*
*कण्ठ स्ते करिगिरिनाथ कम्बुकान्तः ॥ ४१ ॥*

पद्माया इति । हे करिगिरिनाथ, कम्बुकान्तः शङ्खवत्सुन्दरः ते कण्ठः प्रणयरसात् अत्यन्तरस्यप्रणयात् तेन भुजेन समुद्रमथनसमर्थेन आश्रितविपक्ष सङ्घशिक्षणक्षमेण वा भुजेन स्वं बाहुं समासजन्त्याः समासक्तं कुर्वत्याः भुजेन रह कण्ठमालिङ्गन्त्या इत्यर्थः । पद्माया इन्दिरायाः सुबहुमतः अत्यन्तसत्कृतस्सन्, तदात्वे तदानीं, "तत्काल स्तु तदात्वं स्यात्" इत्यमरः । कां नाम दशां कां वा दशां अन्वभवत् अनुभूतवान् अनिर्वचनीय भोगवती सा दशा भगवत्कण्ठैकवेद्येति भावः । पद्मायाः आलिङ्गनं क्षीराब्धेः प्रादुर्भावकालीनं, "तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् । बभूव दृष्टा वैदेही भर्तारं परिषस्वजे" इत्युक्तं खरादिवधकालीनं वा ॥ ४१ ॥

*सायामा धृतपरिणद्धयोऽब्धयो वा*
*तादृश्यः स्फुट मथवा दिशश्चतस्रः ।*
*चत्वारो वरद वरप्रदा स्त्वदीया*
*भासन्ते भुजपरिघा स्तमालनीलाः ॥ ४२ ॥*

सायामा इति । हे वरद, तमालनीलाः तमालद्रुमवत् श्यामलाः वरप्रदाः आश्रितजनाभीष्टार्थप्रदायिनः चत्वारः त्वदीयाः भुजपरिघाः परिघसमानभुजाः आयामेन दैर्घ्येणसहिताः सायामाः, धृता परिण द्धिः परिणाहः विशालता यै स्तथोक्ताः, अब्धयो वा समुद्रा इव भासन्ते । अथ तादृश्यः आयामपरिणाहवत्यः चतस्रः दिशो वा दिश इव भासन्ते। स्फुटम् । समुद्रस्य नैल्यं सुप्रसिद्धम् । दिशा मपि नभःप्रदेशविशेषत्वात् नैल्यं सिद्धम् । चतुस्सङ्ख्यत्वनैल्यपीवरत्वैः समुद्राणां दिशाञ्च भुजसाम्य मिति मन्तव्यम् ॥ ४२ ॥

*आश्लेषे वरद भुजा स्तवेन्दिराया*
*गोपीना मभिमतरासबन्धने वा ।*
*बन्धे वा मुद मधिकां यशोदयाऽऽहो*
*सम्प्राप्ता स्तव नवनीत मोषदोषात् ॥ ४३ ॥*

आश्लेषे इति । हे वरद, तव भुजाः इन्दिरायाः श्रियः आश्लेषे आलिङ्गने वा, गोपीना मभिमतरासबन्धने अतिप्रियकरे रासक्रीडाकालीन-गोपाङ्गनालिङ्गने वा, आहो अथवा नवनीतमोषः नवनीतचौर्यं, स एव दोषः तस्माद्धेतोः यशोदया बन्धे वा अधिकां मुदं प्रीतिं प्राप्ताः ? परत्वदशावहा दिन्दिरालिङ्गना दपि अतिप्रीतिकरं स्वैरसङ्गत-गोपाङ्गनालिङ्गनं, ततोऽप्यतिप्रीतिकरं प्रेमान्धया यशोदया निरङ्कुशस्वतन्त्रस्वसौशील्यातिशयनिबन्धनं बन्धन मिति भावः ॥ ४३ ॥

*सालीया इव विटपा स्सपल्लवाग्राः*
*कल्लोला इव जलधे स्सविद्रुमाग्राः ।*
*भोगीन्द्रा इव च फणामणीद्धवक्त्रा*
*भासन्ते वरद भुजा स्तवारुणाग्राः ॥ ४४ ॥*

सालीया इति । हे वरद, अरुणाग्राः अरुणवर्ण करतलाङ्गुलिकाः तव भुजाः, सपल्लवानि पल्लवसहितानि अग्राणि येषान्ते तथोक्ताः । सालीयाः सालवृक्षसम्बन्धिनः विटपाश्शाखा इव च, सविद्रुमाणि

सप्रवालानि अग्राणि येषां ते तथोक्ताः जलधेः कल्लोला इव च। "अथोर्मिषु महत्सूल्लोलकल्लोलौ" इत्यमरः। फणामणिभि रिद्धानि दीप्तानि वक्त्राणि येषां ते तथोक्ताः। इन्धी दीप्तौ इति धातुः, भोगीन्द्रा इव च शेषवासुकिप्रभृतय इव भासन्ते॥ ४४॥

*अम्भोधेः स्वय मभिमन्थनं चकर्थ*
*क्षोणीध्रं पुन रभिभश्च सप्तरात्रम्।*
*सप्तानां विवलयसि स्म कण्ठ मुक्ष्णा -*
*मम्लाना वरद, तथाऽपि पाणय स्ते॥ ४५॥*

अम्भोधे रिति। हे वरद, स्वय मम्भोधे रभिमन्थनं मन्थनं चकर्थ कृतवानसि। सप्तानां रात्रीणां समाहार स्सप्तरात्रं, सङ्ख्यापूर्वा द्रात्रिशब्दात् समाहारेऽच् प्रत्ययः। क्षोणीध्रं गोवर्धनाद्रिं पुनः अभिभः भृतवान्। [1]भृञ् भरणे इति धातो र्लङ्मध्यमैकवचनम्। सप्ताना मुक्ष्णां वृषभाणां कण्ठं विवलयसि स्म। विवक्रितवान् भुग्नं कृतवान्। [2]सत्यभामाविवाहकाले तत्पित्रा तथा पणबन्धः कृत इति प्रसिद्धिः। कण्ठ मिति जात्येकवचनम्। तथाऽपि जलधिमथनादिदुष्करकरणेऽपि, ते पाणयः अम्लानाः म्लानिप्रसङ्गरहिताः। लीलयैव दुष्करकराः तव कराः अस्मद्रक्षणक्षमा इत्यभिप्रायः॥ ४५॥

*रिङ्खतो व्रजसदनाङ्गणेषु किन्ते*
*गोयष्टिग्रहणवशान्नु गोपगोष्ठ्याम्।*
*आलम्बा द्धयनयसूत्रतोत्रयोर्वा*
*पाणीनां वरद, तवारुणत्व मासीत्॥ ४६॥*

रिङ्खात इति। हे वरद, व्रजसदनाङ्गणेषु नन्दगोपव्रजे यानि सदनानि गृहाणि तेषा मङ्गणेषु अजिरेषु गोपगृहप्रान्तप्रदेशे ष्वित्यर्थः। रिङ्खतः जानुभ्यां पाणिभ्याञ्च भूमि मवलम्ब्य चङ्क्रमणात् किम्? गोपगोष्ट्यां गोपालपरिषदि गोयष्टिग्रहणवशात् गोरक्षणसाधन दण्डग्रहणसञ्जात-

1. डुभृञ् धारणापोषणयोरित्युचितम्। 2. नीला इति भाव्यम्।

विमर्दात् किम् ? हयनयसूत्रतोत्रयोः नयः नयनम्, अर्जुनसारथ्यकालीन हयप्रचारसाधनसूत्रतोत्रयोः, शीघ्रगमनकाले आकृष्य स्तम्भनार्थं हयग्रीवाबद्धं सूत्रम्, गमनकाले प्रेरणार्थयष्टि स्तोत्रं, तयो रालम्बनात् ग्रहणा द्वा तव पाणीना मरुणत्व मासीत् । पाणीना मति सुकुमारत्व मवलम्ब्य सहजेऽप्यरुणत्वे हेतव उत्प्रेक्ष्यन्ते ॥ ४६ ॥

*सर्वज्ञा स्समुचितशक्तय स्सदैव*
*त्वत्सेवानियमजुष स्त्वदेकभोगाः ।*
*हेतीना मधिपतय स्सदा किमेतान्*
*शोभार्थं वरद, बिभर्षि हर्षतो वा ॥ ४७ ॥*

सर्वज्ञा इति । हे वरद, हेतीना मधिपतयः सुदर्शनादयः सर्वज्ञाः भवद्वावज्ञा इत्यर्थः । समुचितशक्त्यः हस्तेनोद्धृत्य प्रयोगाभावेऽपि शत्रुविजयसमर्था इत्यर्थः । सदैव, त्वदेकभोगाः विश्लेषासहिष्णव इत्यर्थः । अत एव त्वत्सेवानियमजुषः नियमेन त्वत्सेवाभाजश्च, एता नुक्तविशेषण चतुष्टयविशिष्टान् सुदर्शनपाञ्चजन्य शार्ङ्गकौमोदकीनन्दकान् सदा शोभार्थं बिभर्षि किं भूषणत्वेन वा दधासि ? हर्षतो वा सर्वज्ञत्वादिवैशिष्ट्यजनित हर्षप्रकर्षाद्वा बिभर्षि ? आयुधतया धारणस्य वृथाऽऽयासत्त्वात् भूषणकोटावन्तर्भाव इत्यभिप्रायः । अय मर्थः 'स्फुरत्किरीटाङ्गदहार-कण्ठिका' इत्यादि स्तोत्ररत्नश्लोकेऽप्यनुसंहितः ॥ ४७ ॥

*किं धातु र्गगनविधानमातृकाऽभू-*
*द्वक्ष स्ते वरद वरेण्य यत्र नाम ।*
*पद्माया मुख मथ कौस्तुभश्च जातौ*
*चन्द्रार्का वुडुनिकरायते तु हारः ॥ ४८ ॥*

किमिति । हे वरदवरेण्य वरदश्रेष्ठ वरदराजे त्यर्थः । यत्र वक्षसि पद्माया मुखं, कौस्तुभश्च चन्द्रार्कौ जातौ, चन्द्रसूर्यौ भवत इत्यर्थः । हार स्तु उडुनिकरायते उडुनिकरवदाचरति नक्षत्रसमूहसदृशो भवति । ते तव तद्वक्षः

धातुश्चतुर्मुखस्य गगनविधाने आकाशनिर्माणे मातृका प्रकृति रभूत्किम् ? किं वक्षो वीक्ष्य गगनं निर्मितवानित्यर्थः। "नीलत्वाल्लक्ष्मीवदनकौस्तुभ-रत्नमुक्तावलीरूप चन्द्र सूर्य नक्षत्रविशिष्टत्वा न्नित्यत्वाच्च वक्ष एवा-ऽन्तरिक्षं विधातुं मातृकाऽभवदिति भावः ॥ ४८ ॥

*अण्डानां त्वदुदर मामानन्ति सन्तः*
*स्थानं त द्वरद कथं नु कार्श्यमस्य।*
*माहात्म्यं स्वत इह येषु नून मेषा -*
*मृद्धिः स्यान्महिमकरी न हीतरेषाम् ॥ ४९ ॥*

अण्डाना मिति। हे वरद, सन्तः ब्रह्मविदः, त्वदुदरं अण्डानां स्थान मामनन्ति । प्रलयविशेषे कृत्स्नानि ब्रह्माण्डानि भवज्जठरनिष्ठानीति पराशरादयः स्मरन्ति इत्यर्थः । तत् तस्मा त्कारणात् अस्य त्वदुदरस्य कार्श्यं कृशत्वं कथं नु घटते इत्यर्थः । आक्षिप्तमर्थ मर्थान्तरन्यासेन समाधत्ते- माहात्म्य मिति। इह जगति येषु वस्तुषु माहात्म्यं महत्त्वं स्वतः स्वतस्सिद्धं भवति। येषांस्वतो माहात्म्यं तेषां ऋद्धिः महिमकरी स्यात्, इतरोषां न तथा । हि प्रसिद्धौ । क्षुद्राणां समृद्धिसद्भावेऽपि माहात्म्यं न दृष्टम् । अतो महापुरुषलक्षणतया उदरकार्श्यस्य स्वतस्सिद्धत्वादण्ड-समृद्धिरपि माहात्म्यावहा भवति, क्षुद्राणां तु न भवतीति भावः ॥ ४९ ॥

*सौन्दर्यामृत रसवाहवेगजस्स्या -*
*दावर्त स्तव किल पद्मनाभ नाभिः ।*
*तत्पद्मं वरद, विभाति कान्तिमय्या*
*लक्ष्म्या स्ते सकलवपुर्जुषो नु सद्म ॥ ५० ॥*

सौन्दर्येति। है पद्मनाभ, पद्मं नाभौ यस्य सः पद्मनाभः। तव नाभिः। सौन्दर्य मेव अमृतरसवाहः । तस्य वेगेन जायत इति तथोक्तः आवर्तः स्यात्। "स्यादावर्तोऽम्भसां भ्रमः" इत्यमरः। तत् पद्मं नाभीपद्मं ते तव सकलवपुर्जुषः सर्वावयवभाजः कान्तिमय्याः कान्तिस्वरूपायाः लक्ष्म्याः

श्रियः सद्म सदनं विभाति । अत्यन्तरस्यत्वा त्सौन्दर्यस्य अमृतत्वेन निरूपणम् । नाभे र्निम्नत्वाच्च लक्ष्म्याः तामरसवसतित्वा च्च नाभिपद्मस्य समग्रविग्रहशोभाभिधलक्ष्मीभवनत्वेन निरूपण् । पद्मनाभेति सम्बुद्धिरपि साभिप्राया ॥ ५० ॥

*या दामोदर इति नामदा तवाऽऽसी -*
*त्सा दामा किल किणकारिणी बभूव ।*
*तन्नूनं वरद, वलित्रयच्छलेन*
*त्वन्मध्यप्रथमविभूषणी बभूव ॥ ५१ ॥*

यादामेति । हे वरद, या दामा "न पुंसि दाम" इत्यमरः । तव दामोदर इति नामदा आसीत् सा दामा किणकारिणी बभूव किल । "दाम्ना चैवोदरे बद्ध्वा प्रत्यबध्ना दुलूखले" इति बन्धसाधनं बभूव । दामा उदरे यस्य सः दामोदर इति नामधेयं या दामा ददाति स्म, सैव विमर्देन किणं जनयामासेत्यर्थः । [1]तत्किणं वलित्रयच्छलेन मध्यप्रथमविभुषणी बभूव । च्विप्रत्ययान्तविभूषण शब्देन एकीभूतं क्रियापदम् । (शुष्को व्रण एव किण उच्यते ।) त्रिगुणीकृतदामविमर्दातिशयजनितं किणत्रयमेव वलित्रयत्वेन भवदीयमध्यप्रदेशं । प्राधान्येन परिष्करोतीत्यर्थः ॥ ५१ ॥

*यादृग्बीजाध्युषितभुवि यद्वस्तु हस्तीश जातं*
*तत्तादृक्षं फलति हि फलं त्वय्यपीक्षामहे तत् ।*
*यस्मा दण्डाध्युषित उदरे तावके जायमानं*
*पद्मं पद्मानन किल फल त्यण्डषण्डा नखण्डान् ॥ ५२ ॥*

यादृगिति । हे पद्मानन, हस्तीश, यादृक् बीजाध्युषितभुवि यज्जातीयबीजेनाध्युषितायां अधिष्ठितायां उप्तायां भुवि यद्वस्तु यत्सस्यं जातं तत्तादृक्षं तज्जातीयं फलं फलति, उत्पादयति हि इति यत् तत्त्वय्यपि

1. स किणः इत्युचितम् ।

ईक्षामहे विलोकयामः । उक्तमेव व्यक्तं प्रदर्शयति । यस्मात्कारणात् अण्डाध्युषिते तावके उदरे जायमानं पद्मं नाभीपद्मं अखण्डान् पूर्णान् अण्डषण्डान् ब्रह्माण्डसङ्घातान् फलति किल उत्पादयति ननु । तत स्त्वय्यपीक्षामहे इति पूर्वेणान्वयः । उदराज्जायमान मिति प्रयोक्तव्ये उदरे इति सप्तमीप्रयोगः जन्माधिकरणत्वमात्रविवक्षया; ''विवक्षातः कारकाणि भवन्ति'' इत्यनुशासनात् ॥ ५२ ॥

*अज्ञे यज्ञेश्वर किल जने क्वा ऽप्यदर्शं विमर्शं*
*विश्वाधीशः कतम इति, तन्निर्णयं वर्णयामः ।*
*व्यावक्रोशी नृषु समुदिता या नुपाश्रित्य तेऽपि*
*ब्रह्माद्या स्ते वरद जनिता स्तुन्दकन्दारविन्दे ॥ ५३ ॥*

अज्ञे इति । हे यज्ञेश्वर ! ''ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान् । सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते'' इत्युक्तप्रकारेण सर्वकर्माराध्य, वरद, अज्ञे क्वाऽपि जने कस्मिंश्चिज्जने विश्वाधीशः सर्वेश्वरः कतम इति विमर्शं विचारं अदर्शं दृष्टवानस्मि । अनभिज्ञोऽहं सर्वेश्वरः को वेति विचारितवानस्मीत्यर्थः । तन्निर्णयं विचारिततत्त्वनिश्चयं वर्णयामः उदाहरामः । निर्णयप्रकार माह - यान् ब्रह्माद्यान् उपाश्रित्य आलम्ब्य नृषु मनुष्येषु व्यवक्रोशी परव्यत्यासेन व्याक्रोशनं समुदिता उत्पन्ना । ''हिरण्यागर्भ स्समवर्तताऽग्रे भूतस्य जातः पतिरेक आसीत्'', ''यदा तम स्तन्न दिवा न रात्रि र्न सन्न चासच्छिव एव केवलः'', ''इन्द्रो मायाभिः पुरुरूप ईयते'' इत्यादिवाक्य मापातप्रतीत्या परामृश्य प्रत्येकं ब्रह्मरुद्रेन्द्राद्यवलम्बेन यः कोलाहलो जात इत्यर्थः ते ब्रह्मरुद्रेन्द्रा अपि ते तव तुन्दकन्दारविन्दे, तुन्दमुदर मेव कन्दः मूलं यस्य तस्मि न्नरविन्दे जनिता उत्पन्नाः परत्वसंशायास्पदब्रह्मण स्त्वन्नाभिपद्मोद्भवत्वात् ''ब्रह्मणः पुत्राय ज्येष्ठाय विरूपाक्षाय'' इति छन्दोगोक्त प्रयोगेण ब्रह्मपुत्रत्वा द्रुद्रस्य, देवेन्द्रस्य ब्रह्मपुत्रकाश्यपप्रजापतिपुत्रत्वाच्च नारायण एव परतत्त्व मित्यज्ञानामस्माकमपि निर्णयो जात इत्यर्थः ॥ ५३ ॥

*मुष्णन् कृष्ण, प्रियनिजजनै र्जय्य, हैयङ्गवीनं*
*दाम्ना भूम्ना वरद, हि यया त्वं यशोदाकराभ्याम् ।*
*बद्धो बन्धक्षपणकरणीं तां किलाऽद्यापि मातुः*
*प्रेम्णा गात्राभरण मुदराबन्धनाख्यं बिभर्षि ॥ ५४ ॥*

मुष्णन्निति । हे वरद, प्रियनिजजनैः स्वकीयभक्तजनैः जय्य, जेतुं शक्य, भक्तपरतन्त्रेत्यर्थः । कृष्णः त्वं हैयङ्गवीनं, "तत्तु हैयङ्गवीनं यद्ध्यो गोदोहोद्भवं घृतम्" इत्यमरः । नवनीतविशेषं मुष्णन् अपहरन् यशोदाकराभ्यां, यया दाम्ना करणेन, भूम्ना अतिशयेन बद्धः, "दाम्ना चैवोदरे बद्ध्वा प्रत्यबध्ना दुलूखले" इति बद्धोऽभूः । बन्धक्षपणकरणीं ध्यायतां संसारसम्बन्धविनाशहेतुभूतां तां दामान मद्याऽपि वरदराजदशाया मपि मातुः प्रेम्णा हेतुना उदराबन्धनाख्यं उदराबन्धननामकं गात्राभरणं विभर्षि । नवनीतचौर्ये यशोदाया स्त्वद्बन्धनसाधनं दामैव प्रीतिहेतुरिति इदानीमप्युदराबन्धनत्वेन बिभर्षीत्यर्थः ॥ ५४ ॥

*सौन्दर्याख्या सरि दुरसि विस्तीर्य मध्यावरुद्धा*
*स्थानाल्पत्वा द्विषमगतिजावर्तगर्ताभनाभिः ।*
*प्राप्य प्राप्तप्रथिमजघनं विस्तृता हस्तिनाथ,*
*स्रोतोभेदं भजति भवतः पाददेशापदेशात् ॥ ५५ ॥*

सौन्दर्येति । हे हस्तिनाथ, उरसि विस्तीर्य वक्षसि विस्तृता भूत्वा मध्येनाऽवरुद्धा निरुद्धा स्थानाल्पत्वाद्धेतोः विषमगतिजः यः आवर्तः गर्तः आवर्तरूपं पल्वलं, तस्य आभेव आभा यस्य स तथोक्तः नाभिर्यस्याः सा विषमगतिजावर्तगर्ताभनाभिः नदीनां स्थानाल्पत्वप्रयुक्ता प्रवाहाभिमुख विषमगति र्यदा जायते तदानी मावर्तो भवति । सौन्दर्यसरितो मध्यनिरोधात् नाभीरूपावर्तो जात इति पर्यवसितोऽर्थः । प्राप्तः प्रथिमा पृथुत्वं येन तज्जघनं प्राप्य विस्तृता सौन्दर्यख्या सरित् भवतः पाददेशापदेशात् पादप्रदेशव्याजात् स्रोतोभेदं भजति भिन्नस्रोता भवतीत्यर्थः ॥ ५५ ॥

*रम्भास्तम्भाः करिवरकराः कारभा स्सारभाजो*
*वेषाश्लेषा अपि मरतकस्तम्भमुख्या स्तुलाख्याः ।*
*साम्यं सम्यग्वरद, न दधु स्सर्व मुर्वो स्तदूर्वो -*
*र्न ह्यैश्वर्यं दधति न तथा यौवनारम्भजृम्भात् ॥ ५६ ॥*

रम्भेति। हे वरद, सारभाजः प्राशस्त्ययुक्ताः तुला उपमेति आख्या येषां ते तथोक्ताः, उपमानतया प्रसिद्धा इति यावत् । रम्भास्तम्भाः कदलीकाण्डाः करिवरकराः हस्तिश्रेष्ठशुण्डाः, कारभाः करभसम्बन्धिनः वेषाश्लेषाः आकारपरिणामाः मरतकस्तम्भमुख्याः मरतकरत्नमयस्तम्भ-प्रभृतयश्च उर्वोः पीनयोः त्वदूर्वोः सम्यक् समीचीनं सर्वं साम्यं न दधु रित्यन्वयः। तुलाख्या इत्यस्य तुलां ख्यान्ति कथयन्तीति वाऽर्थः। ख्या प्रकथने इति धातुः[1] ॥ ५६ ॥

*या ते गात्रे वरद जनिता कान्तिमय्यापगाऽभू -*
*त्तस्या स्स्रोतोयुगल मिह यद्याति पादप्रवादम् ।*
*तज्जातोर्ध्व भ्रमियुग मिवोद्धानुनी जानुनी ते*
*स्या दुक्ष्णो र्वा ककुदयुगलं यौवनैश्वर्यनाम्नोः ॥ ५७ ॥*

या ते इति। हे वरद, ते गात्रे कान्तिमयी या आपगा नदी अभूत्। इह गात्रे पादप्रवादं चरणद्वयव्यपदेशविशिष्टं, तस्याः यत्स्रोतोयुगलं याति प्रवहति उद्धानुनी उद्गच्छच्छविनी ते जानुनी तज्जातोर्ध्व भ्रमियुग मिव पादप्रवाद स्रोतोयुगलजात मूर्ध्वाकारं भ्रमियुगमिव भातः । ऊर्ध्वभ्रमिः बुद्बुदविशेषः। यौवनैश्वर्यनाम्नोः यौवनसौन्दर्याभिधयोः उक्ष्णोः वृषभयोः ककुदयुगलं वा स्यात्, "वृषाङ्गे ककुदोऽस्त्रियाम्" इत्यमरः ॥ ५७ ॥

**प्रेम्णा ऽऽघ्रातुं करिगिरिशिरोऽधोमुखीभाव भाजो -**
**रङ्घ्रिद्वन्द्वाह्वयकमलयो र्दण्डकाण्डायमाने।**

---

1. अत्र ग्रन्थपात इव भाति।

**अद्रिस्पर्शोद्भवसुखत उत्कण्टके रोमहर्षा -**
**द्द्रष्टु र्दृष्टि र्वरद, किमलं लङ्घितुं जङ्घिके ते ॥ ५८ ॥**

प्रेम्णेति । हे वरद, द्रष्टु र्दृष्टिः अनुभवितुः पुरुषस्य चक्षुः प्रेम्णा भोग्यतातिशय प्रयुक्तप्रीत्या करिगिरिशिरः आघ्रातुं अधोमुखीभावं अधोमुखत्वं भजत इति तथोक्तयोः अङ्घ्रिद्वन्द्वाह्वयकमलयोः पादद्वन्द्वाभिधारविन्दयोः दण्डकाण्डायमाने नालकाण्डव दाचरन्त्यौ अद्रिस्पर्शोद्भवसुखतः हेतोः, जाता दिति शेषः । रोमहर्षात् रोमाञ्चात् उत्कण्टके उत्कटकण्टके, कमलनालस्याऽपि सकण्टकत्वा दिति भावः । जङ्घिके जङ्घे लङ्घितुं अतिक्रम्य गन्तुं अलं किम्, समर्था किम्, न समर्थेत्यर्थः । जङ्घासौन्दर्यमेव यावत्काल मनुभवायाऽल मिति भावः ॥ ५८ ॥

***भक्तानां यद्वपुषि दहरं पण्डितं पुण्डरीकं***
***यच्चाम्लानं वरद, सतताध्यासनादासनाब्जम् ।***
***आम्नायानां यदपि च शिरो यश्च मूर्धा शठारे -***
***र्हस्त्यद्रेर्वा किमतिसुखदं तेषु पादाब्जयो स्ते ॥ ५९ ॥***

भक्ताना मिति । हे वरद, भक्तानां वपुषि पण्डितं ज्ञानविकासवत् दहरं दहराख्यं, "दह्रं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्य संस्थम्, तत्राऽपि दह्रं गगनं विशोक स्तस्मि न्यदन्त स्तदुपासितव्यम्" इति श्रुत्या "सकलकल्याणगुणाकरदहराकाशाख्य परमपुरुष नित्यनिवासस्थानतया श्रुतम्, पुरशब्दवाच्ययोगिशरीरनिष्ठं विपाप्मशब्दाक्षिप्त ज्ञानविकासवत् यत्पुण्डरीक" मित्यर्थः । सतताध्यासना दपि अम्लानं म्लानिप्रसङ्गरहितं सत् आसनाब्जञ्च परमपदे भवत्पादपीठतया भगवच्छास्त्रादि प्रतिपादितं, विमलाद्यष्टशक्त्यधिष्ठितदलाष्टकं सकर्णिकं विकासोन्मुख मासनपद्मञ्च, यदपि चाऽऽम्नायानां शिरः वेदान्तः, "सर्वे वेदा यत्पद मामनन्ति" । अपि चेत्येकं समुच्चयवाचकम् । यश्च शठारे मूर्धा शठकोपमुनेः पादुकात्मना नित्यं भगवत्पादवहना दिति भावः । यः हस्त्यद्रेः मूर्धा शिखर

ञ्च, तेषु उक्तेषु तेषु पञ्चसु ते तव पादाब्जयोः किं वाऽति सुखदम् ? हस्तिगिरिशिखरमेवाऽतिसुखदमिति भावः, अत्रैव यथा मनोरथं सकलसमाश्रयणसौकर्य सकलफलप्रदत्वसम्भवात् ॥ ५९ ॥

*पद्या स्वद्याऽङ्गुलिषु वरद, प्रान्ततः कान्तिसिन्धोः*
*वीचीवीथीविभव मुभयी ष्वम्भसो लम्भितासु ।*
*विन्दन्निन्दुः प्रतिफलनजां सम्पदं किं पदं ते*
*छायाच्छद्मा नखविततितां लम्भित श्शुम्भित स्सन् ॥ ६० ॥*

पद्यास्विति । हे वरद, अद्य कान्तिसिन्धोः कान्ति समुद्रस्य अम्भसः प्रान्ततः पर्यन्तप्रदेशे वीचीवीथीविभवं तरङ्गपङ्क्तिसम्पदं लम्भितासु प्रापितासु, कर्तरि क्तः । पद्यासु पदसम्बन्धिनीषु, "शरीरावयवाद्यत्" इति यत्प्रत्ययः । उभयीषु उभयविधासु अङ्गुलिषु प्रतिफलनजां सम्पदं समृद्धिं विन्दन् भजन्, अत एव छायाच्छद्मा प्रति च्छायाव्याजः इन्दुः नखविततितां अङ्घ्रिनखपङ्क्तितां लम्भितः प्रापित स्सन् ते तव पदं शुम्भितः शोभितवान् किम् ? शुभशुम्भ शोभार्थे इति धातुः । दिव्यविग्रहलावण्यार्ण-वोर्मिपङ्क्ति सुन्दरपदाङ्गुलिषु बहुप्रतिफलनव्याजेन नखपङ्क्तित्वं प्राप्तः चन्द्रः किं पादारविन्दयुगं शोभय तीत्यर्थः । शुम्भित इत्यन्तर्भावितणिच्प्रत्ययान्तः । यद्वा, पदं नखविततितां लम्भितः पदयोः: नखविततितां प्राप्त इत्यर्थः । शुम्भितः शुशुभे इत्यर्थः । अथवा, प्राप्येत्यध्याहार्यम् । पदं प्राप्य शुम्भित इत्यन्वयः ॥ ६० ॥

उक्तमेवाऽर्थं विवृणोति -

*शम्भो रम्भोरुहमुख सखा सन् सहाङ्कश्शशाङ्कः*
*कुर्वन् सेवां वरद विकलो वृत्तहीन स्सुवक्रः ।*
*त्वत्पादाब्जे प्रियमख, नखच्छद्मनाऽऽश्रित्य नित्यं*
*सद्वृत्तोऽभूत्स च दशगुणः पुष्कलो निष्कलङ्कः ॥ ६१ ॥*

शम्भो रिति। हे अम्भोरुहमुख पद्मसदृशानन, प्रियमख, प्रियः इष्टो मखो यज्ञो यस्य सः तथोक्त, वरद, शशाङ्कश्चन्द्रः शम्भो स्सखा सन् सोमदिक्सामीप्या दीशानदिश इति भावः । सेवां कुर्वंश्च सन् शिरोभूषणत्वेनेति भावः । सहाङ्कः कलङ्कसहितः अन्यत्र पापसहितः विकलः विगतकलः क्षयिष्णुः अन्यत्र विद्याहीनः, अत एव वृत्तहीनः वर्तुलतारहितः, अन्यत्र चाऽऽचाररहितः, अत एव सुवक्रः वक्राकारः अन्यत्र कुटिलचित्तश्च, अभूदिति शेषः। स चन्द्रः नखच्छद्मना नखव्याजेन त्वत्पादाब्जे आश्रित्य तु निष्कलङ्कः, नित्यं पुष्कलः पूर्णः सद्वृत्तः दशगुणश्चाभूत्। नूनं देवतान्तरसेवाऽपकर्षकरी, भवत्सेवा उत्कर्षकरीति भावः ॥ ६१ ॥

*त्वत्पादाब्जे प्रजाता सुरसरि दभव त्प्राक्चतुर्धा तत स्ता-*
*स्वेकां धत्ते ध्रुव स्सा त्रिभुवन मपुना त्रीन् पथो भावयन्ती।*
*तत्रैका खं व्रजन्ती शिवयति तु शिवं सा पुन स्सप्तधाऽभू -*
*त्तास्वेका गां पुनाना वरद, सगरज स्वर्गसर्गं चकार॥ ६२॥*

त्वदिति। हे वरद, प्राक् त्रिविक्रमावतारकाले त्वत्पादाब्जे प्रजाता उत्पन्ना सुरसरित् गङ्गा चतुर्धा चतुष्प्रकारेणाऽभवत्। ततः तदनन्तरं तासु चतसृषु एकां ध्रुवः धत्ते, सा ध्रुवधृता त्रीन् पथः मार्गान् भावयन्ती प्रापयन्ती सती त्रिभुवनं स्वर्गान्तरिक्षपातालरूपं त्रिभुवनं अपुनात् पुनाति स्म। तत्र त्रिपथगा अन्तरिक्षं व्रजन्ती गच्छन्ती एका शिवं शिवयति मङ्गलं करोति। सा शिवधृता गङ्गा पुन स्सप्तधाऽभूत्, सप्तप्रकाराऽऽसीत्, तासु सप्तसु गां भूमिं पुनाना पवित्रयन्ती एका सगरजानां सगरात्मजानां स्वर्गस्य सर्गं सृष्टिं चकार, स्वर्गं ददा वित्यर्थः। "वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता। विष्णो र्बिभर्ति यां भक्त्या शिरसाऽहर्निशं ध्रुवः" इत्यारभ्य, "मेरुपृष्ठे पतित्वोच्चैर्निष्क्रान्ता शशिमण्डलात्। त्रिजगत्पावनार्थाय सा प्रयाति चतुर्दिशम्। सीता चालकनन्दा च क्षुर्भद्रा च वै क्रमात्। सैव याति

चतुर्भेदात् दिग्भेदकृतलक्षणा। भेद श्चालकनन्दाख्यं यस्याः शर्वोऽपि दक्षिणम्। दधार शिरसा प्रीत्या वर्षाणा मधिकं शतम्'' इति श्रीविष्णुपुराणवचनानि, ''विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति। तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे। ह्लादिनी पद्मिनी चैव नलिनी च तथैव तु। तिस्रः प्राचीं दिशं जग्मुः गङ्गाश्शिवजला श्शुभाः। सु चक्षुश्चैव सीता च सिन्धु श्चैव महानदी। तिस्र स्त्वेता दिशं जग्मुः प्रतीचीश्च शिवोदकाः। सप्तमी चाऽन्वगात्तासां भगीरथ मथो नृपम्'' इत्यादिश्रीरामायणवचनानि चाऽनुसन्धेयानि। पूर्वं त्रिविक्रिमेण भगवता सत्यलोकपर्यन्तं एकस्मिन्पादारविन्देऽभ्युच्छ्रिते सति चतुर्मुखेन स्वकमण्डलुजले धर्मतत्त्व मावाह्य पादारविन्दप्रक्षालने कृते तदुदकं, गङ्गा विष्णुपदी सुरसरिदित्यादिसामान्यनामधेये सत्यपि सीता, अलकनन्दा, चक्षुर्भद्रा इत्याद्यवान्तरसंज्ञाभेदं प्राप्य मेरोः प्राच्यादिषु दिक्षु प्रवहति स्म। दक्षिणदिक्प्रसृता अलकनन्दा ध्रुवमण्डल माप्लावयन्ती सती त्रिधा भूत्वा स्वर्गान्तरिक्षपातालेषु गता। अन्तरिक्षगता तु भगीरथप्रार्थनया शिवशिरसो बिन्दुसरसि पततिस्म इत्यादिकमत्र संक्षिप्तम्॥ ६२॥

इत्थं मन्त्ररत्नपूर्वखण्डस्थनारायणशब्दार्थत्वेन विग्रहवैशिष्ट्यं विस्तरेण प्रतिपाद्य विभवावतारान् प्रस्तोतुकामः प्रतिपादितानां प्रतिपादयिष्यमाणानाञ्च सर्वेषा माश्रितार्थता माह -

*परिजनपरिबर्हा भूषणान्यायुधानि*
*प्रवरगुणगणाश्च ज्ञानशक्त्यादय स्ते।*
*परमपद मथाण्डा न्यात्मदेह स्तथाऽऽत्मा*
*वरद, सकल मेत त्संश्रितार्थं चकर्थ॥ ६३॥*

परिजनेति। हे वरद, ते परिजनाः शेषशेषाशनादयः, परिबर्हाः परिच्छदाः छत्रचामरादयः, परिजनाश्च परिबर्हाश्चेति द्वन्द्वः। भूषणानि किरीटकुण्डलादीनि, आयुधानि सुदर्शन पाञ्चजन्यादीनि, ज्ञानशक्त्यादयः

प्रवरगुणगणाश्च परमपदं श्रीवैकुण्ठलोकः अथ अण्डानि चतुर्दश भुवनावरणसप्तकादिविशिष्टानि ब्रह्माण्डानि आत्मदेहः स्वासाधारण विग्रहः तथा आत्मा- "सत्यं ज्ञान मनन्तं ब्रह्म"' "आनन्दो ब्रह्म" "अन्तःप्रविष्ट श्शास्ता जनानां सर्वात्मा", "एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः" इत्याद्युक्तलक्षणस्वरूपः स्वयञ्च एतत्सकलं, "नपुंसक मनपुंसकेनैकवच्चास्यान्यतरस्याम्" इत्येक-वद्भावात् एकवचनम् । संश्रितार्थं स्वचरणनलिनसमाश्रितजनशेषभूतं चकर्थ कृतवा नसि । समाश्रयणदशा मारभ्याऽनुभवदशापर्यन्तं भक्तजनोपयुक्तं चकर्थे त्यर्थः ॥ ६३ ॥

इत्थं सामान्यतो भगवतः परिजनादिपरिग्रहस्य समाश्रितजनोपयुक्तता मुक्त्वा विभवावतारे वैशिष्ट्य मष्टभिः श्लोकैरभिष्टैति -

*अनाप्तं ह्याप्तव्यं न तव किल किञ्चिद्वरद ते*
*जगज्जन्मस्थेमप्रलयविधयो धीविलसितम् ।*
*तथाऽपि क्षोदीय स्सुरनरकुले ष्वाश्रितजनान्*
*समाश्लेष्टुं पेष्टुं तदसुखकृतां चाऽवतरसि ॥ ६४ ॥*

अनाप्त मिति । हे वरद, हि यस्मात्कारणात्, हि यद्यपीति वाऽर्थः । तव अनाप्तं पूर्व मलब्धं, आप्तव्य मितःपरं लब्धव्यम् किञ्चित् किमपि श्रेयो न किल । जगत्सृष्टिसंहारकर्तृत्वावाप्त्यर्थं अवतारो भवतीत्यत्राऽऽह-जगदिति । जगज्जन्मस्थेमप्रलयविधयः जगतां सृष्टिस्थितिसंहाररचनाः धीविलसितं 'बहु स्याम्' इति सङ्कल्पविलासः, सर्गादिरचना स्सङ्कल्पमात्रकल्प्या इत्यर्थः । तथापि जगज्जन्मादीना मपि सङ्कल्पकल्प्यत्वेन अवाप्तसमस्तकामत्वे सत्यपि आश्रितजनान् समाश्लेष्टुं समालिङ्गितुं स्वदर्शनस्पर्शनसपर्याद्यलाभे शरीरधारणाक्षमाणां साक्षात्कारादिदानायेत्यर्थः । तदसुखकृतां आश्रितजनदुःखकारिणां पेष्टुं हिंसितु ञ्च, "जासि निप्रहणनाटक्राथपिषां हिंसायाम्" इति कर्मणि षष्ठी ।

साधुपरित्राणदुष्कृद्विनाशने एवावतारप्रयोजन मित्यर्थः । यद्यपि "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय ....." इत्यादि श्लोके धर्मसंस्थापन मपि प्रयोजनतयाऽनुसंहितम्, तथाऽपि धर्म संस्थापनं साधुपरित्राणान्तर्भूत मित्यभिप्रायः । क्षोदीयसा मतिक्षुद्राणां सुरनराणां कुलेषु अवतरसि। विभवावतारो भक्ताना मत्यन्त मुपयुक्त इति भावः ॥ ६४ ॥

'क्षोदीय स्सुरनरकुलेष्ववतरसी' त्युक्तं सौशील्यमेवाऽनुसन्धत्ते -

*विवेकधिय मेकतो ह्यभिनिवेशलेशो हरे -*
*न्महत्त्वभिनिवेशनं किमुत तन्महिम्नस्तव ।*
*अहो विसदृशे जगत्यवततर्थ पार्थादिकं*
*निजं जन मुदञ्चयन् वरद, तं समाश्लेषकः ॥ ६५ ॥*

विवेकधिय मिति । हे वरद ! एकतः एकस्मिन् वस्तुनि । सार्वविभक्तिक स्तसिः । अभिनिवेशलेशः इद मवश्यं मया लब्धं भूयादित्यभिलाषप्रयुक्तप्रवृत्त्येकदेशोऽभिनिवेशलेशः, प्रेमान्ध्यं वा विवेकधियं विवेकरूपज्ञानं, इद मनुष्ठेय मिदननुष्ठेय मिति विविच्य परिज्ञानं हरेत् । यस्मिन् कस्मिंश्चिदपि वस्तुनि रागपरिग्रहप्रयुक्त आग्रहो विवेक मपहरे दित्यर्थः । मह दभिनिवेशनम् अभिनिवेश स्तु किमुत, विवेकधियमपहरे दिति किमु वक्तव्यम्, अपहरे देवेत्यर्थः । तत् तस्मात्कारणात् तव महिम्नः माहात्म्यस्य विसदृशे अननुरूपे जगति - "तद्विष्णोः परमं पदम् सदा पश्यन्ति सूरयः - दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांस स्समिन्धते विष्णो र्यत्परमं पदम्", "तेह नाकं महिमान स्सचन्ते यत्र पूर्वे साध्या स्सन्ति देवाः", "वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णु रचिन्त्यात्मा भक्तै र्भागवतै स्सह" इत्याद्युक्त नित्यमुक्त नित्यसेवनीयश्रीवैकुण्ठापेक्षया सर्वात्मना निकृष्टेऽस्मिन्विषये इत्यर्थः । पार्थादिकं अर्जुनप्रभृतिं आदिशब्देन

अक्रूरमालाकार विदुरादयो गृह्यन्ते । जनं निज मुदञ्चयन् स्वकीयतया सम्भावयन् "अहं वो बान्धवो जातः" इत्युक्तप्रकारेणेति भावः । तं जनं समाश्लेषकः सम्यगाश्लिष्टं कुर्वन् नित्यपरिजनं कुर्वन् सन्नित्यर्थः । अवततर्थ- अवपूर्वात्तरतेः लिण्मध्यमैकवचनम् । अवतारं चकर्थे त्यर्थः । महतो मन्दैस्सह नीरन्ध्रेण संश्लेषः सौशील्य मित्युक्तसौशील्यहेतुकोऽवतार इति पर्यवसितम् । अहो ! ईदृशसौशील्य मत्याश्चर्यकर मिति भावः ॥ ६५ ॥

उक्तं सौशील्य मनाश्रितेष्वपि तुल्य मित्याह -

**संश्लेषे भजतां त्वरा परवशः कालेन संशोध्य ता -**
**नानीय स्वपदे स्वसङ्गमकृतं सोढुं विलम्बं बत ।**
**अक्षाम्यन् क्षमिणां वरो वरद सन्नत्राऽवतीर्णो भवेः**
**किं नाम त्वमसंश्रितेषु वितरन् वेषं वृणीषे तु तान् ।। ६६ ।।**

संश्लेषे इति । हे वरद, क्षमिणां क्षमावतां वरः श्रेष्ठः असह्यापराधसह इत्यर्थः । भजतां भक्तिमतां संश्लेषविषये त्वरापरवशः त्वरापरतन्त्रः अतित्वरावान् त्वं तान् भक्तान् कालेन क्रमेण संशोध्य - "एष एव साधुकर्म कारयति तं, य मेभ्यो लोकेभ्य उन्निनीषति", "तेषा मेवाऽनुकम्पार्थ मह मज्ञानजं तमः । नाशया म्यात्मभावस्थो ज्ञानदीपेन भास्वता" इत्युक्तप्रकारेण कर्मज्ञानाभ्यां परिशुद्धान् कृत्वा, संशोध्येत्यनेन "जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः, नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" इत्युक्त भक्त्युत्पादन मप्यर्थसिद्धम् । अतो भजता मित्यत्र भक्तिः प्रीतिमात्रपरेति मन्तव्यम् । स्वपदे आनीय "वैकुण्ठे तु परे लोके" इत्युक्ते स्वासाधारणे स्थाने आतिवाहिकमुखेन आनीय स्व सङ्गमकृतं भक्तानां स्वकीयसंश्लेषविषये विहितं कालेन संशोध्य, स्वपादानयनरूपं विलम्बं कालक्षेपं अक्षाम्यन् असहमानस्सन्, अत्र लीलाविभूत्यां अवतीर्णो भवेः, कृतावतारो भूयाः । स्वय मेवाऽवतरणं भक्तजनसंश्लेषत्वरापरवशस्य तवोचित मिति भावः । असंश्रितेषु अभक्तेषु विषये वेष माकारं दिव्यविग्रहं

वितरन् अनुभवयोग्यं कुर्वन् सन्नित्यर्थः। तां स्तुतानपि वृणीषे स्वीकरोषि, इदं किं नाम ? निरङ्कुशस्वभावस्वातन्त्र्यवतो भवतः अनाश्रित-शिशुपालादि विषयसौशील्य मपरिदृश्यमानातिशय मित्याशयः ॥ ६६ ॥

अवताराकरणे श्रुतिप्रतिपादितोपासनादि सम्भावनाऽपि न सम्भव तीत्याह -

*वरद, यदि न भुव्यवातरिष्य-*
*श्श्रुतिविहिता स्त्वदुपासनार्चनाद्याः ।*
*करणपथविदूरगे सति त्व -*
*य्यविषयतानिकृताः किलाऽभविष्यन् ॥ ६७ ॥*

वरदेति। हे वरद, भुवि नाऽवातरिष्यो यदि अवतारं नाऽकरिष्यश्चेत्, त्वयि परव्यूहाकारे भवति, करणपथस्य इन्द्रियमार्गस्य विदूरगे अत्यन्तदूरभाजि सति अप्रत्यक्षे सतीत्यर्थः । श्रुतिविहिताः त्वदुपासनार्चनाद्याः, आद्यशब्देन प्रदक्षिणनमस्कारादयो गृह्यन्ते । अविषयतानिकृता अभविष्यन् । "निकृत स्त्वनृजुश्शठः" इत्यमरः । निर्विषयकतया अयथार्थाः स्यु रित्यर्थः ॥ ६७ ॥

स्वविषयकापराधसहोऽपि स्वाश्रितविषयकापराध मसहमान एवाऽवतरसीत्याह -

*यदपराधसहस्रमजस्रज*
*त्वयि शरण्य हिरण्य उपावहत् ।*
*वरद तेन चिरं त्व मविक्रियो*
*विकृति मर्भकनिर्भजना दगाः ॥ ६८ ॥*

यदिति । हे शरण्य, वरद, हिरण्यः त्वयि विषये अजस्रजं सार्व कालिकं यदपराधसहस्रं उपावहत् अकरोत् तेन अपराधसहस्रेण चिरं अविक्रियः निर्विकारः मनः कालुष्यरहितः त्वम् अर्भकनिर्भजनात्

शैशवावस्थप्रह्लादनिराकरणात् विकृतिं मनोविकारमगाः अभजः । तादृशवैभव माश्रितवात्सल्यं भवत इति भावः ॥ ६८ ॥

इदानीं दाशरथे र्निर्हेतुककृपा मनुसन्धत्ते -

*त्वा मामनन्ति कवयः करुणामृताब्धे*
*ज्ञानक्रिया भजनलभ्य मलभ्य मन्यैः ।*
*एतेषु केन वरदोत्तरकोसलस्थाः*
*पूर्वं सदूर्व मभजन्त हि जन्तवस्त्वाम् ॥ ६९ ॥*

त्वामिति । हे करुणामृताब्धे कारुण्यदुग्धाब्दे, वरद, कवयः अप्रत्यक्षतत्त्वार्थ साक्षात्कारक्षमाः पराशरपाराशर्यादयः प्रबन्धारः त्वां ज्ञानक्रियाभजनलभ्यं ज्ञानयोगकर्मयोगभक्तियोगैः प्राप्यं "कर्मणैव हि संसिद्धि मास्थिता जनकादयः"। "वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते पन्था नाऽन्य स्तत्तोषकारकः" । "भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्ति मृच्छति" । "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मा मुपयान्ति ते" इति कर्मयोग ज्ञानयोगयो रपि स्वतन्त्रोपायत्व मस्त्येव । अतः परस्पर मङ्गाङ्गिभावः त्रयाणा मपि साधारण इति भावः । अन्यै रुपायान्तरैः अलभ्य मप्राप्यञ्च आमनन्ति । पूर्वं मुत्तरकोसलस्थाः जन्तवः जीवात्मानः एतेषु ज्ञानक्रियाभजनेषु मध्ये केन वा उपायेन सदूर्वं दूर्वया सहितं यथा तथा त्वां अभजन्त प्रापुः । तृणादीना मप्यन्तस्संज्ञत्वा ज्जन्तुशब्दवाच्यत्व मस्तीति मन्तव्यम् । अननुष्ठितज्ञानयोगादीना मपि भवत्प्राप्ति र्निर्हेतुक-कृपाहेतुका, प्रपदनमुखभेदस्य स्वविषयवासस्य सदृशसाधनत्वाभावादिति भावः ॥ ६९ ॥

सम्प्रतिपन्नं कृष्णावतारसौलभ्यमनुसन्धत्ते -

*भजत्सु वात्सल्य वशा त्समुत्सुकः*
*प्रकाम मत्रावतरे र्वरप्रद ।*

*भवेश्च तेषां सुलभोऽथ किन्विदं*
*यदङ्ग, दाम्ना नियतः पुराऽरुदः ॥ ७० ॥*

भजत्स्विति । अङ्ग, वरप्रद, त्वं भजत्सु सेवमानेषु विषये वात्सल्यवशात् दोषे भोग्यताहेतुस्नेहविशेषबलात्प्रकामं समुत्सुक स्सन् सोत्कण्ठ स्सन् संश्लेषेच्छु स्सन् इत्यर्थः । अत्र जगति अवतरेः अवतारं कुर्याः । तेषां भजतां सुलभो भवेश्च,वात्सल्यकार्यत्वा त्सौलभ्यस्येति भावः । अथ शब्दः प्रश्नार्थकः । "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इत्यमरः । पृच्छामीत्यर्थः: । पुरा दाम्ना रज्ज्वा नियतः बद्धस्सन् अरुदः रोदन मकरोः इति यत्, इदं किन्नु रोदनं किं सौलभ्य मिति प्रश्नाभिप्रायः । परिहारस्तु सौलभ्यफल भूतत्वा द्दाम्ना बन्धनस्य तन्निबन्धनरोदन मपि तत्काष्ठैवेति भावः ॥ ७० ॥

"नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितम्" इत्युक्तप्रकारेण सर्वावतार श्रेष्ठेऽवतारत्रयेऽपि वात्सल्य कृपासौलभ्यातिशयं क्रमशः प्रतिपाद्य, पुन स्सिंहावलोकनन्यायेन नृसिंहावतारे परत्वाविष्कारोऽप्याश्चर्यावह इत्याह-

*नरसिंहतनु रगौणी*
*समसमयसमुद्भवश्च भक्तगिरः ।*
*स्तम्भे च सम्भव स्ते*
*पिशुनयति परेशतां वरद ॥ ७१ ॥*

नरसिंहेति । हे वरद, ते अगौणी अप्राकृता नरसिंहतनुः प्रकृतेस्सत्त्व रजस्तमोमयत्वात्, "न तस्य प्राकृता मूर्ति" रित्युक्तप्रकारेण शुद्धसत्त्वमयी नृसिंहमूर्तिः भक्तगिरः प्रह्लादवचसः समसमयसमुद्भवश्च तुल्यकालप्रादुर्भावश्च स्तम्भे सम्भवश्च "वेत्थ यथा पञ्चम्या माहुतावापः पुरुषवचसो भवन्तिः" इति निषेकपूर्वकोदरवासं विनैव स्तम्भरूपेऽधिकरणे सम्भवोऽपि परेशतां पिशुनयति । "तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम्", "पतिं विश्वस्यात्मेश्वरम्" इत्याद्युक्तं सर्वेश्वरत्वं

प्रकाशयतीत्यर्थः । कर्मवश्याना मप्राकृतविग्रहपरिग्रह भक्तप्रतिज्ञा-समकालप्रादुर्भाव स्तम्भसम्भवाना मसम्भवा दिति भावः ॥ ७१ ॥

इत्थं श्रियःपतिं समस्तकल्याणगुणविशिष्टं आश्रयणसौकर्यावहदिव्य विग्रहविशिष्टं पत्नीपरिजनादिविशिष्टं स्वकीयकृपयैव साधुपरित्राणाय कृतावतारं वरदराजं श्रीमन्नारायण शब्दार्थभूतं विस्तरेण प्रतिपाद्य तदीयचरणौ शरणं प्रपित्सुः 'अनुजो रावणस्याऽहं तेन चाऽस्म्यवमानितः । त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः'' इत्युक्तरीत्या प्रपत्तुः स्वस्य दोषभूयस्त्व माविष्करोति अष्टाभिः श्लोकैः --

*तापत्रयीमयदवानलदह्यमानं*
*मुह्यन्त मन्त मवयन्त मनन्त नैव ।*
*स्थातुं प्रयातु मुपयातु मनीश मीश*
*हस्तीश, दृष्ट्यमृतवृष्टिभि राभजेथाः ॥ ७२ ॥*

तापत्रयीत्यादि । हे ईश ! स्वामिन्, अनन्त अपरिच्छिन्न-स्वरूपरूपगुणादिक, हस्तीश, तापानां आध्यात्मिकाधिदैविकाधि-भौतिकाख्यानां त्रयी तापत्रयी, तन्मयेन दवानलेन वनवह्निना दह्यमानं, तापत्रयात्मना परिणतवन्यवह्निना तप्यमान मित्यर्थः । अत एव मुह्यन्तं मोहं भजन्तं, अन्तं अवधिं नैवावयन्तं अजानन्त मेव स्थित मित्यर्थः । स्थातुं प्रयातुं उपयातु मपि अनीशम् अवस्थान प्रवृत्तिनिवृत्त्यसमर्थ मित्यर्थः । एवम्भूतं मां दृष्टयः कटाक्षा एव अमृतवृष्टयः अमृतवर्षाणि ताभिः आभजेथाः आ समन्तात् सेवेथाः, आसिञ्चे रित्यर्थः । तत्र हस्तीशस्य कालमेघसाम्यं गर्भितम् । ''एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः । जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते'' इत्युक्त्या निर्हेतुककृपया कटाक्षयेति हार्दो भावः ॥ ७२ ॥

''स्थातुं प्रयातु मुपयातु मनीश'' मित्युक्तं विवृणोति -

*नानाविरुद्धविधिशासु दिशासु चाऽहो*
*वन्ध्यै र्मनोरथशतै र्युगप द्विकृष्टः ।*
*त्वत्पादयो रनुदितस्पृह एष सोऽहं*
*न स्वस्ति हस्तिगिरिनाथ निशामयामि ॥ ७३ ॥*

नानाविरुद्धेति । हे हस्तिगिरिनाथ, वन्ध्यैः अफलैः मनोरथशतैः, शतै रित्युपलक्षणम्, निरवधिमनोरथै रित्यर्थः । नाना नानाविधाः विरुद्धाः परस्पर विरोधवत्यः विदिशः विपरीतदिशः तासु दिशासु च युगपत् एकदैव विकृष्टः विशेषेण इत स्तत आकृष्टः, अत्र दिशाशब्देन मार्गा उपलक्ष्यन्ते । शास्त्रविरुद्धमार्गेषु, शास्त्रविहितमार्गेषु चाऽऽकृष्ट इत्यर्थः । प्रातिकूल्यपूर्तिरुक्ता । आनुकूल्यलेशोऽपि नास्तीत्याह - त्वत्पादयो रनुदितस्पृह एष इति । अद्वेषाभिमुख्ये अपि न स्त इत्यर्थः । एवम्भूतोऽहं स्वस्ति न निशामयामि श्रेयो न पश्यामि । भवदीय दृष्ट्यमृतवृष्टिरेव श्रेयस्करीति भावः ॥ ७३ ॥

त्वदीयपादारविन्दयो रनुदितस्पृहस्य मम "हस्तीश, दृष्ट्यमृत वृष्टिभि राभजेथाः" इत्युक्तिरप्यपराध एवेत्याह -

*है निर्भयोऽस्म्यविनयोऽस्मि यत स्त्वदङ्घ्रौ*
*लिप्सा मलब्धवति चेतसि दुर्विनीते ।*
*दुष्कर्मवर्म परिकर्मित एष सोऽह -*
*मग्रे वरप्रद, तव प्रलपामि किञ्चित् ॥ ७४ ॥*

है इति । हे वरप्रद, दुष्कर्मवर्मपरिकर्मितः दुष्कर्मकवचालङ्कृतः, दुष्कृताच्छादितस्वरूप इत्यर्थः । एष सोऽहं वर्तमानकाले भूतकाले च दुष्कृतकृदहं यतः कारणात् दुर्विनीते अशिक्षिते चेतसि त्वदङ्घ्रौ लिप्सां वाञ्छां अलब्धवति अप्राप्ते सति तवाऽग्रे अन्तर्यामिण स्तव सन्निधौ किञ्चित्प्रलपामि युक्तायुक्तविचारराहित्येन यत्किञ्चिज्जल्पामीत्यर्थः । ततः कारणात् निर्भयोऽस्मि, अविनयोऽस्मि, भयविनयौ मम न स्तः इत्यर्थः । है खेदे ॥ ७४ ॥

"लिप्सा मलब्धवतिचेतसी" त्युक्तं विवृणोति -

***सव्याधि राधि रवितुष्टि रनिष्टयोगः***
***स्वाभीष्टभञ्जन ममर्षकरो निकर्षः ।***
***कृन्तन्ति सन्तत मिमानि मनो मदीयं***
***हस्तीश, न त्वदभिलाषनिधिप्रहाणिः ॥ ७५ ॥***

सव्याधि रिति । हे हस्तीश ! व्याधिः शरीरपीडा, सव्याधिः व्याधिसहितः आधिः मानसपीडा, अवितुष्टिः चिरकालं बहुशो भुक्तेष्वपि विषयेष्वतृप्तिः, अनिष्टयोगः अभिमतविषयविश्लेषरूपानिष्टप्रसङ्गः, स्वाभीष्टभञ्जनं चिराभिलषितविषयलाभप्रतिबन्धः अमर्षकरः अक्षान्तिकृत्, निकर्षः वित्तबन्ध्वादिन्यूनता च, वित्तादिभि र्मत्तोऽप्युन्नता एते किलेति इतरासहिष्णुत्वावह इति भावः । इमानि सामान्ये नपुंसकम् । सन्ततं सदा मदीयं मनः कृन्तन्ति छिन्दन्ति, कृतीच्छेदने इति धातुः । त्वयि विषये अभिलाष एव निधिः तस्य प्रहाणिः प्रकृष्टहानिः मनः न कृन्तति अभिलाषमात्रस्यैव अक्षयफल प्रदत्त्वात् निधित्वोक्तिः । अतो भगवल्लाभविषयकाभिलाष एव नाऽस्तीति भावः ॥ ७५ ॥

आनुकूल्याभावेऽपि प्रातिकूल्यबाहुल्य माह -

***विद्वेषमानमदरागविलोभमोहा-***
***द्याजानभूमि रहमत्र भवे निमज्जन् ।***
***निर्द्वन्द्व नित्य निरवद्य महागुण त्वां***
***हस्तीश, कश्श्रयितु मीक्षितु मीप्सितुं वा ॥ ७६ ॥***

विद्वेषेति । हे हस्तीश ! विद्वेषः निर्व्याज वैरम्, मानः आभिजात्यादि प्रयुक्तं चित्तौन्नत्यम्, विषयलाभसम्भूतश्चित्तविकारो मदः, विषयप्राप्त्यभिलाषो रागः, लब्धस्यार्थस्य पात्रप्रदानप्रति-बन्धकोऽर्थाभिनिवेशो विलोभः, कृत्याकृत्यविषयकसम्यक् ज्ञानहानि

र्मोहः, आदिशब्देन तन्मूलकमहत्त्वविभवादयो गृह्यन्ते, एतेषामाजानभूमिः जन्मभूमिः, अत एवाऽत्र भवे संसारे निमज्जन् अवगाहमानः अहम्, एतत्प्रतियोगिसम्बोधनं निर्द्वन्द्वेत्यादिकम्। निर्द्वन्द्व, द्वन्दशब्दस्समानवाची निस्समेत्यर्थः। निर्द्वन्द्वेति गुणविशेषणं वा। निर्द्वन्द्वाः ज्ञानमज्ञानम्, सुखं दुःख मित्यादिद्वन्द्वरहिताः, निस्समा वा, नित्याः निरवद्याः, कर्मकृतसङ्कोचादिदोषरहिताः, महान्तः अपरिच्छिन्नाश्च गुणाः ज्ञानशक्त्यादयो यस्य तथोक्तेत्यर्थः। हे हस्तीश, त्वा मीप्सितु मभिलषितुं, श्रयितु माश्रयितुम्, ईक्षितुं साक्षात्कर्तुं वा कः न कोऽपीत्यर्थः विद्वेषादिदोषाकरोऽहं हेयप्रत्यनीकनित्यकल्याणगुणाकरं त्वाम्, ईप्सितुं, माश्रयितु मीक्षितुमप्यधिकारी न भवामीत्यभिप्रायः ॥ ७६ ॥

अधिकाराभाव मेव प्रतिपादयति -

*पुत्रादयः कथ ममी मयि संस्थिते स्यु-*
*रित्यप्रतिक्रियनिरर्थकचिन्तनेन।*
*दूये, न तु स्वय महं भविताऽस्मि कीदृ-*
*गित्यस्ति हस्तिगिरिनाथ, विमर्शलेशः ॥ ७७ ॥*

पुत्रादयइति। हे हस्तिगिरिनाथ, मयि संस्थिते (मृते) सति अमी पुत्रादयः कथं स्युः कथं वा भूयासुः कथं वा जीवेयु रिति अप्रतिक्रियं प्रतीकाररहितं समाधानहीनं निरर्थकं निष्फल ञ्च, यच्चिन्तनं परामर्शनं, तेन दूये। दूङ् परितापे, परितापं भजामि। किन्तु, अहं स्वयं कीदृक् किंप्रकारविशिष्टो भवितास्मि, भविष्यामीति विमर्शलेशः स्वल्पोऽपि परामर्शो नाऽस्ति। अस्मन्मरणानन्तरं पुत्रादयः कथं वा जीविष्यन्तीति दुस्समाधेयव्यर्थविचारेण परितप्तस्य मम, अहं कीदृग्वा स्वर्गी. नारकी, मुक्तो वा भविष्यामीति स्वल्पाप्यालोचना नाऽस्तीति भगवल्लाभाभिलाषा द्यनधिकारित्व मुक्तम् ॥ ७७ ॥

विषयदोषसमष्टिं स्पष्टं दृष्टवतां वैतृष्ण्यं कुतो न जायते इत्यत आह-

*शम्पाचलं बहुलदुःख मनर्थहेतु*
*रल्पीय इत्यपि विमृष्टिषु दृष्टदोषम् ।*
*दुर्वासनाद्रढिमत स्सुख मिन्द्रियोत्थं*
*हातुं न मे मति रलं वरदाधिराज ॥ ७८ ॥*

शम्पाचल मिति । हे वरदाधिराज, मे मम मतिः दुर्वासनाद्रढिमतः अनादिकालपरिशीलनजनितविपरीत वासनादाढ्यात् हेतोः शम्पाचलं विद्युच्चञ्चलं क्षणिक मित्यर्थः । बहुलदुःखं अनुभवकालेऽपि यथामनोरथ मनुभवालाभादिमूल बहुलदुःखमिश्रम्, अनर्थहेतुः अभिजनत्वादिहानि सज्जनावमानननिरयप्रवेशा द्यनर्थकारणं, हेतु रिति नित्यपुंलिङ्गता, अल्पीयः अत्यल्पम् इति विमृष्टिषु विमर्शेषु दृष्टदोषं प्रत्यक्षितावद्यं इन्द्रियोत्थं इन्द्रियोत्पन्नं, विषयेन्द्रियसंसर्गजन्य मित्यर्थः । सुखं हातुं त्यक्तुं नाऽलं न समर्था भवति । स्पष्टदृष्टदोषवैषयिक भोगाभिलाषापरित्याग-निदानभूता दुर्वासनेति भावः ॥ ७८ ॥

विषयाभिलाषमात्रप्रवृत्तो न भवामि; किन्तु करणत्रयविरचित विविधापराधो भवामीत्याह -

***बुद्ध्वा च नो च विहिताकरणै र्निषिद्ध -***
***संसेवनै स्त्वदपचारशतै रसह्यैः ।***
***भक्तागसा मपि शतै र्भवताऽप्यगण्यै-***
***र्हस्तीश वाक्तनुमनोजनितै र्हतोऽस्मि ॥ ७९ ॥***

बुद्ध्वा चेति । हे हस्तीश बुद्ध्वा च ज्ञात्वा च, नो च अबुद्ध्वा च वाक्तनुमनोजनितैः करणत्रयेणाऽप्यनुष्ठितैः बुद्धिपूर्वकै रबुद्धिपूर्वकैश्चेत्यर्थः । भवता सर्वज्ञेनापि अगण्यैस्संख्यातु मशक्यैः विहिताकरणैः - "सत्यं वद, धर्मं चर", "अहरहस्सन्ध्या मुपासीत" इत्यादि श्रुतिस्मृति-चोदिताननुष्ठानैः, निषिद्धसंसेवनैः "न कलञ्जं भक्षयेत्, न सुरां पिबेत्" इत्यादिनिषिद्धानुष्ठानैः त्वदपचारशतैः, कंसशिशुपालादिवत्

भवद्वैभवासहत्वादिभिः भगवदपचारैः, भक्तागसां शतै रपि प्रह्लाद-वैदेहीविषयक हिरण्य- रावणानुष्ठितापचाररूपै र्भागवतापचारशतैरपि असह्यैः, अपचारै रित्यनुषङ्गः कर्तव्यः। निर्निबन्धनभगवद्भागवतापचारस्य असह्यापचारत्वात् एतै र्हतोऽस्मि। स्वरूपसत्ताऽपि नष्टप्रायेति भावः ॥ ७९ ॥

इत्थं स्वदोषसमुदाय मनुसन्धाय तादृशाय मह्य मपि भवान्निर्हेतुकयैव कृपया "दासभूता स्स्वत स्सर्वे ह्यात्मानः परमात्मनः। नाऽन्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च" इत्युक्तस्वरूपसत्तारूपदास्यरसज्ञानं दत्तवा नित्याह -

*त्वद्दास्य मस्य हि मम स्वरसप्रसक्तं*
*तच्चोरय न्नय महं किल चस्खल प्राक्।*
*त्वं मामकीन इति मा मभिमन्यसे स्म*
*हस्तीश, संशमय न स्तमिमं विवादम् ॥ ८० ॥*

त्वदिति। हे हस्तीश, अस्य मम पूर्वोक्तदोषराशिविशिष्टस्य मम त्वद्दास्यं हि स्वरसप्रसक्तं स्वारसिकं, स्वतस्सिद्धमित्यर्थः। अय महं प्राक् तत् दास्यं चारेयन् अपहरन् सन् भगवद्दास्यस्य जीवस्वरूपनिरूपक-लक्षणत्वात् तद्विपरीत प्रतिपत्तिरूप मात्मापहारं चौर्यं कुर्वन्; तदुक्तं महाभरते "योऽन्यथा सन्त मात्मान मन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा" इति। चस्खल किल। लिडुत्तमैकवचनम्। स्वस्वरूपज्ञानात् स्खलितवानासन् ननु त्वं मां मामकीन इति मदीयदास इति अभिमन्यसे स्म। अभिमानविषय मकरोः, दासतां ज्ञापितवा नसीत्यर्थः। नः तमिमं विवादं युष्माक मस्माकञ्च - "त्वं मेऽहं मे" इत्येवं रूपं संवादं संशमय सम्यक् शान्तं कुरुष्व, अपुनरङ्कुरं कुर्वित्यर्थः। नः इति "त्यदादीनां मिथः यत्परं तच्छिष्यते" इति युष्मदस्मदो रस्मच्छब्द-स्यैकशेषः। भवद्दास्यरूपात्मस्वरूपापहारिणः मम निर्हेतुककृपाव-लोकनमूलकं भवदीयताज्ञानं निस्संशयं विरचये त्याशयः ॥ ८० ॥

दास्यरस ज्ञापनानन्तरभाविनं स्वस्य प्रयोजनान्तरवैरस्य माह -

*भोगा इमे विधिशिवादिपदञ्च किञ्च*
*स्वात्मानुभूतिरिति या किल मुक्ति रुक्ता।*
*सर्वं तदूषजलजोष महं जुषेय*
*हस्त्यद्रिनाथ तव दास्यमहारसज्ञः ॥ ८१ ॥*

भोगा इति। हे हस्त्यद्रिनाथ, तव दास्यमहारसज्ञः अहं, ये इत्यध्याहार्यम्। ये इमे भोगाः परिदृश्यमानाः शब्दादिविषयानुभवाः, यत् विधिशिवादिपदञ्च। आदिशब्देन इन्द्रादयः परामृश्यन्ते। बह्मरुद्रेन्द्रादि स्थान विशेषश्चेत्यर्थः। किञ्च, स्वात्मानुभूति रिति या मुक्ति रुक्ता किल प्रकृति वियुक्त भगवदात्मकस्वात्मोपासनाफलतया तत्क्रतुन्याया दागता या स्वात्ममात्रानुभवरूपा कैवल्यमुक्तिः, सर्वं तत् ऊषजलजोषं ऊषरजल तुल्यं जुषेय सेवेय, ऐहिकैश्वर्यं, आमुष्मिकैश्वर्यं, कैवल्यमुक्तिञ्च अत्यल्परसं मन्य इत्यर्थः। ऊषजलजोष मित्यत्र "उपमाने कर्मणीति णमुल्प्रत्ययः। अनात्मगुणगणेन सर्वात्मना तिरोहित स्वाभाविक-भगवद्दास्यस्य मम दास्यरस ज्ञानोत्पादने कृते सति ऐश्वर्यकैवल्ययो वैराग्यं भवेदिति भावः॥ ७१ ॥

इत्थं भगवद्दास्यैकरसाः श्रीवत्साङ्कमिश्राः तत्प्राप्तये मन्त्ररत्नोक्तप्रकारेण शरणं व्रजन्ति श्लोकद्वयेन -

*विषय विषधरव्रजव्याकुले*
*जननमरणनक्रचक्रास्पदे।*
*अगति रशरणो भवाब्धौ लुठन्*
*वरद शरण मित्यहं त्वां वृणे॥ ७२ ॥*

विषयेति। हे वरद, विषया श्शब्दादिविषयाः त एव विषधराः सर्पाः तेषां व्रजेन गणेन व्याकुले निबिडे जननमरणान्येव नक्राः ग्राहविशेषाः तेषां चक्रस्य समुदायस्य आस्पदे वासस्थाने भवाब्धौ संसारसागरे लुठन्

परिवर्तमानः अत एव अशरणः उपायान्तरशून्यः। गम्यत इति गतिः अगतिः गत्यन्तरशून्यः अहं त्वां आश्रयणसौकर्यापादकश्रियः पतित्व सौशील्य सौलभ्य वात्सल्यादिविशिष्टं, आश्रितकार्यापादकदयाक्षान्तिज्ञान-शक्तिस्वामित्वादि विशिष्टञ्च भवन्त मित्यर्थः। शरणमिति वृणे रक्षकतया (उपायतया) स्वीकरोमि ॥ ७२ ॥

पूर्वस्मिन् श्लोके, श्रियःपतित्वादि सकलकल्याणगुणगण विशिष्टस्य, सिद्धोपायताध्यवसायं प्रतिपाद्य सम्प्रति निर्हेतुककृपामात्रविशिष्टस्य सिद्धोपायता मध्यवस्यति -

*अकृतसुकृतकस्सुदुष्कृदुत्तर -*
*श्शुभगुणलवलेशदेशातिगः।*
*अशुभगुणपरस्सहस्रावृतो*
*वरद मुरुदयं गतिं त्वां वृणे ॥ ८३ ॥*

अकृतेति। अकृतसुकृतकः अननुष्ठितपुण्यः अत एव शुभगुणलवस्य सात्त्विकताऽऽस्तिक्यादि सद्गुणांशस्य यः लेशः अंशः एकदेशः स यत्र देशे वर्तते तं देश मति गच्छति अतिक्रामतीति तथोक्तः, सुदुष्कृत्तरः सुतरां दुष्कृतकारिणा मप्यधिकः, अतएव अशुभगुणपरस्सहस्रावृतः कामक्रोधादिदुर्गुणानां परस्सहस्रेण सहस्रात्परेण सहस्रसंख्याधिकेन आवृतः आच्छादितः असंख्यातरागद्वेषादिदोषराशिदूषित इत्यर्थः। एतादृशोऽहं, उरुदयं निरवधिककृपानिधिं अत एव वरदं सकलजनसकलफलप्रदतया हस्तिगिरिमस्तकावस्थितं त्वां गतिं वृणे, अनिष्टनिवृत्तिपूर्वकेष्टप्रापक मुपाय मध्यवस्यामि। "वधार्हमपि काकुत्स्थः कृपया पर्यपालयत्" इति प्रबलतरागस्कारि काकासुररक्षायां केवलकृपैव हेतु रितिह्युक्तं, तद्वदिति भावः। अत्र श्लोकद्वयेऽपि आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्। रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा। आत्मनिक्षेप कार्पण्ये षड्विधा शरणागतिः" इत्युक्तेषु षट्स्वपि गोप्तृत्ववरणस्यैव शरणागतित्व मुक्तं

भवति । अतः, आत्मनिक्षेपस्यैव अङ्गित्व मितरेषा मङ्गत्व मिति प्रवादः प्राथमिकाभिप्रायेण, भगवद्भाष्यकार सकाशाधिगत सकलरहस्यतत्त्वार्थै रेतैः श्रीवत्साङ्कमिश्रैः गोप्तृत्ववरणस्य शरणागतितया प्रतिपादितत्वात् । वस्ततस्तु आनुकूल्यसङ्कल्पादिः वरणाङ्गमेव न भवतीति सर्वं समञ्जसम् ॥ ८३ ॥

"उरुदयं वरद" मिति दयालु रेव फलद इत्युक्तं, "भवाब्धौ लुठ" न्नित्यादिना स्वस्य दयनीयता च प्रतिपादिता । अत्र शरणवरणस्यापि अबुद्धिपूर्वकत्वात् दयनीयताधिक्यं प्रतिपाद्य ततः स्वकार्यसौकर्य माह -

*शरणवरणवागियं योदिता*
*न भवति बत साऽपि धीपूर्विका ।*
*इति यदि दयनीयता मय्यहो !*
*वरद, तव भवे त्ततः प्राणिमि ॥ ८४ ॥*

शरणेति । हे वरद, इयं शरणवरणवाक् या उदिता प्रयुक्ता साऽपि धीपूर्विका न भवति । अहृदयोक्तिरित्यर्थः । बतेति खेदे । इति शरणवरण मपि विगुणमिति हेतोः तव मयि विषये दयनीयता केवलदयाविषयोऽयमिति मति र्भवे द्यदि ततः तदनन्तरं, ततो हेतो र्वा प्राणिमि जीवामि अहो ! अत्याश्चर्यकरी भगवतो दयेति भावः ॥ ८४ ॥

"कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते । प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्" इत्युक्तप्रकारेण पश्चात्तापोऽपि भगवद्दयोन्मेषकः तदभावा द्दयनीयताऽपि नास्तीति विषीदति ।

*निरवधिषु कृतेषु चाऽऽग स्स्वहो*
*मति रनुशयिनी यदि स्यात्ततः ।*
*वरद, हि दयसे न संशेमहे*
*निरनुशयधियो हता है वयम् ॥ ८५ ॥*

निरवधिष्विति । हे वरद, कृतेषु सम्यगनुष्ठितेषु निरवधिषु

असङ्ख्यातेषु आगस्सु च अकृत्यकरणादिष्वपराधेषु विषये, अनुशयः अनुतापः अस्या अस्तीति अनुशयिनी मतिः स्या द्यदि। "अथाऽनुशयो दीर्घद्वेषानुतापयोः" इत्यमरः। ततो हेतोः दयसे दयां करोषि। न संशेमहे सं पूर्वात् शीङ् स्वप्ने इति धातोः लङुत्तमबहुवचनम्। संशयवन्तो न भवामः। अनुष्ठिते ष्वपि दुष्कृतेषु अनुतापः कृपोत्तम्भकः इति निर्णयवन्तो वय मित्यर्थः। निरनुशयधियः अनुतापरहितमतयः वयं हता वै। दुष्कृतहताः खल्वित्यर्थः। निरनुतापा वय मनुतापव्याजतः दयावतो भवतो दयनीयता मतीता एवेति भावः॥ ८५॥

निरवधिकापराधवतोऽनुतापरहितस्याऽपि मम शरण वरणवाणीं व्याजीकृत्य दयस्वेत्याह -

***शरणवरणवागियं याऽद्य मे***
***वरद, तदधिकं न किञ्चिन्मम।***
***सुलभ मभिमतार्थदं साधनं***
***तदय मवसरो दयाया स्तव॥ ८६॥***

शरणेति। हे वरद, अद्य मे मम या इयं शरणवरणवागभूत्। तदधिकं ततोऽप्युत्कृष्टं सुलभं सुकरं अभिमतार्थदं अभिलषितभवद्दास्यप्रदं किञ्चित्साधनं किमपि साधनतयाऽभिमतं मम नाऽस्ति। तत्तस्मात्कारणात् अयं तव दयाया अवसरः समयः मदीयशरणवरण वाणीप्रादुर्भावकाल एव त्वदीयाया दयायाः प्रादुर्भावसमय इत्यर्थः। उपायान्तरप्रसङ्गरहितां शरणागत्युक्तिं व्याजीकृत्य दयस्वेत्याशयः॥ ८६॥

एवं बहुशः दयाया एव उपायत्व मुक्त्वा समनन्तरं मन्त्ररत्नोत्तरखण्डार्थभूतकैङ्कर्यप्रार्थनामारब्धुकामः प्रथमतः कैङ्कर्यप्रतिसम्बन्धि भगवत्पादाम्बुजविषयकरुचिजनन मपि त्वदायत्त मित्याह -

*विषयविषयिणी स्पृहा भूयसी*
*तव तु चरणयो र्न साऽल्पापि मे ।*
*वरद, ननु भर स्तवैव त्वयं*
*यदुत तव पदस्पृहाजन्म मे ॥ ८७ ॥*

विषयेति। हे वरद, मे मम, विषयः शब्दादिरेव विषयः गोचरोऽस्या अस्तीति विषयविषयिणी शब्दादी नुद्दिश्य उत्पन्ने त्यर्थः । स्पृहा भूयसी अपरिच्छिन्ना, विषयाणा मसङ्ख्यातत्वात् तद्विषयस्पृहाऽपि अपरिच्छेद्येत्यर्थः । तव चरणयोस्तु सा स्पृहा अल्पाऽपि न । "उदीर्णसंसारदवाऽऽशुशुक्षणिं क्षणेन निर्वाप्य पराञ्च निर्वृतिम्। प्रयच्छति त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिन्धुशीकरः" इत्युक्तप्रकारेण अल्पाया अपि स्पृहाया अनिष्टनिवृत्तिपूर्वक मिष्टप्रदानशक्तत्वा दल्पाऽप्यलमिति भावः । उत अथवा तव पदस्पृहाजन्म यत् त्वदीयपादारविन्दद्वन्द्व-निरन्तरपरिचरणरुचिजननं यत् अय न्तु तवैव भरः। नन्विदं तवैवोत्पादनीयं हीत्यर्थः । अय मिति पुंलिङ्गनिर्देशः भर इति विधेय पदापेक्षया । निर्हेतुकपरमकारुणिकः भवा नेव रुचिजनकोऽपीति भावः ॥ ८७ ॥

इत्थं निरन्तरं विषयान्तरप्रणयप्रवणस्य यस्य मम भवद्दास्यरस्यताभि मज्जत्सज्जनवदनपरिणत शरणवरणवाणीपरिणति रतिदयालोरनालोचित विशेषाशेषलोकशरण्यस्य तव प्रसादौन्मुख्यप्रकाशिकेति वदति -

*इय मिह मति रस्मदुज्जीवनी*
*वरद, तव खलु प्रसादा दृते ।*
*शरण मिति वचोऽपि मे नोदिया -*
*त्वमसि मयि ततः प्रसादोन्मुखः ॥ ८८ ॥*

इय मिति। हे वरद, मे विषयान्तरस्पृहाबहुलस्य मम तव प्रसादा दृते प्रसन्नतां विना, "अन्यारादितरर्ते" इति द्वितीयार्थे पञ्चमी। प्रसादोऽनुग्रहः । शरण मिति वचोऽपि 'वरद, शरणमित्यहं त्वां वृणे' इत्युक्ति रपि नोदियात्

न प्रादुर्भूयात्खलु। ततो हेतो स्स त्वं मयि प्रसादोन्मुखोऽसि, इयं मतिः इतीयं बुद्धिः इह इदानीं अस्मदुज्जीवनी अस्मानुज्जीवयतीत्यर्थः। शरणवरणवाणीजननात् प्रसादौन्मुख्यानुमितिः तन्निबन्धनं निर्भरत्वानुसन्धान मिति भावः॥ ८८॥

विषयान्तरस्पृहायां सत्या मपि भवत्पादाम्बुजलाभाविरुद्धं भवता प्रसाद्यता मित्याह -

*वरद, यदिह वस्तु वाञ्छाम्यहं*
*तव चरणलभाविरोध स्ततः।*
*यदि न भवति तच्च देहि प्रभो*
*झटिति वितर पादमेवाऽन्यथा॥ ८९॥*

वरदेति। हे प्रभो अहं इह अत्र यद्वस्तु वाञ्छामि लब्धुमभिलषामि तद्वस्तुलाभात् तव चरणलाभायाः भवतः पादारविन्दलाभस्य विरोधः प्रतिबन्धः न भवति यदि, तच्च तद्वस्तु च देहि। अन्यथा इतरथा तव चरणलाभविरोधो भवति यदि, झटिति पाद मेव वितर! सपदि पादारविन्दं न दत्त श्चेत् विरुद्धवस्तुवाञ्छाऽपि स्वरूपहानिकरी स्या दित्यभिप्रायः॥ ८९॥

दुर्वासनावञ्चनया वञ्चिताय मह्यं भगवत्पदप्राप्तिविरुद्धं वस्त्वपि दातव्यं, क्षन्तव्यञ्चेत्याह -

*तदपि किमपि हन्त दुर्वासना-*
*शतविवशतया य दभ्यर्थये।*
*तदतुलदय सार्व सर्वप्रद*
*प्रवितर वरद, क्षमाम्भोनिधे॥ ९०॥*

तदिति। हे अतुलदय! निरुपमकृप, अपरिच्छेद्य कारुण्येत्यर्थः। क्षमाम्भोनिधे क्षान्तिसिन्धो, सार्व सर्वजनहित, सर्वशब्दात् हितार्थे अण् प्रत्ययः। सर्वप्रद सकलफलप्रद, वरद, तदपि तथाऽपि, तव

चरणलाभविरोधे सत्यपि दुर्वासनाशतस्य विवशतया परवशतया, असङ्ख्यातदुर्वासनावञ्चिततयेत्यर्थः। किमपि अतिक्षुद्रमपि यत् अभ्यर्थये वाञ्छामि तत् प्रवितर प्रदेहि, दयालुतया अभिलषितसकलप्रियप्रदानेऽपि हितपरेण भवता क्षन्तव्यञ्च भवतीति सम्बोधनाभिप्रायः ॥ १० ॥

इदं वितर, नेदं वितर इत्युक्ति रपि भगवति न्यस्तभरस्य ममाऽयुक्त मित्याह -

*प्रियमितर दथाऽपि वा य द्यथा*
*वितरसि वरद, प्रभो त्वं हि मे।*
*तदनुभवन मेव युक्तं तु मे*
*त्वयि निहितभरोऽस्मि सोऽहं यतः ॥ ११ ॥*

प्रिय मिति। हे वरद, प्रभो, स्वामिन् स्वतन्त्रेत्यर्थः। अथाऽपि अथवा त्वं स्वतन्त्र स्त्वं प्रिय मिष्टं, इतरद्वा अनिष्टं वा हितं वेत्यर्थः:। य द्वस्तु यथा येन प्रकारेण मे मह्यं वितरसि हि ददासि खलु। मे तु परतन्त्रस्य मम तु तदनुभवन मेव युक्तमुचितम्। तत्र हेतुमाह- त्वयीति। यतः कारणात् सोऽहं त्वयि निहितभरोऽस्मि। "वरद मुरुदयं गतिं त्वां वृणे" इति न्यस्तभरोऽस्मि। ततः कारणात् प्रियं वा हितं वा यत् ददासि तदेव मयाऽनुभवितु मुचित मित्यर्थः ॥ ११ ॥

इत्थं मन्त्ररत्नोत्तरखण्डस्थनमश्शब्दार्थभूतभगवत्प्राप्तिविरोधि स्वप्रवृत्तिनिवृत्तिं स्वरूपं प्रतिपाद्य श्रीमन्नारायणायेति यतुर्थ्यर्थभूतकैङ्कर्यप्रार्थनां प्रतिपादयन् स्तोत्रं परिसमापयति --

*यथाऽसि यावानसि योऽसि यद्गुणः*
*करीश यादृग्विभवो यदिङ्गितः।*
*तथाविधं त्वाऽह मभक्तदुर्ग्रहं*
*प्रपत्तिवाचैव निरीक्षितुं वृणे ॥ १२ ॥*

यथेति। हे करीश, योऽसि, ''सत्यं ज्ञानं मनन्तं ब्रह्म'', ''ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'' इत्यादिश्रुतिप्रतिपादित सत्यत्व ज्ञानत्वानन्तत्वानन्दत्वा मलत्वश्रियः पतित्वादि यत्स्वरूपनिरूपकगुणनिरूपितोऽसि, यद्गुणोऽसि ''पराऽस्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च''। इत्याद्युक्तप्रकारेण ज्ञानशक्त्यादि यद्गुणविशिष्टोऽसि। यथाऽसि ''यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति'' इत्याद्युक्त जगज्जन्मादिकारणत्वादिरूपय त्प्रकारकोऽसि, यावा नसि ''अणो रणीया न्महतो महीयान्'', ''अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः'' इत्याद्युक्तयावत्परिमाणोऽसि, यादृग्विभवोऽसि ''पतिं विश्वस्यात्मेश्वरं शाश्वतं शिव मच्युतम्'', ''तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम्'' इत्याद्युक्त यादृशैश्वर्योऽसि, यदिङ्गितोऽसि - 'इगि गतौ' - इङ्गितं व्यापारः ''अन्तः प्रविष्ट श्शास्ता जनानां सर्वात्मा'', ''यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति। य आत्मनि तिष्ठन् आत्मानमन्तरो यमयति, एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः'' इत्याद्युक्तचेतनाचेतननियमनव्यापारोऽसि। जगज्जन्मदिकारणत्वस्याऽपि स्वरूपनिरूपकत्वे 'यथाऽसी' त्यस्य ''आदित्यवर्णं तमसः परस्तात्''। ''य एषोऽन्त रादित्ये हिरण्मयः पुरुषः'' इत्याद्युक्तविग्रहवत्त्वमर्थः। तथाविधम् एव मुक्त स्वरूपगुण प्रकार परिमाण विभवचेष्टित विशिष्टम् अभक्तदुर्ग्रहम् - ''भक्त्या त्वनन्यया शक्यः अहमेवं विधोऽर्जुन'' ''उभय परिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगैकलभ्य'' इत्याद्युक्त-प्रकारेण भक्तियोगैक साक्षात्कार्यमित्यर्थः। तादृशं त्वाम्, अहं प्रपत्ति वाचैव शरणागत्युक्त्यैव निरीक्षितुं साक्षात्कर्तुं वृणे इच्छा मीत्यर्थः। वाचैवेत्येवकारेणैव सहकार्यन्तरव्यावृत्ति रुच्यते। ''वरद मुरुदयं गतिं त्वां वृणे'' इति केवलदयादिविशिष्टस्यैव साक्षादुपायत्वेनोक्तः, यद्यपि शक्तानां साक्षात्कारोऽस्ति, तथाऽपि त्वदेकोपायत्वमुक्तवतो मम स्वरूप-गुणादिपरिपूर्णं भवन्तं कारुण्यमात्रतः साक्षात्कारयेति निष्कृष्टोऽर्थः॥ ९२॥

"निरीक्षितुं वृणे" इति साक्षात्कारस्यैव साक्षात्फलत्वं प्रतीयते इति शङ्का मपनुदन् साक्षात्कारानन्तरभाविदास्यस्यैव मुक्तिफलत्व माह -

*अये दयालो वरद क्षमानिधे*
*विशेषतो विश्वजनीन विश्वद।*
*हितज्ञ सर्वज्ञ समग्रशक्तिक*
*प्रसह्य मां प्रापय दास्य मेव ते ॥ १३ ॥*

अये इति। अये इति सम्बोधनार्थक मव्ययम्। उपायान्तररहितानां केवलदयैवोपाय इति सूचनार्थं दयालो इति प्रथमतः प्रयोगः। क्षमानिधे सर्वापराधसहिष्णो इत्यर्थः। यत्र विषये दया जायते तदीयाशेषदोषराशिं क्षमाविषयं करोतीति भावः। सर्वज्ञ, समग्रशक्तिक सर्वशक्त, विशेषतः, विश्वजनीन सर्वजनहित, "विश्वजनभोगोत्तरपदात्खः" इति खप्रत्ययः। विश्वद सकलफलप्रद हितज्ञ आश्रितजनहितज्ञ वरद प्रसह्य फलान्तरप्रेप्सां निगृह्य ते तव श्रीमन्नारायणस्य भवत इत्यर्थः। दास्यं कैङ्कर्यमेव मां प्रापय प्राप्तं कारय। णिजन्तत्वाद्द्विकर्मकत्वम्। अत्र श्लोके दयालो क्षमानिधे इति श्रीमच्छब्दार्थो विवृतः, श्री भूम्यो र्दयाक्षमाशब्दवाच्यात्वात् - "देव्या कारुण्य रूपया", "साक्षात्क्षमा" मिति किलाभियुक्तप्रयोगः। सर्वज्ञ समग्रशक्तिक इत्यादिसम्बोधनपदै र्नारायण शब्दार्थोऽभिप्रेतः। दास्यं प्रापयेति चतुर्थ्यर्थो विवृतः। प्रसह्येति नमश्शब्दार्थो विवृतः। इति मन्त्ररत्नोत्तरवाक्यं सम्य ग्विवृत मिति साम्प्रदायिकानां पन्थाः ॥ १३ ॥

अथ बहुशः प्रतिपादितं केवल दयाया एवोपायत्व मुक्तलक्षणदास्य रूपफलप्रार्थना दाशाया मपि सविशेषं प्रकाशयति -

*स्वकै र्गुणैः स्वैश्चरितैः स्ववेदनात्*
*भजन्ति ये त्वां त्वयि भक्तितोऽथवा।*
*नरीश, तेषा मपि तावकी दया*
*तथा त्वकृ त्सैव तु मे बलं मतम् ॥ १४ ॥*

स्वकैरिति। हे करीश, ये चेतनाः स्वकै र्गुणैः ''मद्भक्त जन वात्सल्यं पूजाया ञ्चाऽनुमोदनम्। मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रिया। स्वय मभ्यर्चन ञ्चैव मदर्थे दम्भवर्जनम्। ममाऽनुस्मरणं नित्यं यच्च मां नोपजीवति'' इत्युक्तानुस्मरणशब्दवाच्य प्रपत्त्यङ्गभूतैर्गुणै रित्यर्थः। यद्वा, ''आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्'' इत्यादिभि रात्मनिक्षेपान्तै र्गुणैरित्यर्थः। स्वैश्वरितै रित्युपरि प्रत्येकं कर्मयोगादीनां वक्ष्यमाणत्वात्, स्वकै र्गुणै रित्यस्य प्रपत्तिपरत्व मेव युक्त मित्यवधार्यम्। स्वैश्चरितैः कर्मयोगेनेत्यर्थः। स्ववेदनात् ज्ञानयोगेनेत्यर्थः। अथवा त्वयि भक्तितः भक्तियोगेन वा, त्वां भजन्ति सेवन्ते परिचरन्ति। ये प्रपदन - कर्मयोग - ज्ञानयोग - भक्तियोग रूपै स्साधनैः त्वत्कैङ्कर्यं प्राप्नुवन्तीत्यर्थः। तेषा मपि चेतनानां तावकी दया तथात्वकृत् तथाविधनित्यकिङ्करत्व कारिणी भवति नित्यकैङ्कर्यरूपमहाफलं प्रति सदृशमुख्यहेतुत्वं दयाया एवेति भावः। सैव तु दयैव हि मे ''प्रपत्ति वाचैव निरीक्षितुं वृणे'' इत्यभिसन्धिमतो ममाऽपि बलं मतम्। मुख्यसाधनं निश्चित मित्यर्थः। साधनान्तराणां दयोन्मेषकत्वमात्रं सर्वमुक्तिप्रसङ्गनिरासायाऽङ्गीकृत्य दयाया एव साक्षात्साधनत्वाङ्गीकारे, शरणागत्युक्तिमतो ममाऽपि स एव सिद्धान्त इति भावः॥ ९४॥

उक्तमेव विवृणोति -

***यदि त्वभक्तोऽप्यगुणोऽपि निष्क्रियो***
***निरुद्यमो निष्कृतदुष्कृतो न च।***
***लभेय पादौ वरद, स्फुटा स्ततः***
***क्षमादयाद्या स्तव मङ्गला गुणाः॥ ९५॥***

यदीति। हे वरद, अभक्तोऽपि भक्तियोगरहितोऽपि अगुणोऽपि तदङ्गज्ञानयोगरहितोऽपि, निष्क्रियोऽपि कर्मयोगरहितोऽपि निरुद्यमो निष्कृतदुष्कृतो न च। आनुकूल्यसङ्कल्पप्रातिकूल्यवर्जनरहितोऽपीत्यर्थः। अहं

पादौ लभेय यदि तु प्राप्नुयां चेत्, ततो हेतोः मङ्गलाः अमङ्गलाना मपि मङ्गलत्वापादकाः क्षमादयाद्या स्तव गुणाः स्फुटाः प्रकटाः, भवेयुरिति शेषः । भक्त्यादिरहितायाऽपि मह्यं भवदीयपादपरिचर्यां प्रदद्या यदि, ततो दयादिमतो भवत स्सिद्धोपायत्वं प्रसिध्ये दिति भावः ॥ ९५ ॥

एवं केवल दयादिमत एव भगवत उपायत्वं प्रतिपाद्य स्वाभिमतकैङ्कर्यलाभे विलम्बहेत्वभावात् त्वरावान् प्रार्थयते -

***विलोकनै र्विभ्रमणै रपि भ्रुवोः***
***स्मितामृतै रिङ्गितमङ्गलै रपि ।***
***प्रचोदित स्ते वरद, प्रहृष्ट धीः***
***कदा विधास्ये वरिवस्यनं तव ॥ ९६ ॥***

विलोकनै रिति । हे वरद, ते विलोकनैः, भ्रुवो र्विभ्रमणैः विलासै रपि, स्मितामृतैः अत्यन्तरस्यैर्मन्दस्मितै रपि, इङ्गितमङ्गलै रपि हस्तचेष्टादीङ्गितरूप मङ्गलै रपि, मङ्गलकरै रिङ्गितै रपीत्यर्थः । एतैः प्रचोदितः प्रेरितः अत एव प्रहृष्टधीरपि अहं वरिवस्यनं शुश्रूषां कदा विधास्ये करिष्यामि ? विलोकनादीना मेव अत्यन्त भोग्यत्वेन तैः प्रचोदितस्याऽति प्रीतिकरत्वात्, प्रीतिकारितकैङ्कर्यमेव प्रार्थनीय मित्यभिप्रायः ॥ ९६ ॥

"क्रियता मिति मां वद" इत्युक्तप्रकारेण वाचाऽपि प्रचोदनं प्रार्थयते-

***विविश्य विश्वेन्द्रियतर्षकर्षणी -***
***र्मनः स्थले नित्यनिखातनिश्चलाः ।***
***सुधासखी र्हस्तिपते, सुशीतला***
***गिरः श्रवस्या श्शृणुयाम तावकीः ॥ ९७ ॥***

विविश्येति । हे हस्तिपते, विविश्य अतिभोग्यतया सर्वेन्द्रियाणि प्रविश्य, विश्वेन्द्रियाणां सर्वेन्द्रियाणां तर्ष मभिलाषं कर्षन्त्यः विलिखन्त्यः, ताः तर्षकर्षणीः अभिलाषोत्पादिका इत्यर्थः । रूपादिग्रहणानां चक्षुरादीना

मपि श्रोत्रत्वप्राप्तिप्रार्थनाकरीरिति यावत् । यद्वा, मुक्तिदशाया मेकैकेन्द्रियस्याऽपि सर्वविषयग्रहणनिपुणतासम्भवात् सर्वेन्द्रियाणा मपि श्रवणाकाङ्क्षोत्पादिका इत्यर्थः । मनः स्थले हृदयमध्ये नित्यं निखाताः कीलिताः, अत एव निश्चलाश्च ता नित्यं हृदयङ्गमा इत्यर्थः । सुधासखीः अमृतसदृशी रित्यर्थः । सुशीतलाः अमृतसदृशी (?) रित्यर्थः । विशेषणद्वयेन प्रिया हिता श्चेत्युक्तं भवति । श्रवस्याः श्रोत्रहिताः "शरीरावयवा द्यत्" इति हितार्थे यत्प्रत्ययः । तावकीः: त्वदीयाः गिरः श्रृणुयाम । अत्यन्तरस्यकुशलप्रश्न कैङ्कर्यनिदेशवचना न्यनुभवेमेति भावः। अवतारदशाया मपि अन्तरङ्गपरिजनाभ्यां सुमन्त्राक्रूराभ्यां "आशया यदि वा रामः पुनश्शब्दापये दिति", "मा मक्रूरेति वक्ष्यति" इति च रघुनन्दन यदुनन्दन वचः श्रवणमपि अत्र दृष्टान्ततया वक्तव्यम् ॥ ९७ ॥

"अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते" इत्युक्तप्रकारेण सर्वदेश सर्वकाल सर्वावस्थोचित सर्वविधकैङ्कर्यैकरतिः त्वत्परिजनो भवामीत्यभिलषति -

*अशेषदेशाखिलकालयोगिनी -*
*ष्वह न्त्ववस्था स्वखिला स्वनन्य धीः ।*
*अशेषदास्यैकरति स्तवाऽऽचरन्*
*करीश, वर्तेय सदा त्वदन्तिके ॥ ९८ ॥*

अशेषेति । हे करीश, अशेषदास्यानि सर्वविधकैङ्कर्याण्येव एका मुख्या रतिः भोगो यस्य स तथोक्तः । अत एव अनन्यधीः अन्यस्मिन् प्रयोजनान्तरे धीः भोग्यताबुद्धिः न विद्यते यस्य स तथोक्तः । अहन्तु अशेषदेशेषु अखिलकालेषु च योग स्सम्बन्धः आसामस्तीति तथोक्ताः तासु अवस्थासु जागरणस्वप्नाद्यवस्थास्वित्यर्थः । तवाऽऽचरन् भवतः कैङ्कर्यं कुर्वन् सन् इत्यर्थः । सदा त्वदन्तिके त्वत्परिसरे वर्तेय वसेयम् ॥ ९८ ॥

"यश्च रामं न पश्येत्तु यश्च रामो न पश्यति । निन्दित स्स वसेल्लोके

स्वात्माप्येनं विगर्हते" - इत्युक्त(पक्ष?)द्वयेऽपि स्वाम्यङ्गीकारसूचकं तदवलोकनमेव प्रथमतः प्रार्थयते -

*इमं जनं हन्त ! कदाऽभिषेक्ष्यते*
*त्वदक्षिनद्यो र्वरद, श्रमापहा।*
*अकृत्रिमप्रेमरसप्रवाहजा*
*विसृत्वरी वीक्षणवीचिसन्ततिः ॥ ९९ ॥*

इम मिति। हे वरद, त्वदक्षिणी एव नद्यौ, तयो रकृत्रिमं स्वाभाविकं प्रेम प्रीति रेव रसप्रवाहः, तस्माज्जायते इति तथोक्ता। अत एव श्रमापहा संसारकान्तार सञ्चारश्रान्तिहन्त्री विसृत्वरी विष्वग्व्यापिनी वीक्षणानां कटाक्षाणा मेव वीचीनां सन्ततिः परम्परा इमं जनं तापत्रयसन्तप्तं मा मित्यर्थः। कदा अभिषेक्ष्यते अभिषिक्तं करिष्यति। कटाक्षामृतरसावसेकेन मां कैङ्कर्यसाम्राज्याधिपत्यवन्तं कुरुष्वेत्यर्थः ॥ ९९ ॥

*सदातनत्वेऽपि तदातनत्वव -*
*न्नवीभवत्प्रेमरसप्रवाहया।*
*निषेवितं त्वां सततोत्कया श्रिया*
*करीश, पश्येम परश्शतं समाः ॥ १०० ॥*

सदातनत्वेऽपीति। हे करीश, सदातनत्वेऽपि नित्यपरिचितत्वेऽपि तदातनत्वात् अपूर्ववत् कदाऽप्यपरिचितवत् नवीभवन् यः प्रेमरसः भोग्यभूतः प्रणयः, तस्य प्रवाहः परम्परा यस्याः, सततोत्कया नित्यानुभवोत्सुकचित्तया श्रिया निषेवितं नित्य मुपभुक्तमित्यर्थः। त्वां परश्शतं शतात्परा स्समाः संवत्सरान्, अत्यन्तसंयोगे द्वितीया; निरन्तर मित्यर्थः। पश्येम साक्षात्करवाम। श्रीमन्तं नारायणं निरन्तर परिचर्याकरणाय साक्षात्करवामेति निष्कृष्टोऽर्थः ॥ १०० ॥

इत्थं मन्त्ररत्नविवरणभूतं प्रभूतवैभवं वरदराजस्तवं

परिसमापयितुकामः प्रथमप्रबन्ध श्रीवैकुण्ठस्तवोपक्रमे ''यो नित्यमच्युत पदाम्बुज युग्मरुक्मे'' त्यादि श्लोके ''रामानुजस्य चरणौ शरणं प्रपद्ये'' इति भाष्यकार चरणनलिनयुगल प्रपत्तेरेव स्वोत्तारकतया स्वीकृतत्वात्, ता मेव शङ्कापूर्वकं सर्वज्ञस्याऽपि भगवतः स्मारयति श्लोकद्वयेन -

*समाहितै स्साधु सनन्दनादिभि -*
*स्सुदुर्लभं भक्तजनै रदुर्लभम् ।*
*अचिन्त्यमत्यद्भुत मप्रतर्कणं*
*वरप्रद, त्वत्पद माप्नुयां कथम् ?।। १०१ ।।*

समाहितै रिति । हे वरप्रद, साधु समाहितैः सम्यक् समाधिनिष्ठैः सनन्दनादिभिः आदिशब्देन सनक - सनत्सुजातादयो गृह्यन्ते । सुदुर्लभं बहुयत्नलभ्य मित्यर्थः । भक्तजनैः, महनीयविषया प्रीतिर्भक्तिः, ''अच्युतपदाम्बुजयुग्मरुक्म व्यामोहत स्तदितराणि तृणाय मेने'' इत्युक्तप्रणयवद्भाष्यकारादीनां अदुर्लभम् अतिसुलभम्, अचिन्त्यम् ईदृश मिति चिन्तयितु मशक्यम्, अत एव अप्रतर्कणम् एवन्त्वा देवमिति तर्काविषयम्, अत एवात्यद्भुतं त्वत्पदं कथ माप्नुयां, भवत्पदप्राप्ति साधनत्वाभिमतेषु किञ्चिदप्यननुष्ठितवतो मम भवत्पदप्राप्तिः कथं वा भवे दिति भावः ।। १०१ ।।

सम्प्रति शङ्कापरिहाराय अनुष्ठितांशं स्मारयन् ''पितामहं नाथमुनिं विलोक्य प्रसी'' देति वत् ''रामानुजाङ्घ्रिशरणोऽस्मि कटाक्षणीयोऽ'' स्मीति स्तोत्रं परिसमापयति ।

*रामानुजाङ्घ्रिशरणोऽस्मि कुलप्रदीप -*
*स्त्वाऽऽसीत्स यामुनमुने स्स च नाथवंश्यः ।*
*वंश्यः पराङ्कुशमुने स्स च सोऽपि देव्या*
*दास स्तवेति वरदाऽस्मि तवेक्षणीयः ।। १०२ ।।*

इति श्रीवत्सचिह्नमिश्रविरचिते पञ्चस्तवे वरदराजस्तव स्समाप्तः ।

रामानुजेति । हे वरद, रामानुजाङ्घ्रिशरणोऽस्मि । न तु रामाङ्घ्रिशरणोऽस्मीत्यर्थः । "सिद्धिर्भवति वा नेति संशयोऽच्युत सेविनाम् । न संशयोऽत्र तद्भक्तपरिचर्यारतात्मनाम्" इति भावः । स्वाचार्यस्याऽपि सम्प्रदायशुद्धिमाह - सः रामानुज स्तु यामुनमुनेः कुलप्रदीपः आसीत् वंशप्रकाशकोऽभवत् इत्यर्थः । स च यामुनमुनिश्च नाथवंश्यः तत्पितामहत्वान्नाथमुनेः । स च नाथमुनिश्च पराङ्कुशमुनेः वंश्यः विद्यावंश्यः । सोऽपि पराङ्कुशमुनि रपि तव देव्याः सर्वजनजनन्याः "देव्या कारुण्यरूपया" इत्युक्तायाः श्रियः दास इति हेतोः ईक्षणीयोऽस्मि । भवदीयदयारूपायाः श्रियो देव्याः परम्परासम्बन्धवद्रामानुजाङ्घ्रि-शरणोऽस्मि । ततो हेतो कटाक्षणीयोऽस्मीति निष्कृष्टोऽर्थः ॥ १०२ ॥

पञ्चस्तवव्याख्याया

वरदराजस्तवव्याख्या परिसमाप्ता ॥

# श्रीस्तवः

इह खलु निखिलश्रुत्यन्ततत्त्वार्थं यामुनमुनिकुलतिलक रामानुजमुने रधिगतवन्तः श्रीवत्साङ्कमिश्राः, प्रथमतो ''नमोऽचिन्त्याद्भुताऽक्लिष्टज्ञान वैराग्यराशये । नाथाय मुनयेऽगाध भगवद्भक्तिसिन्धवे'' इत्युपक्रम्य, ''पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्त मचिन्तयित्वा'' इति स्तोत्ररत्नं परिसमाप्य, चतुश्श्लोकीमुक्तवतो यामुनमुनेः पन्थान मनुसृत्य, प्रथमतो ''यो नित्य मच्युतपदाम्बुजे'' त्यारभ्य, ''रामानुजस्य चरणौ शरणं प्रपद्ये'' इत्युपक्रम्य, प्रबन्धचतुष्टयं सृष्ट्वा ''रामानुजाङ्घ्रिशरणोऽस्मि ---- वरदाऽस्मि तवेक्षणीयः'' इति परिसमाप्य, भगवत्समाश्रयणोद्युक्त-समस्तचेतनजातेनाऽपि पुरुषकारतया प्रथमत स्समाश्रयणीयां श्रियमेकादशभिः श्लोकैः स्तोतुकामाः अशीर्वचनरूपं मङ्गल मन्तरायपरिहाराय निबध्नन्ति -

*स्वस्ति श्री र्दिशता दशेषजगतां सर्गोपसर्गस्थिती-*
*स्स्वर्गं दुर्गति मापवर्गिकपदं सर्वञ्च कुर्वन्हरिः ।*
*यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं*
*क्रीडेयं खलु नाऽन्यथाऽस्य रसदा स्या दैकरस्या त्तया ॥ १ ॥*

स्वस्तीति । अशेषजगतां सर्गोपसर्गस्थितीः, उपसर्गः, उपद्रवः, संहारः । सृष्टिसंहाररक्षाः । स्वर्गं, दुर्गतिं नरकम्, ''स्यान्नारकस्तु नरको

निरयो दुर्गतिः स्त्रियाम्'' इत्यमरः। अपवर्गः मोक्षः तत्सम्बन्धि पदं स्थानं आपवर्गिकपदं, सर्वञ्च उक्तव्यतिरिक्तं ऐहिकामुष्मिकभोगविशेष ञ्च सर्वं कुर्वन् चिकीर्ष न्नित्यर्थः। हरिः यस्याः श्रियो मुखं वीक्ष्य, तदिङ्गितपराधीन स्सन् तत्तत्सूचकभ्रूभङ्गादीङ्गित परतन्त्र स्सन् अखिलं सर्गादिकं सकलं विधत्ते करोति। अन्यथा तदिङ्गितपराधीनत्वाभावे, अस्य तया श्रिया ऐकरस्यात् एकरसत्वाद्धेतोः इयं क्रीडा सर्गादिकृतिरूपा क्रीडा रसदा न स्यात् आनन्दावहा न भवेत्खलु; प्रयासप्राया हि भवे दित्यर्थः:। श्रिया एकरसत्वं नाम तदभिमत्यनभिमत्यनुविधायिस्वप्रियाऽप्रियत्वम्। सा श्रीः ''श्री रित्येव च नाम ते भगवति'' इत्युक्तवैभवा श्री नामधेया सा स्वस्ति दिशतात् ददातु; स्तोत्रनिर्माणोद्युक्ताय मह्यं तदनुकूलवाक्समृद्ध्यादिकं प्रदद्या दित्यर्थः॥ १॥

स्वस्तिश्री र्दिशता दित्युक्तमेव विवृणोति -

*हे श्री र्देवि, समस्तलोकजननीं त्वां स्तोतु मीहामहे*
*युक्तां भावय भारतीं प्रगुणय प्रेमप्रधानां धियम्।*
*भक्तिं भन्दय नन्दयाऽऽश्रित मिमं दासं जनं तावकं*
*लक्ष्यं लक्ष्मि, कटाक्षवीचिविसृते स्ते स्याम चाऽमी वयम्॥२॥*

हे इति। हे श्री र्देवि लक्ष्मि, सम्बोधनत्रयेऽपि द्वयो र्विशेषणत्व मेकस्य विशेष्यत्व मिति मन्तव्यम्। वयं समस्तलोकजननीं, लोकशब्दो जनवाचकः, त्वां स्तोतु मीहामहे, ईह चेष्टायाम् - प्रयतामहे इत्यर्थः युक्तां स्तुत्युपयुक्तां भारतीं वाचं भावय उत्पादय। प्रेमप्रधानां स्तुत्युपयुक्त भारतीहेतुभूतत्वदीय कल्याणगुणगणविषय प्रणयप्रचुरां धियं मतिं प्रगुणय अभिवर्धय। भक्तिं भन्दय - भदि कल्याणे सुखे च इति धातुः। उक्तलक्षणप्रणयकारणभूतां भक्तिं कल्याणीं कुरुष्व; परमभक्तिपर्यन्तपरिपाकवतीं रचयेत्यर्थः। आश्रितं इमं जनं तावकं दासं

नन्दय; आश्रिता नस्मान् परमभक्त्यनन्तरभाविभवदीयनित्य कैङ्कर्यनिरतान् कृत्वा सन्तोषयेत्यर्थः । अमी वयञ्च ते तव कटाक्षवीचिविसृतेः अपाङ्गतरङ्गविजृम्भणस्य लक्ष्यं स्याम पात्रभूता भवेम। वयञ्चेत्यत्र चकारो नित्यमुक्तान् समुच्चिनोति । यथा नित्यमुक्ता स्त्वदीयकिङ्कराः त्वदपाङ्गतरङ्गनिरन्तराभिषिक्ता भवन्ति, तथा वय मपि भवेमेति भावः ॥ २ ॥

एवं स्तवानुगुणवाणी प्रभृतिनित्यकिङ्करत्व पर्यन्तं स्वाभिमतं सम्प्रार्थ्य, सम्प्रति, कविजनाभिमतस्तोत्ररचना निरवधिकातिविलक्षणगुणवत्यां भवत्यां न सम्भवतीत्याह -

*स्तोत्रं नाम किमामनन्ति कवयो, यद्यन्यदीयान् गुणा -*
*नन्यत्र त्वसतोऽधिरोप्य फणितिः, सा तर्हि वन्ध्या त्वयि ।*
*सम्यक्सत्यगुणाभिवर्णन मथो ब्रूयुः, कथं तादृशी*
*वा ग्वाचस्पतिनाऽपि शक्यरचना त्वत्सद्गुणार्णो निधौ ॥ ३ ॥*

स्तोत्रमिति । कवयः कवनशीलाः किन्नाम किं वा स्तोत्रमामनन्ति वदन्ति, स्तोत्रं किंलक्षणलक्षित माचक्षते इत्यर्थः । असतः स्तुत्ये वस्तुनि अवद्यिमानान्, अन्यदीयान् अन्यस्मिन् वस्तुनि विद्यमानान् गुणान् अधिरोप्य फणितिः उक्तिः स्तोत्रं यदि, तर्हि तदा सा आत्मन्यविद्यमानान्यगुणारोपरूपा फणितिः त्वयि वन्ध्या विफला; असङ्ख्यातगुणगणनिधौ भवत्यां अविद्यमानगुणारोपासम्भवा दिति भावः । अथो अथवा सम्यक् यथावत् सत्यगुणाभिवर्णनं विद्यमानगुणानां अभितो वर्णनं स्तोत्रं ब्रूयुः वदेयु र्यदि, त्वत्सद्गुणार्णोनिधौ भवदीयकल्याणगुणसागरे विषये तादृशी वाक् विद्यमान कृत्स्नगुणवर्णनरूपा वाक् वाचस्पतिनाऽपि वागीश्वरेण बृहस्पतिनाऽपि कथं शक्य रचना ? रचयितुं अशक्यैवेत्यर्थः । कल्याणगुणनिधित्वात् अविद्यमान गुणारूपो, विद्यमानगुणयथावद्वर्णन ञ्च न सम्भवतीति भावः ॥ ३ ॥

इत्थं गुणाना मपरिच्छिन्नत्वे स्तोत्रप्रवृत्तिः कथमित्याशङ्क्य सदृष्टान्तं परिहरति -

*ये वाचां मनसाञ्च दुर्ग्रहतया ख्याता गुणा स्तावका-*
*स्तानेव प्रति साम्बुजिह्व मुदिता है मामिका भारती।*
*हास्यं तत्तु न मन्महे न हि चकोर्येकाऽखिलां चन्द्रिकां*
*नाऽलं पातु मिति प्रगृह्य रसनामासीत सत्यां तृषि॥ ४॥*

य इति। तावका स्त्वदीयाः ये गुणाः वाचां मनसाञ्च दुर्ग्रहतया अवाङ्मनसगोचरतया ख्याताः, तान् गुणानेव प्रति स्तुत्यतयोद्दिश्य मामिका मदीया भारती वाक् साम्बुजिह्वं गुणाना मत्यन्तरस्यताज्ञानादुद्रव सहितरसनं यथा तथा उदिता, अवश्यं स्तौमि, इत्येवं सङ्कल्प्य सरसं प्रवृत्तेत्यर्थः। है आश्चर्ये। तत्तु उदयनन्तु हास्यं न मन्महे परिहासास्पदं न जानीमहे। हि यस्मा त्कारणात् एका चकोरी तृषि सत्यां इच्छायां सत्यां अखिलां चन्द्रिकां कौमुदीं पातुं नाऽलम्, न समर्थाऽस्मीति रसनां जिह्वां प्रगृह्य नाऽऽसीत नावतिष्ठेत। भारतीदृष्टान्तानुगुणं चकारे पत्नीतिप्रयोगः। पिपासावती चकोरी कृत्स्नचन्द्रिकापानाशक्तावपि यथा प्रवर्तते, तथा मदीयभारती च तुष्टूषावती प्रवर्तत इति भावः॥ ४॥

स्तोतुं स्वस्य गुणशून्यतया स्तोत्रप्रवृत्तौ लज्जाभयोन्मेषं, स्तुत्यस्य विषयस्य दोषस्पर्शम प्याशङ्क्य सदृष्टान्तं परिहरति -

*क्षोदीया नपि दुष्टबुद्धिरपि निस्स्नेहोऽप्यनीहोऽपि ते*
*कीर्तिं देवि लिहन्नहं न च बिभेम्यज्ञो न जिह्रेमि च।*
*दुष्येत्सा तु न तावता, न हि शुना लीढाऽपि भागीरथी*
*दुष्येच्छ्वाऽपि न लज्जते न च बिभे, त्यार्तिस्तु शाम्येच्छुनः॥ ५॥*

क्षोदीया निति। हे देवि, क्षोदीया नपि अतिक्षुद्रोऽपि अत एव दुष्टबुद्धि रपि, अत एव निःस्नेहोऽपि भक्तिरहितोऽपि अत एवाऽनीहोऽपि -

ईहचेष्टायाम्- भक्तिकार्यपरिचर्यारहितोऽपि ते कीर्तिं गुणवत्ताप्रथां लिहन् स्तुत्यतया आस्वादयन् अज्ञः अहं न च बिभेमि न च भीतिमान् भवामि, न जिह्रेमि च ह्रीमान्न च भवामि। सा तु कीर्ति स्तु तावता मदीयास्वादनेन न दुष्येत् न दोषं प्राप्नुयात् । हि यस्मात्कारणात् शुना शुनकेन लीढा आस्वादिताऽपि भागीरथी न दुष्येत् श्वाऽपि न लज्जते, न बिभेति च, शुनः शुनकस्य आर्ति स्तु पिपासा तु शाम्येत् शान्ता भवेत् । तथा त्वत्कीर्त्यास्वादनेन मदीयतुष्टूषा शान्ति स्सम्भवे दिति भावः ॥ ५ ॥

इत्थं स्तुतिं प्रस्ताव्य स्तौति -

*ऐश्वर्यं महदेव वाऽल्पमथवा दृश्येत पुंसां हि य-*
*त्तल्लक्ष्म्या स्समुदीक्षणा त्तव यत स्सार्वत्रिकं वर्तते ।*
*तेनैतेन न विस्मयेमहि जगन्नाथोऽपि नारायणो*
*धन्यं मन्यत ईक्षणा त्तव यत स्स्वात्मान मात्मेश्वरः ॥ ६ ॥*

ऐश्वर्य मिति। सार्वत्रिकम् ऐहिकमामुष्मिकञ्च। पुंसां य दैश्वर्यं महदेव वा अल्प मथवा अल्पं वा दृश्यते विलोक्यते तदैश्वर्यं लक्ष्म्या स्तव यतः समुदीक्षणात् यस्माद्भवदीक्षणात् कटाक्षात् वर्तते प्रवर्तते तेनैतेन तादृशवैभवेन अनेन कटाक्षेण न विस्मयेमहि आश्चर्यवन्तो न भवामः । विस्मयाभावे हेतुमाह - जगन्नाथोऽपीत्यादिना। यतः कारणाज्जगन्नाथः आत्मेश्वरः, "पतिं विश्वस्याऽऽत्मेश्वरम्" इति श्रुति प्रतिपादितः नारायणोऽपि "नारायण परं ब्रह्म तत्त्व न्नारायणः परः" इत्युक्तोऽपि, तव ईक्षणात्स्वात्मानं "सत्यं ज्ञान मनन्तं ब्रह्म", "आनन्दो ब्रह्म", "रसो वै सः" इत्याद्युक्तवैलक्षण्यस्वरूपादिक (युक्त) मपि, यद्वा स्वात्मानं "प्रकतिं स्वा मधिष्ठाय सम्भवामि", "न तस्य प्राकृता मूर्तिः" इत्याद्युक्तमहिमस्वदिव्यविग्रहं वा, धन्य म्मन्यते, सौभाग्यवन्तं जानाति। ततः इतरेषा मैश्वर्यं त्वदीक्षणायत्त मित्यत्र नाऽऽश्चर्य मिति भावः ॥ ६ ॥

*ऐश्वर्यं यदशेषपुंसि यदिदं सौन्दर्यलावण्ययो -*
*रूपं यच्च हि मङ्गलं किमपि यल्लोके स दित्युच्यते।*
*तत्सर्वं त्वदधीन मेव यदतः श्रीरित्यभेदेन वा*
*यद्वा श्रीमदितीदृशेन वचसा देवि, प्रथा मश्नुते ॥ ७ ॥*

ऐश्वर्य मिति। अशेषपुंसि समस्तेषु चेतने ष्वित्यर्थः। यदैश्वर्यं - सौन्दर्यं अवयवशोभा, लावण्यं समुदायशोभा, यदिदं सौन्दर्यलावण्ययोरूपं, लोके यच्च मङ्गलं हि मङ्गलतया प्रसिद्धं, यत् किमपि सत् समीचीन मित्युच्यते। उच्यत इति पदस्य सर्वत्राऽनुषङ्गः। तत्सर्वं अशेषपुरुषनिष्ठैश्वर्यादिकं सर्वं यत् यस्मात्कारणात् त्वदधीन मेव, भवतीति शेषः। अतो हेतोः श्री रिति अभेदेन अभेदाध्यवसायेन वा, यद्वा- 'श्रीमत्' इतीदृशेन श्रीम दित्येवंप्रकारेण वचसा वा प्रथां प्रसिद्धिं अश्नुते प्राप्नोति। लौकिकसकलचेतन गतैश्वर्य सौन्दर्यलावण्य मङ्गल सदादिशब्दवाच्यानां श्री शब्देन श्रीमच्छब्देन वा वाच्यत्वं त्वत्कटाक्षायत्तत्वनिबन्धन मिति निष्कृष्टार्थः ॥ ७ ॥

एतादृशं त्वदीयैश्वर्यं भवद्भ्यामपरिच्छेद्य मित्याह -

*देवि, त्वन्महिमावधि र्न हरिणा नाऽपि त्वया ज्ञायते*
*यद्यप्येव, मथाऽपि नैव युवयो स्सर्वज्ञता हीयते।*
*यन्नास्त्येव तदज्ञता मनुगुणां सर्वज्ञताया विदु -*
*र्व्योमाम्भेज मिदन्तया किल विदन्भ्रान्तोऽय मित्युच्यते ॥ ८ ॥*

देवीति। हे देवि, त्वन्महिम्नोऽवधिः हरिणा न ज्ञायते, त्वयाऽपि न ज्ञायते। एवं यद्यपि, अथाऽपि युवयोः भवतोः सर्वज्ञता न हीयत एव, हीना न भवत्येव। कथं वा न सर्वज्ञताहानि रित्यत आह - यन्नाऽस्त्येवेति। तदज्ञतां अविद्यमानाज्ञतां सर्वज्ञताया अनुगुणां विदुः। तत्र दृष्टान्तं

व्यतिरेकेणाऽऽह -व्योमाम्भोजं, अविद्यमानमिति भावः। इदन्तया पुरोवर्तितया विदन् जानन् अयं भ्रान्त इत्युच्यते, तटस्थैरिति शेषः। अतो वस्तुत एवाऽविद्यमानत्वन्महिमावध्यज्ञानं सर्वज्ञतानुगुण मिति भावः ॥ ८ ॥

*लोके वनस्पति बृहस्पति तारतम्यं*
*यस्याः प्रसादपरिणाम मुदाहरन्ति।*
*सा भारती भगवती तु यदीयदासी*
*तां देवदेवमहिषीं श्रियमाश्रयामः ॥ ९ ॥*

लोक इति। वनस्पतिः अज्ञोत्कृष्टः, बृहस्पतिः ज्ञाना दुत्कृष्टः, तयोः तारतम्यं यस्याः प्रसादपरिणाम मुदाहरन्ति, प्रसादस्य परिणामं न्यूनाधिकपरिपाकं व्यवहरन्ति, सा भगवती पूज्या भारती सरस्वती यदीयदासी यत्परिचारिका भवति देवदेवमहिषीं तां श्रियमाश्रयामः, ज्ञानप्रसादपरिपाक (हेतु?) भारतीपरिचरितचरणनलिनयुगलां श्रियं शरणं भजाम इति भावः ॥ ९ ॥

*यस्याः कटाक्षमृदुवीक्षण दीक्षणेन*
*सद्य स्समुल्लसितपल्लव मुल्ललास।*
*विश्वं विपर्ययसमुत्थविपर्ययं प्राक्*
*तां देवदेवमहिषीं श्रिय माश्रयामः ॥ १० ॥*

यस्या इति। प्राक् प्रलयकाले विपर्ययेन कटाक्षाभावेन समुत्थः सञ्जातः विपर्ययः अभावः यस्य तत्तथोक्तं, विश्वं जगत्, यस्याः कटाक्षरूपं यत् मृदुवीक्षणं तस्य दीक्षणेन सङ्कल्पेन सद्य स्समुल्लसितपल्लवं सञ्जाताङ्कुरं यथा तथा उल्ललास आविर्बभूव। तां देवदेवमहिषीं श्रियम् आश्रयामः ॥ १० ॥

इत्थं स्वव्यतिरिक्तविषये सुलक्षितं लक्ष्मीकटाक्षवैलक्षण्यवैभवं स्वस्मिन्नपि सम्प्रार्थ्य स्तोत्रं परिसमापयति -

*यस्याः कटाक्षवीक्षा -*
*क्षणलक्षं लक्षिता महेशाः स्युः ।*
*श्रीरङ्गराजमहिषी*
*सा मामपि वीक्षतां लक्ष्मीः ॥ ११ ॥*

इति श्रीवत्सचिह्नमिश्रविरचिते पञ्चस्तवे

श्रीस्तवः समाप्तः ॥

यस्या इति । यस्याः कटाक्षवीक्षायाः क्षणलक्षं क्षणमात्रं लक्ष्यं ये लक्षिताः जनाः, ते महेशाः स्युः । अत्यन्तैश्वर्यवन्तो भवेयुः । श्रीरङ्गराजमहिषी सा लक्ष्मीः मामपि वीक्षताम्, तत एव कृतकृत्यो भवेय मिति भावः ॥ ११ ॥

इति पञ्चस्तवव्याख्यायां श्री स्तवव्याख्या परिसमाप्ता ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्ति मधीमहे ।

यदुक्तयः स्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

# पञ्चस्तवस्थितानां श्लोकानामकाराद्यनुक्रमणी



| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| अ | | | |
| अकृतसुकृतक स्सुदुष्कृदुत्तरः | वर | ८३ | २२९ |
| अक्षुण्णयोगपथ मग्रच | अति | १८ | ७६ |
| अज्ञे यज्ञेश्वर किल | वर | ५३ | २०९ |
| अञ्जनक्षितिभृतो | वर | ३० | १९८ |
| अण्डानां त्वदुदर | वर | ४९ | २०७ |
| अतिपतितावधि | सुन्द | २३ | ११७ |
| अतिमानुषशील | अति | १ | ६७ |
| अदीर्घ मप्रेमदुघं | सुन्द | ४३ | १२९ |
| अद्भुतं मह दसीम | वर | ९ | १८४ |
| अद्याऽपि नाऽस्त्युप | अति | ५९ | १०० |
| अधोमुखन्यस्त | सुन्द | ६१ | १३८ |
| अनन्याधीनत्वं तव | वर | २० | १९२ |
| अनवाप्तमत्र किल | सुन्द | १०२ | १६० |
| अनाप्तं ह्याप्तव्यं | वर | ६४ | २१६ |
| अन्तर्हितो निधि रसि | वैकु | १२ | ८ |
| अन्धन्तम स्तिमिर | सुन्द | ४० | १२७ |
| अन्यत्र तु क्वचन | वैकु | १८ | १३ |
| अन्योन्य चेष्टित | सुन्द | ७१ | १४३ |
| अब्जपाद मर | सुन्द | ३३ | १२३ |
| अब्धिं न तेरिथ | अति | २४ | ७९ |
| अम्भोदनील मर | अति | ४८ | ९३ |
| अम्भोधेः स्वयमभि | वर | ४५ | २०५ |
| अम्भोरुहाक्ष मर | वैकु | ६८ | ४५ |



वैकु =वैकुण्ठस्तवः, अति = अतिमानुषस्तवः, सुन्द = सुन्दरबाहुस्तवः, वर = वरदराजस्तवः, श्रीस्त = श्रीस्तव

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| अये दयालो वरद | वर | ९३ | २३६ |
| अरालं पातालं त्रि | सुन्द | ९६ | १५७ |
| अरुणाधर पल्लवे | वर | ३७ | २०१ |
| अलकालिचिकीर्षया | वर | ३३ | १९९ |
| अशक्यं नो किञ्चि | सुन्द | १२३ | १७१ |
| अशेषदेशाखिल | वर | ९८ | २३९ |
| असि जलजरथा | सुन्द | ३८ | १२६ |
| अस्तं यदुद्य दुप | वैकु | ५४ | ३७ |
| अह महमिकाभाजो | सुन्द | ५४ | १३४ |
| अंहः प्रसह्य विनि | वैकु | ८५ | ५५ |
| आ | | | |
| आक्रीड भूमिषु सुग | सुन्द | ७८ | १४७ |
| आज्ञीनिसर्गनियता | वैकु | ७३ | ४८ |
| आचिन्वतः कुसुम | अति | ५२ | ९५ |
| आजानज स्वगत | सुन्द | ३९ | १२७ |
| आज्ञा तवाऽत्र भवती विदिता | | | |
| त्रयी सा तां हि | वैकु | ११ | ७ |
| आज्ञा तवाऽत्र भवती विदिता | | | |
| त्रयी सा धर्मं | सुन्द | १०० | १५९ |
| आत्मेश्वरोऽसि न परो | वैकु | २० | १४ |
| आधिराज्यमधिकं | वर | २५ | १९५ |
| आनन्दमन्दिर | सुन्द | ७९ | १४७ |
| आनन्दमैश्वर | वैकु | २४ | १७ |
| आम्नाय कल्पलति | सुन्द | ६५ | १४० |
| आम्नाय | वैकु | ७ | ५ |
| आयोध्यगान्सपशु | सुन्द | १२५ | १७२ |
| आश्रयेषु सुलभो | सुन्द | १०९ | १६४ |
| आश्लेषे वरदभुजा | वर | ४३ | २०४ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| इ | | | |
| इङ्गितं निमिषितञ्च | सुन्द | ११५ | १६७ |
| इच्छात एव तव | वैकु | ३६ | २५ |
| इच्छाविहारविधये | वैकु | ४० | २८ |
| इद मिमे शृणुमो | सुन्द | १२८ | १७४ |
| इद म्भूयो भूयः पुन | सुन्द | १३२ | १७६ |
| इमं जनं हन्त कदा | वर | ९९ | २४० |
| इय मिह मति रस्म | वर | ८८ | २३२ |
| इयं वैयूही वै | वर | १७ | १९० |
| इह च देव ददासि | सुन्द | १२७ | १७३ |
| इहावतीर्णस्य | सुन्द | ८९ | १५३ |
| ई | | | |
| ईदृशा स्त्वदवतार | सुन्द | १२१ | १७० |
| ईदृशैः परिजनैः | सुन्द | ७७ | १४६ |
| उ | | | |
| उदधिगमन्दराद्रि | सुन्द | ४ | १०५ |
| उद्धरत्युपरि भक्त | वर | २६ | १९६ |
| उन्निद्रपत्रशत | वैकु | ७२ | ४७ |
| उपवनतरुषण्डे | सुन्द | १०४ | १६१ |
| उभयोरपि पक्षयो | वर | ३२ | १९९ |
| ए | | | |
| एकस्य येषु हि | वैकु | ४७ | ३२ |
| एकान्त मङ्गलगुणा | अति | ७ | ६९ |
| एकैकमङ्गलगुणा | सुन्द | ३२ | १२३ |
| एतत्कथं कथय | अति | २६ | ८० |
| एते ते बत सुन्द | सुन्द | ६४ | १३९ |
| एतेन वै सुविदितं | वैकु | ९७ | ६२ |
| एवं तया चतुरया | वैकु | ५२ | ३५ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| एवं भगो इह | वैकु | ३३ | २३ |
| एवं स्थिते त्वदुप | अति | ९ | ७० |
| एष ईश इति | वर | ६ | १८२ |
| ऐ | | | |
| ऐन्दीवरी क्वचिदपि | वैकु | ७५ | ४९ |
| ऐशं हि शैशव | अति | ३७ | ८७ |
| ऐश्वर्यतेजोबल | सुन्द | २८ | १२० |
| ऐश्वर्यवीर्य करुणा | वैकु | ९८ | ६२ |
| ऐश्वर्यं महदेव वा | श्रीस्त | ६ | २४७ |
| ऐश्वर्यं यदशेष | श्रीस्त | ७ | २४८ |
| क | | | |
| कनक मरतका | सुन्द | ३४ | १२४ |
| करुणारसवाहि | वर | ३५ | २०० |
| कर्णिका तव करीश | वर | २७ | १९८ |
| कल्की भविष्य न्कलि | सुन्द | १२० | १६९ |
| कान्तालकान्त ममलं | अति | ४२ | ९० |
| कारुण्यामृतवारिधे | सुन्द | १३१ | १७६ |
| कालियस्य फणतां | सुन्द | १११ | १६५ |
| किञ्चेदञ्च विरिञ्चि | सुन्द | १३० | १७५ |
| किन्नु स्वयं स्वात्म | सुन्द | ३५ | १२४ |
| किं धातु र्गगन विधान | वर | ४८ | २०६ |
| किं भूयसा प्रलपितेन | वैकु | ८९ | ५७ |
| किं साधनः क्व निव | वैकु | ३८ | २७ |
| कूलेब्धेः किल दक्षि | सुन्द | १०५ | १६२ |
| कैङ्कर्य नित्यनिरतै | वैकु | ७७ | ५० |
| क्रीडाविधेः परि | अति | १२ | ७२ |
| क्वचित्त्वरित गामिनी | सुन्द | ३ | १०४ |
| क्षान्ति स्तवेय मिय | वैकु | ६२ | ४१ |

| स्तोत्रनाम | तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| क्षितिरियं जनि | सुन्द | ९८ | १५८ |
| क्षोदीया नपि दुष्ट | श्रीस्त | ५ | २४६ |
| ग | | | |
| गर्भेषु निर्भरनिपी | वैकु | ९१ | ५९ |
| गायं गायं वनगिरि | सुन्द | ११४ | १६६ |
| गुणजं गुणिनो हि | सुन्द | २२ | ११६ |
| गुणायत्तं लोके | वर | ११ | १८६ |
| गुणैष्षड्भि स्त्वेतैः | वर | १६ | १९० |
| गूहितस्वमहिमाऽपि | सुन्द | ११२ | १६५ |
| गोपालपोतकतया | अति | ४४ | ९० |
| गोपालवेषपरि | अति | ५५ | ९७ |
| गोवर्धनो गिरिवरो | अति | ४९ | ९४ |
| च | | | |
| चित्रं विधे र्विलसितं | वैकु | १३ | ९ |
| छ | | | |
| छत्रचामरमुखाः | सुन्द | ७५ | १४५ |
| ज | | | |
| जगत्प्रलीनं पुन | सुन्द | ९४ | १५६ |
| जनि जीवनाप्यय | सुन्द | १५ | १११ |
| जातं कुत स्तदकृतज्ञ | अति | ५७ | ९८ |
| जानन्नपीह किल | वैकु | ८ | ५ |
| जानेऽथवा किमह | वैकु | ८६ | ५५ |
| जुष्टाष्टमीकज्वल | सुन्द | ४१ | १२८ |
| ज्ञानं बलं विपुल | अति | ६ | ६१ |
| ज्ञानात्मन स्तव तदेव | वैकु | ५० | ३४ |
| ज्ञानिन स्सतत गोगि | सुन्द | ८३ | १४९ |
| ज्याकिणाङ्क परि | सुन्द | ५२ | १३३ |
| ज्योतिः परं परम | वैकु | २६ | १८ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| त | | | |
| तत्त्वार्थतत्पर पर | वैकु | २७ | १९ |
| तदपि किमपि हन्त | वर | ९० | २३३ |
| तद्वै तथाऽस्तु कत | वैकु | ६६ | ४४ |
| तादृग्गुणो न बभू | अति | ३२ | ८४ |
| तापत्रयीमय दवा | वर | ७२ | २२२ |
| तेभ्यः कृती न किल | अति | ४७ | ९२ |
| त्वक् च दृक् च निपि | वर | २४ | १९५ |
| त्वत्कीर्तन स्तुति | वैकु | ९६ | ६१ |
| त्वद्दास्य मस्य हि | वर | ८० | २२७ |
| त्वद्दृष्टि जुष्टमिद | वैकु | ३२ | २२ |
| त्वन्निर्मिता जठर | अति | १६ | ७४ |
| त्वत्पाद संश्रयण | वैकु | ९९ | ६३ |
| त्वत्पादाब्जे प्रजाता | वर | ६२ | २१४ |
| त्वत्साम्य मेव | वैकु | ६५ | ४३ |
| त्वं दक्षिणस्य निव | अति | २५ | ७९ |
| त्वं हि सुन्दर यदा | सुन्द | १०८ | १६३ |
| त्वं हि सुन्दर वनाद्रि | सुन्द | ११७ | १६८ |
| त्वा मन्यगोपगृह | अति | ४० | ८८ |
| त्वा मामनन्ति कवयः करुणा मृताब्धिं | सुन्द | १२२ | १७० |
| त्वा मामनन्ति कवयः करुणा मृताब्धे | वर | ६९ | २२० |
| त्वा मुदार भुज | वर | २२ | १९४ |
| त्वां सेवितं जलज | वैकु | ७६ | ४९ |
| त्र्य्युद्यता तव युव | वैकु | ५१ | ३५ |
| त्रैविक्रमक्रमकृता | वैकु | ७१ | ४७ |
| त्रैविद्यवृद्धजन | वैकु | २ | २ |

| स्तोत्रनाम | तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| **द** | | | |
| दयाक्षान्त्यौदार्य | वर | ११ | १९२ |
| दास स्सखा समभव | अति | २० | ७७ |
| दिव्याचिन्त्य महाद्भुतो | सुन्द | ७० | १४२ |
| दूरे गुणा स्तव तु | वैकु | ४९ | ३३ |
| देव त्वदीय चरण | वैकु | ९० | ५८ |
| देवस्य दैत्यमथ | वैकु | ९ | ८ |
| देवस्य सुन्दर भुज | सुन्द | ८४ | १५० |
| देवि त्वन्महिमावधि | श्रीस्त | ८ | २४८ |
| द्वारनाथ गणनाथ | सुन्द | ७६ | १४६ |
| **ध** | | | |
| धन्यैः श्रुतं तदिह | अति | ४६ | ९२ |
| **न** | | | |
| नख क्रकचक प्रधि | सुन्द | ९७ | १५८ |
| नरसिंहतनु रगौणी | वर | ७१ | २२१ |
| न वक्तुं न श्रोतुं | वर | १४ | १८८ |
| न वायुः पस्पन्दे ययतु | सुन्द | ९५ | १५६ |
| नानाविरुद्धविदि | वर | ७३ | २२३ |
| नित्यमिन्द्रियपथा | वर | ३ | १८० |
| नित्य स्समाभ्यधिक | वैकु | २१ | १५ |
| नित्या तवान्यनिर | वैकु | ४६ | ३१ |
| नित्येषु वस्तुषु भव | वैकु | ३५ | २५ |
| निरवधिषु कृतेषु | वर | ८५ | २३० |
| निराबाधं नित्यं | वर | १२ | १८७ |
| निर्बन्ध एव यदि | वैकु | १०१ | ६४ |
| निष्कल्मषै र्निह | वैकु | ४५ | ३१ |
| निहीनो जात्या वा | सुन्द | ३१ | १२२ |
| नील मेघनिभमञ्जन | वर | २३ | १९४ |

| स्तोत्रनाम | तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| नीलाञ्जनाद्रिनिभ | वैकु | ६७ | ४५ |
| नैव ह्यवाप्य मन | वैकु | ५७ | ३९ |
| न्यायतर्कमुनिमुख्य | वर | ८ | १८३ |
| न्यायस्मृतिप्रभृति | वैकु | १५ | १० |
| **प** | | | |
| पतिं विश्वस्यात्मे | सुन्द | १७ | ११२ |
| पद्मायाः प्रणय | वर | ४१ | २०३ |
| पद्मास्वद्माङ्गुलिषु | वर | ६० | २१३ |
| पर भाग मियाक्ष्वे | वर | ३१ | १९८ |
| परिजनपरिबर्हा | वर | ६३ | २१५ |
| परिमण्डितरास | वर | ३९ | २०२ |
| परो वा व्यूहो वा | वर | १८ | १११ |
| पश्यत्सु सूरिषु | अति | ३५ | ८६ |
| पाणिपादवद | वर | २१ | १९३ |
| पापीयसोऽपि शर | अति | ६१ | १०१ |
| पापैरनादि भव | वैकु | ५८ | ३९ |
| पारिजात विटपा | वर | २८ | १९७ |
| | सुन्द | ५९ | १३७ |
| पीताम्बरं ... कर्णपाशम् तन्मेघमेचक | वैकु | ५ | ४ |
| पीतम्बरं . ... .. कर्णपाशम् श्रीमन्महावन | सुन्द | १४ | ११० |
| पुच्छोत्पुच्छनमूर्छ | सुन्द | ९० | १५३ |
| पुत्रादयः कथममी | वर | ७७ | २२५ |
| पृच्छामि किञ्चन | अति | १७ | ७५ |
| पृथिव्या ह्यात्मानं | सुन्द | १८ | ११३ |
| प्रकृष्टं विज्ञानं | वर | १५ | १८९ |
| प्रत्यगात्मनि कदा | सुन्द | १९ | ११३ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| प्रत्यर्थिनित्रिगुणक | सुन्द | ८० | १४८ |
| प्रलयजनीरपूर | सुन्द | ९२ | १५५ |
| प्रशान्तानन्तात्मा | वर | १३ | १८७ |
| प्रश्च्योतत्प्रेमसारा | सुन्द | ४४ | १२९ |
| प्रिय मितर दथाऽपि | वर | ९१ | २३४ |
| प्रेमामृतौघ परि | सुन्द | ४५ | १३० |
| प्रेमार्द्रविह्वल | वैकु | १० | ७ |
| प्रेम्णाघ्रातुं करिगिरि | वर | ५८ | २११ |
| **ब** | | | |
| बाह्याः कुदृष्टय | वैकु | १४ | ९ |
| बुद्ध्वा च नो च विहि | वर | ७९ | २२६ |
| बृन्दावने स्थिर | अति | ५० | ९४ |
| ब्रह्मेश मध्यगणना | अति | १५ | ७४ |
| **भ** | | | |
| भक्तानां यद्वपुषि | वर | ५९ | २१२ |
| भक्तिप्रभावभव | वैकु | ३ | २ |
| भजत्सु वात्सल्य | वर | ७० | २२० |
| भार्गवः किल भवन् | सुन्द | ९९ | १५८ |
| भावै रनुक्षण मपूर्व | वैकु | ८३ | ५३ |
| भावै रुदारमधुरै | वैकु | ८२ | ५३ |
| भूयश्च जन्मसम | वैकु | ९२ | ५९ |
| भूयांसि भूय उप | वैकु | ९३ | ६० |
| भृङ्गी गायति हंस | सुन्द | १३ | १०९ |
| भोगा इमे विधि | वर | ८१ | २२८ |
| भ्रूविभ्रमेण मृदु | वैकु | ६९ | ४८ |
| **म** | | | |
| मकुट मकुटमालो | सुन्द | ३७ | १२६ |
| मथ्यमानचलफेनिल | वर | २९ | १९७ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| मध्ये क्षीरपयोधि | सुन्द | ११९ | १६९ |
| मन्दर भ्रमण विभ्र | सुन्द | ५१ | १३३ |
| मात्रा यदि त्वमसि | अति | ४१ | ८९ |
| मानुष्यकञ्चरित | अति | २२ | ७८ |
| माया त्वया गुणमयी | वैकु | ३० | २१ |
| मुख मुन्नसमाय | वर | ४० | २०२ |
| मुग्ध शिशु र्वट | अति | १४ | ७३ |
| मुष्णन् कृष्णप्रिय | वर | ५४ | २१० |
| य | | | |
| यज्जातीयो यादृशो | सुन्द | ३० | १२१ |
| यत्कल्पायुत भोग | सुन्द | २९ | १२० |
| यत्किञ्चिदुज्ज्वल | वैकु | ७८ | ५० |
| यत्तत्त्वमक्षरमदृ | वैकु | ६ | ४ |
| यत्त्वत्प्रियं तदिह | अति | ५३ | ९६ |
| यत्त्वं कृतागस | अति | ३३ | ८५ |
| यत्तादृशागस | अति | २७ | ८० |
| यत्तुङ्गशृङ्गविनि | सुन्द | ६ | १०६ |
| यत्संवृतं दशगुणो | वैकु | ३९ | २७ |
| यत्स्वायत्तस्वरूप | सुन्द | २१ | ११५ |
| यथाऽसि यावा नसि | वर | ९२ | २३४ |
| यदपराध सहस्र | वर | ६८ | २१९ |
| यदि त्वभक्तोऽप्यगु | वर | ९५ | २३७ |
| यदीयशिखरागतां | सुन्द | ७ | १०६ |
| यद्ब्रह्मकल्पनियुता | वैकु | ६१ | ४१ |
| यद्ब्रह्मरुद्रपुरु | वैकु | ४२ | २९ |
| यद्वा मृगं मृगयु | अति | २१ | ७७ |
| यद्वृद्ध्यपक्षय | वैकु | ४४ | ३० |
| यद्वै जरासुतभया | अति | ५६ | ९८ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| यद्वैष्णवं हि परमं | वैकु | ४१ | २८ |
| यन्नाभवाम भव | वैकु | ८७ | ५६ |
| यन्नाम नाथ नव | अति | ३९ | ८८ |
| यन्मङ्गलाय महते | वैकु | ४ | ३ |
| यन्मूलकारण मबु | वैकु | २५ | १८ |
| यल्लक्ष्मण स्त्वदनुजो | अति | २८ | ८१ |
| यशोदाङ्गुल्यग्रोन्नमित | सुन्द | ४७ | १३१ |
| यस्यात्मतां त्रिपुर | अति | १३ | ७३ |
| यस्याः कटाक्षण मनु | सुन्द | ६९ | १४१ |
| यस्याः कटाक्षणमनु | वैकु | २९ | २० |
| यस्याः कटाक्ष मृदु | श्रीस्त | १० | २४९ |
| यस्याः कटाक्ष वीक्षा | श्रीस्त | ११ | २५० |
| यं दुर्ग्रहं सुमनसो | अति | ३६ | ८७ |
| यं परोक्ष मुपदेश | वर | ५ | १८१ |
| यं पातका त्सुमहतो | अति | ११ | ७१ |
| यं भूतभव्य भव | वैकु | २२ | १८ |
| यः कश्चिदेव यदि | वैकु | ६४ | ४३ |
| यः खल्वणो रणुतरो | वैकु | १९ | १३ |
| यः स्थावर क्रिमि- | वैकु | ३१ | २२ |
| या कर्मणा मधि | वैकु | १०० | ६४ |
| या कंसमुख्य नृप | अति | ५४ | ९६ |
| या ते गात्रे वरद | वर | ५७ | २११ |
| या दामोदर इति | वर | ५१ | २०८ |
| यादृग्बीजाध्युषित | वर | ५२ | २०८ |
| या बिभ्रती स्थिर | वैकु | ८१ | ५२ |
| या वै त्वयाऽप्युदधि | वैकु | ७९ | ५१ |
| ये तुत्वदङ्घ्रि सरसी | वैकु | १६ | ११ |
| ये त्वत्कटाक्षलव | वैकु | ३४ | २४ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| ये धर्म माचरितु | अति | ३१ | ८३ |
| ये भक्ता भवदेक | सुन्द | ८६ | १५१ |
| ये वाचां मनसाञ्च | श्रीस्त | ४ | २४६ |
| येष्वेकस्य गुणस्य | सुन्द | २६ | ११९ |
| यो जात क्रशिमा | सुन्द | ६८ | १४१ |
| यो नित्य मच्युत | वैकु | १ | १ |
| यो विक्रमेण मनु | अति | २३ | ७८ |
| यौवनवृषककुदो | सुन्द | ६० | १३७ |
| र | | | |
| रघुकुलतिलक त्वं | सुन्द | १०६ | १६२ |
| रम्भास्तम्भाः करि | वर | ५६ | २११ |
| रामानुजाङ्घ्रि शरणो | वर | १०२ | २४१ |
| रिङ्खातो व्रज सदना | वर | ४६ | २०५ |
| रूपप्रकारपरि | वैकु | ५५ | ३७ |
| रूपश्रिया गुण गणै | वैकु | ८० | ५१ |
| रूपश्रिया परमया | वैकु | २८ | २० |
| रूपेण सद्गुण गणैः | वैकु | ४३ | २९ |
| ल | | | |
| लक्ष्म्याः पदं कौस्तुभ | सुन्द | ५६ | १३५ |
| लङ्कायुद्धहतान् | सुन्द | १२४ | १७१ |
| लभ्येषु दुर्लभ | वैकु | ९५ | ६१ |
| लोकां श्चतुर्दश | सुन्द | ८१ | १४८ |
| लोके वनस्पति | श्रीस्त | ९ | २४९ |
| लोलद्भिरिन्द्रिय | वैकु | ९४ | ६० |
| व | | | |
| वकुलधरसरस्वती | सुन्द | १२ | १०९ |
| वज्रध्वजाङ्कुश | अति | ४ | ६८ |
| वज्राङ्कुशध्वज | वैकु | ७० | ४६ |

| स्तोत्रनाम | तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| वनगिरिपति | सुन्द | १०१ | १६० |
| वनाद्रिनाथस्य | सुन्द | ७४ | १४५ |
| वन्देय सुन्दर | सुन्द | २० | ११४ |
| वरद यदि न | वर | ६७ | २१९ |
| वरद यदिह | वर | ८९ | २३३ |
| वल्लिका श्रुतिमत | वर | ४ | १८० |
| वंशं रघो रनु | अति | ३० | ८२ |
| वाराणसीदह | सुन्द | ११६ | १६७ |
| वाहनासन वितान | सुन्द | ७३ | १४४ |
| विज्ञापनां वनगिरी | सुन्द | १२९ | १७४ |
| विद्वेषमानमद | वर | ७६ | २२४ |
| विभवं विवृणोति | वर | ३६ | २०० |
| विलोकनै र्विभ्रम | वर | ९६ | २३८ |
| विविश्य विश्वेन्द्रिय | वर | ९७ | २३८ |
| विवेक धिय मेकतो | वर | ६५ | २१७ |
| विश्वस्य विश्वविध | वैकु | ३७ | २६ |
| विश्वं धियैव विर | वैकु | ६३ | ४२ |
| विषयविषधर | वर | ८२ | २२८ |
| विषयविषयिणी | वर | ८७ | २३२ |
| विस्रम्भणं त्वयि | अति | ६० | १०१ |
| वृषगिरि रय | सुन्द | १० | १०८ |
| वेणुक्कणप्रणयिनि | अति | ४५ | ९१ |
| व्याभाषिताभ्यधिक | सुन्द | ४६ | १३१ |
| व्यालम्बिकुण्डल | सुन्द | ४८ | १३२ |
| व्यूढगूढभुजजत्रु | सुन्द | ५० | १३३ |
| **श** | | | |
| शब्दादि हेय इह | अति | ८ | ७० |
| शम्पाचलं बहुल | वर | ७८ | २२६ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| शम्भोरम्भोरुह | वर | ६१ | २१३ |
| शरणवरणवागियं याऽद्य मे | वर | ८६ | २३१ |
| शरणवरणवागियं योदिता | वर | ८४ | २३० |
| शशधररिङ्खणा | सुन्द | ५ | १०५ |
| शास्त्रैरनादि निध | वैकु | ५९ | ४० |
| शिखरिषु विपिने | सुन्द | १०३ | १६० |
| शीलः क एष तव | अति | १० | ७१ |
| श्रवसश्च दृशश्च | वर | ३४ | २०० |
| श्रीनिधिं निधिमपा | वर | २ | १७९ |
| श्रीमत्पराङ्कुश | अति | ३ | ६७ |
| श्रीमद्वनाद्रिपति | सुन्द | ५५ | १३५ |
| श्रीमन्तौ हरिचरणौ | सुन्द | १ | १०३ |
| श्रीमन्महावनगिरी | सुन्द | ८७ | १५२ |
| श्रीरङ्गराजचरणौ | अति | ५ | ६८ |
| श्रीवत्सकौस्तुभ | वैकु | ७४ | ४८ |
| श्रेयः किरन्तु किर | अति | २ | ६७ |
| **स** | | | |
| स एष सौन्दर्य | सुन्द | ९ | १०७ |
| सञ्जीवयन्नपि | अति | ५८ | ९९ |
| सत्कर्मनैव किल | वैकु | ८८ | ५७ |
| सत्येव गव्यनिवहे | अति | ३८ | ८८ |
| सदंससंसञ्जित | सुन्द | ४९ | १३२ |
| सदातनत्वेऽपि | वर | १०० | २४० |
| सदा षाड्गुण्याख्यैः | सुन्द | २४ | ११७ |
| सदा समस्तं जगं | सुन्द | २७ | ११९ |
| सद्ब्रह्मात्मपदे | सुन्द | १६ | १११ |
| सन्तीदृशः श्रुति | वैकु | २७ | १९ |
| समाहिते स्साधु | वर | १०१ | २४१ |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| सर्वज्ञा स्समुचित | वर | ४७ | २०६ |
| सर्वश्रुतिष्वनुगतं | वैकु | २३ | १६ |
| सर्वस्य चैव गुणतो | वैकु | ४८ | ३३ |
| सर्वं गुणाय गुणि | अति | ४३ | ९० |
| सव्याधि राधि रवि | वर | ७५ | २२४ |
| संवदेत किल | वर | १० | १८५ |
| संवर्तवर्तिनिखि | वैकु | ५३ | ३६ |
| संवर्तसम्भृत | वैकु | ५६ | ३८ |
| संश्लेषे भजतां | वर | ६६ | २१८ |
| सागराम्बरतमा | सुन्द | ५३ | १३४ |
| साचलावटतटाक | सुन्द | ९१ | १५४ |
| सा पूतना शकट | अति | ३४ | ८५ |
| सायामाधृत परि | वर | ४२ | २०३ |
| साला न्हि सप्त सगिरी | अति | १९ | ७६ |
| सालीया इव विटपा | वर | ४४ | २०४ |
| सिंहाद्रिनाथ तव | सुन्द | ८५ | १५० |
| सुखस्पर्शी र्नित्यैः | सुन्द | ३६ | १२५ |
| सुचारु चापद्वय | सुन्द | ४२ | १२८ |
| सुन्दर दोर्दिव्याज्ञा | सुन्द | ८ | १०७ |
| सुन्दरस्य किल सुन्दर | सुन्द | ५८ | १३६ |
| सुन्दरस्य कनशैल | सुन्द | ७२ | १४४ |
| सुन्दरायतभुज | सुन्द | २ | १०४ |
| सुन्दरोरुभुज | सुन्द | ११० | १६४ |
| सुरनर तिर्यगादि | सुन्द | ८२ | १४९ |
| सुसुन्दरस्याऽस्य तु वाम | सुन्द | ६६ | १४० |
| सुसुन्दरस्याऽस्य पदार | सुन्द | ६२ | १३८ |
| सौन्दर्यमार्दव | सुन्द | ६३ | १३८ |
| सौन्दर्यसारामृत | सुन्द | ६७ | १४० |

| स्तोत्रनाम | स्तवनाम | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| सौन्दर्याख्या सरि | वर | ५५ | २१० |
| सौन्दर्यामृत रस | वर | ५० | २०७ |
| सौन्दर्यामृत सार | सुन्द | ५७ | १३६ |
| सौशील्याश्रित | सुन्द | २५ | ११८ |
| स्तोत्रं नाम किमाम | श्रीस्त | ३ | २४५ |
| स्मितनिर्झरिका विनि | वर | ३८ | २०१ |
| स्वकै र्गुणै स्स्वै | वर | ९४ | २३६ |
| स्वपृष्ठे प्रष्ठाद्रि | सुन्द | ९३ | १५५ |
| स्वस्ति श्री र्दिशता | श्रीस्त | १ | २४३ |
| स्वस्ति हस्तिगिरि | वर | १ | १७८ |
| ह | | | |
| हरिकुलमखिलं | सुन्द | ११ | १०८ |
| हरितवारणभृत्य | सुन्द | १२६ | १७३ |
| हस्तिशैलनिलयो | सुन्द | ११८ | १६८ |
| हा जन्म तासु सिक | अति | ५१ | ९५ |
| हा हन्त हन्त भवत | अति | २९ | ८२ |
| हा हन्त हन्त हतको | वैकु | ८४ | ५४ |
| हे देव सुन्दरभुज | सुन्द | ८८ | १५२ |
| हे नन्दनन्दन | सुन्द | ११३ | १६६ |
| हे श्री र्देवि समस्त | श्रीस्त | २ | २४४ |
| है कुदृष्ट्यभिनिविष्ट | वर | ७ | १८३ |
| है निर्भयोऽस्म्यवि | वर | ७४ | २२३ |
| है सुन्दरैकतर | सुन्द | १०७ | १६३ |
| है हन्त जन्तुषु | वैकु | ६० | ४० |


***